श्रीमलधारीयश्रीराजशेखरसूत्रितः

# श्रीकथाकोशः ।

मुद्रयित्री-श्रीमालवदेशान्तर्गतश्रीरत्नपुरीयश्रीऋषभदेवजीकेशरीमल इत्यभिधाना श्वेताम्बरसंस्था

अयं च 'फकीरचंद मगनलाल बदामी' इत्यनेन सूर्यपुरस्थे स्वकीये 'श्री जैन विजयानंद प्रि० प्रे०'

मुद्रणालये मुद्रितः ।

वीरसंवत् २४६४. विक्रमसंवत् १९९४.

प्रतयः ८५०. पण्यं १-४-० क्राइस्टसन् १९३७.

मलधारीयश्रीराजशेखरसूरिसूत्रितस्य

## कथाकोशस्य उपक्रमः

उपादीयतां विपश्चिद्वरा ग्रन्थोऽयं कथाकोशाख्यः, यद्यपि सूरीश्वरैर्जिनेश्वराद्यैर्विहिताः अनेके कथाकोशाः, परं ते धर्मसाधनोपदेशपराः,अयं तु रसपोषणपरो विशेषेण,अत एव ग्रन्थकृत आदावेव 'रसवत्कथाप्रियायां परिषदि' इत्युदाजह्रुः, अत एवात्रापगतमाना अप्यनेकाः कथाः कथिताः सन्ति, परमन्तराऽन्तरा यथावद्भूता अपि निवेशिताः सन्ति, यथा श्रीअभयदेवसूर्यादीनां भक्तैः कृतमुद्यापनादि, ग्रन्थकाराश्चेमे पञ्चदशशताब्द्याः प्रारम्भ एव जाताः, यतः श्रीमद्भिश्चतुर्विंशतिप्रबन्धाख्यः प्रबन्धकोशः विक्रमाब्देषु शरगगनमनुमितेषु व्यरचि, दशाधिकमनुमितेष्वब्देषु च श्रीमुनिभद्राचार्यविहिते श्रीशान्तिनाथचरित्रे साहाय्यमकारि शोधनेनेति निश्चितं श्रीमतां सत्तासमयादि, श्रीमन्तश्च श्रीहर्षपुरगच्छीयाः प्रश्नवाहनकुलीनाश्चेति स्पष्टमेव प्रबन्धकोशप्रशस्तेः, मलधारीति तु तत्रभवतां त्यागादिदशाव्यंजकं विशेषणमेव, नैतस्य प्रतयः सुलभाः कथाश्च रसप्रदा इत्युन्मुद्रणमेतस्य, छाद्मस्थ्यसुलभस्खलनाविषये क्षमायाचनं विधायोपरमे विस्तारात् ॥ श्रीस्तम्भतीर्थश्रीसंघमुद्रितादयं विशिष्ट इति विलोककाः स्वयमेव ज्ञातारः ॥ वीरसंवत् २४६४ कार्त्तिकशुक्लापंचमीतिथावलिखत् (नवानगर देवबागः) जामनगरे आनन्दसागरः ॥

# श्रीकथाकोषे कथाश्लोकाद्यकाराद्यनुक्रमः


| अ | | कथांकः-पृष्ठांकः |
|---|---|---|
| अगुणज्ञेषु गुणवान् | १ | ६०-५८ |
| अतिलोभो न कर्त्तव्यो | १ | ४२-३२ |
| अत्वरा सर्वकार्येषु | × | ५३-५० |
| अनेकेष्वपराधेषु | × | ५८-५५ |
| अनेन तव पुत्रस्य | × | ७६-७४ |
| अपुनःकारिता यत्र | १ | २२-१६ |
| अप्रार्थितेऽपि स्याल्लाभो | १ | २९-२२ |
| अर्थः प्राणापहाराय | १ | ५१-४६ |
| असत्यवादिभिः पुंभिः | १ | ३८-२७ |
| असमञ्जसवाग् लोको | १ | ४-४ |

| आ | | कथांकः-पृष्ठांकः |
|---|---|---|
| आकस्मिको महान् लाभो | १ | ४७-३८ |
| आत्मनः कुशलाकाङ्क्षी | १ | ५५-५२ |
| आपृच्छ्यमानः स्वं दोषं | १ | ६१-६० |
| आमूलचूलं श्रोतव्यम् | १ | ५-५ |
| **उ** | | |
| उत्पन्नेषु च कार्ये | × | ७२-७० |
| उपकारकरं ज्ञात्वा | १ | ३१-२३ |
| **ए** | | |
| एकत्रौचित्यवचनं | × | ६८-७७ |

| क | | कथांकः-पृष्ठांकः |
|---|---|---|
| कदाचिद्धानिरपि हि | १ | ८-७ |
| कलहिन्या गृहिण्या भो ! | १ | ४८-४० |
| कार्यतात्पर्यमज्ञात्वा | १ | ४१-३१ |
| किं न खेदयति प्राज्ञः | १ | ३७-२७ |
| कूटसाक्ष्यात् परं पापम् | १ | ७५-७३ |
| केचिज्जडधियः कार्ये | १ | ३३-२४ |
| केचिन्नृपशवो लोके | | ७-६ |
| केनापि सार्द्धं मेधावी | १ | ५०-४४ |
| केचित् फलन्त्यनुदिनं | १ | ४९-४१ |


१. विनोदकथायामप्येताः सन्ति × विनोदकथायामेता नसन्ति।

ख

| | | |
|---|---|---|
| खलवाक् प्रत्ययेनार्थं | १ | १६-१२ |

ग

| | | |
|---|---|---|
| गुरुमव्यवहारस्थं | १ | २७-२० |
| गौरवं विभवाज्ञाने | × | ६७-६६ |

ज

| | | |
|---|---|---|
| जडश्चिरं विमृश्यापि | १ | ३९-२९ |
| जो पापभीरुचित्तो | × | ८६-१०७ |

त

| | | |
|---|---|---|
| तारुण्ये द्रविणं दद्यात् | १ | ५७-५५ |
| त्रिदशा अपि वञ्च्यन्ते | १ | ४४-३५ |

द

| | | |
|---|---|---|
| देवराजो दीपदिनं | × | ५४-५२ |

ध

| | | |
|---|---|---|
| धीरे धीमति निःशूके | × | १३-११ |
| धूर्त्तानां प्रतिधूर्त्तेषु | १ | १५-१२ |

न

| | | |
|---|---|---|
| न यच्छन्ति यथाशक्त्या | १ | ६०-५९ |
| न वर्त्तितव्यं धीरेण | १ | १७-१३ |
| नराणां वञ्चने कैव | १ | १४-१२ |
| निःशंकः पुरुषः— | १ | १२-१० |
| न्यासापलापमुख्यं यः | | ६९-६७ |

प

| | | |
|---|---|---|
| परद्रविणमादाय | १ | २४-१७ |
| परनिन्दा महापापं | १ | ७४-७३ |
| परस्परं च मर्माणि | × | ६२-६० |
| परिषदि रसप्रियायां | १ | १-१ |
| परोक्ते यस्य विश्वासः | १ | ३५-२५ |
| प्रच्छन्नवाच्यं यद् वाच्यं | १ | २१-१६ |
| प्रथमाडम्बरं दृष्ट्वा | १ | ३६-२६ |

भ

| | | |
|---|---|---|
| भोक्तारोऽर्थस्य कार्पण्य—' | १ | २५-१८ |
| भ्रमन्ति दाम्भिकाः केचित्—' | १ | ३२-२४ |

म

| | | |
|---|---|---|
| मनोरथान् प्रत्ययामः | १ | १०-९ |
| मनो हि दारुवद्वक्रं, | × | ७०-६९ |
| मा कस्यचिदवष्टम्भात् | १ | ३३-१६ |

य

| | | |
|---|---|---|
| यत्तत् प्रजल्पतः कार्यं० | १ | ४०-३० |
| यत् सिद्ध्यति धिया पुंसां | १ | १७-१४ |
| यदा येन यथा मृत्युः | १ | २-२ |
| यद् यदेको बुधो वेत्ति | १ | ३-३ |
| यथा रुचिर्यथा पथ्यं | १ | ३४-२५ |

| | | |
|---|---|---|
| यन्न सिद्ध्यति शक्त्याऽपि | १ | ९-८ |
| यस्य बुद्धिः स्वयं नास्ति | × | ७१-७० |
| यस्यालस्यमसामान्यं | १ | २०-१८ |
| या याऽवस्था समभ्येति, | × | ६८-६३ |
| यावदायाति निर्वाह० | १ | ११-९ |
| योऽधिगत्य पदं किञ्चित् | × | ६६-६५ |
| यो यथा बुध्यते जन्तुः | १ | ६-८ |
| **र** | | |
| रहस्यं नैव वक्तव्यं | १ | ५२-४७ |
| **ल** | | |
| लघवोऽपि प्रबोधाय | १ | ५६-५४ |
| **व** | | |
| वाणिज्यपौरुषधियां | × | ४३-३३ |
| विचारयति कस्तत्त्वं | १ | ४५-३६ |
| विद्याभिरनवद्याभिः | १ | ४६-३७ |
| विश्वासप्रतिपन्नानां, | × | ७७-७४ |
| **श** | | |
| शक्या केन वशीकर्त्तुं | १ | २८-११ |
| **स** | | |
| सट्ठिं कागसहस्सा | १ | ५९-५७ |
| सर्वेऽपि लोभिनो यत्र | १ | १-१ |
| सुलहो विमाणवासो | × | ८३-९४ |
| सेवाफलमयच्छन्तः | १ | १९-१५ |
| स्वल्पेनापि प्रयासेन | × | ६३-६१ |
| हितं वचो न यः सम्यक् | × | ६४-६२ |


**समाप्तम्**

## ✻ ग्रामनामानि ✻


| अ | पत्राङ्कः |
|---|---|
| अचलपुरं | २३ |
| अवन्ती | २८ |
| अष्टापदपुरं | ३७ |
| आ—आनन्दपुरं | ९ |
| उ—उज्जयिनी | ११ |
| ए—एलापुरं | १७ |

| क | पत्राङ्कः |
|---|---|
| कदली | १२ |
| कलिका | १० |
| काञ्चनपुरं | ४७ |
| कुन्दकलिका | १८ |
| कुरुविन्दपुरं | १६ |
| कुशलस्थलं | १०७ |

केतकपुरं ४०
केरलपुरं १४
केलिवर्द्धनं ३१
कोद्रवपुरं ८
कक्कोलिका १९
ग—गोर्व्वरपुरं ३८

**च**

चन्दनिका ९
चन्द्रपुरं १२
चन्द्रिका १३
चम्पकपुरं २०

**त**

तरङ्गिणी ६९
तारापुरं ७
द—देवपुरं ३५-१२
ध—धवल्लकम् ७३

**प**

पाटलिपुत्रपत्तनं १९
पाण्डुमथुरा १०६
पुष्पपुरं ३०
पोतनपुरं २७
प्रवालपुरं २३
ब—बहुलपुरं १५

**भ**

भृगुपुरं २४
भोगपुरं ९७

**र**

रत्नपुरं ४४—८४
राजगृहम् ७०
रोहणाभिधं ३२

**ल**

लक्ष्मीनिवासः २
लक्ष्मीपुरं २८

**व**

वलभीनगरं ६३
वसन्तपुरं ५७—७४
वाणारसी ६६
वासन्ती ६७
विलासपुरं ८०
विशालशालः १००
विशाला २१
वीरपुरं ५
वेलापुरं ३१
वैजयन्तम् ३३

**श**

शान्तिपुरं ४
श्रीपुरम् ४७
श्रीपोतनपुरं ६७
श्रीवर्द्धमानपुरं २६

संसारपुरम् ९४
सिन्दूरपुरं २६
सुघोषग्रामः १

**ह**

हरिपुरं ५४
हारपुरं ४१
हस्तिनागपुरं ६५
हेमपुरं ४७
हेमरथं ५९


ग्रामनामानि समाप्तानि

## विशेषनामानि

| | |
|---|---|
| अ—अशोकः | पत्राङ्कः |
| क | |
| कमलः | ७७ |
| कमलगुप्तः | ३७ |
| कमलश्रीः | ९० |
| करवीरः | १२ |
| कलहंसः | १६ |
| कलाकेली | १७ |
| कलिङ्गादः | २३ |
| कान्तिश्रीः | ९० |
| कामपालः | २७ |
| कुन्तपालः | १२ |
| कुन्तलः | १२ |
| कुन्ददन्तः | १४ |
| कुमुदः | १४ |
| कुरुबकः | १८ |
| कुलतिलकः | २३ |
| कुलानन्दः | ३५ |
| कुशलशेखरः | ३७ |
| केदारकः | ४४ |
| केरलकुमारः | ९७ |
| कोकिलः | २१ |
| ग | |
| गङ्गानदी | ७१ |
| गाथासुन्दरः | ८० |
| च | |
| चकोरः | २० |
| चन्दनः | १७ |
| चन्दनकः | २६ |
| चन्द्रः | ३०-३७ |
| चन्द्रशालः | १५ |
| ज | |
| जया | ५२ |
| जितशत्रुः | ६० |
| जिनदत्तः | १९ |
| ट—टट्टारशिवः | ९ |
| त | |
| तारा | ७ |
| तारादेवी | ८७ |
| तिलकः | ४ |
| द | |
| दामोदरः | ६९ |
| देवानन्दः | ७ |
| ध | |
| धनः | ६६ |
| धारिणी | |
| धीरकः | ६१ |
| न | |
| नन्दिवर्द्धनः | १९ |
| नागसेनः | ८९ |
| प | |
| पवनकेतुः | ९० |
| पवनपोतः | ८६ |
| पुञ्जाख्यः | ३ |
| पुरुषदत्तः | १०६ |
| प्रद्युम्नः | ३२ |
| फ—फोगशिवः | ४० |
| भ | |
| भद्रशालः | १५ |
| भद्रकः | १०७ |
| भानुमती | ७४ |
| म—मकरध्वजः | ४७ |

| | |
|---|---|
| मतिसागरः | ७४ |
| मदनः | ६६ |
| मदनकलिका | ३५ |
| मदनमञ्जरी | ४७ |
| मन्धरः | ७० |
| मलयकेतुः | ३१ |
| महाधनः | २८ |
| माया | ८ |
| मृगावती | ३३ |
| **र** | |
| रत्नसारः | ४४ |
| रत्नसुन्दरः | ८० |
| रत्नावली | ८० |
| रिपुमर्दनः | ६३ |
| **व** | |
| वसन्तध्वजः | ४७ |
| वसन्तसुन्दरः | ८० |
| वारवासिनी | ११ |
| विजया | ४ |
| विदुरः | ७२ |
| विद्याधरः | ३३ |
| विमलः | ७७ |
| वीरः | ७६-७७ |
| वीरङ्गः | ८ |
| वीरणकः | १३ |
| वीरमती | ५२ |
| वीरश्रेष्ठी | ५२ |
| वैजयन्तः | ७४ |
| वैभारगिरिः | ६९ |
| वैरसिंहः | ७४ |
| **श** | |
| शङ्करः | २ |
| शङ्खः | ५४ |
| शतायुधः | ६७ |
| शारदानन्दः | ७४ |
| शिवराशिः | ९ |
| शुचिबुद्रः | ९७ |
| श्रीदेवः | ९७ |
| श्रीपतिः | ५५ |
| श्रीपुरः | ६१ |
| श्रीमती | ५५ |
| श्रीमती | ६० |
| श्रीवर्द्धमानस्वामी | २२ |
| भृङ्गदत्तः | ३२ |
| **स** | |
| संकलनामा | ४७ |
| संकलश्रेष्ठी | ५२ |
| सलक्षणा | ४७ |
| सहियडः | ३५ |
| सावरद्वीपः | ८९ |
| सिद्धः | ६९-७६ |
| सिन्दूकरः | १० |
| सुबुद्धिः | ३७ |
| सुमङ्गलः | ८४ |
| सोमदत्तः | १९ |
| सोमदेवः | ६७ |
| ह—हस्तसेनः | ३८ |
| हरिचन्द्रः | ७६ |
| हारप्रभः | ८७-९० |
| हालाहलः | ११ |

समाप्तम्

# कथानकानुक्रमः


| | कथांकाः-पत्रांकाः |
|---|---|
| मोदकीकथा | १-१ |
| वणिक्कथा | २-२ |
| पण्डितैकमत्यं | ३-३ |
| गृहभंजककथा | ४-४ |
| मूर्खशिष्यः | ५-५ |
| व्यवहारज्ञः | ६-५ |
| जटिलकथा | ७-६ |
| पुण्याधीनहितासिः | ८-७ |
| सुखोपायज्ञवणिजः | ९-८ |
| बटुकथा | १०-९ |
| जटिलः | ११-९ |
| सशंकादिः | १२-१० |
| द्यूतकृत् | १३-११ |
| छेकवणिक् | १४-१२ |
| धूर्त्तेश्वरकथा | १५-१२ |
| स्वार्थमूढविप्रः | १६-१३ |
| स्त्रीमुखकुविन्दः | १७-१४ |
| कार्यतत्त्वज्ञश्रेष्ठी | १८-१४ |
| सेवकशत्रुस्वामिकथा | १९-१५ |
| विषमे सख्यभावः | २३-१६ |
| द्रव्यानर्पकस्वर्णकारः | २४-१७ |
| संचायकक्लेशिता | २५-१८ |
| वादिप्रबोधः | २६-१९ |
| क्रौर्येण गुरोः शिक्षा | २७-२० |
| स्त्रिया निर्मर्यादता | २८-२१ |
| श्रद्धाजन्यो लाभः | २९-२२ |
| उपकारे प्रीतिः | ३१-२३ |
| दाम्भिकश्रावकः | ३२-२४ |
| अविमृश्यकारी | ३३-२४ |
| लोकाप्राधान्य | ३४-२५ |
| परवाक्प्रत्यये चौरः | ३५-२६ |
| आडम्बरव्यर्थता | ३६-२६ |
| दीर्घक्रिये खेदः | ३७-२७ |
| असत्यात् कलहः | ३८-२८ |
| जडविमर्शवृथात्वं | ३९-२९ |

| | |
|---|---|
| यत्तद्दूकुरपि सिद्धिः | ४०-३० |
| अतात्पर्यज्ञवचसो हास्यं | ४१-३१ |
| अतिलोभे शृंगदत्तः | ४२-३२ |
| भाग्याधिक्यं | ४३-३३ |
| देवीयक्षवंचकम् | ४४-३५ |
| अविचारे राजश्यालशूला | ४५-३६ |
| व्यवहारज्ञताप्राधान्यं | ४६-३७ |
| भाग्यबलवत्ता | ४७-३८ |
| कलहिनीखेदः | ४८-४० |
| कपालतारतम्यता | ४९-४१ |
| विरोधबलवत्ता | ५०-४४ |
| प्राणनाशनोऽर्थः | ५१-४७ |
| रहस्याकथनं | ५२-४८ |
| मूर्खकथा | ५३-५१ |
| भवितव्यताध्रौव्यं | ५४-५२ |
| द्रोहचिन्तकस्य कथा | ५५-५२ |
| लघोर्बोधकत्वं | ५६-५४ |
| वृद्धत्वे न दानं | ५७-५५ |
| कुमारामात्यस्य बुद्धिः | ५८-५६ |
| बुद्धिदृष्टान्तसप्तकं | ५९-५७ |
| अगुणे गुणा दोषाः | ६०-५८ |
| पराधीनं दानं | ६०-५९ |
| स्वदोषाख्यायी | ६१-६० |
| मर्मोक्तौ हानिः | ६२-६० |
| भाग्यमहत्ता | ६३-६१ |
| हिताश्रवणे दुःखं | ६४-६२ |
| आगतावस्थावेदनं | ६५-६३ |
| उपकारकथा | ६६-६५ |
| बुद्धिमाहात्म्यं | ६७-६६ |
| औचित्यमहिमा | ६८-६७ |
| न्यासापहारेऽनर्थः | ६९-६७ |
| नमस्कारमहिमा | ७०-६९ |
| निर्बुद्धेर्नाशः | ७१-७० |
| बुद्धेर्जीवितम् | ७२-७० |
| कर्मायत्तं फलम् | ७३-७२ |
| परनिन्दापापम् | ७४-७३ |
| कूटसाक्ष्यपापम् | ७५-७३ |
| अप्रशिखार्थः | ७६-७४ |
| विश्वासघातकफलम् | ७७-७४ |
| इन्द्रियविवादः | ७८-७६ |
| दानमाहात्म्यम् | ७९-७६ |
| सप्तक्षेत्रीदानम् | ८०-७७ |
| सम्यक्त्वाराधनम् | ८१-८० |
| ऋद्धिमदामदफलम् | ८२-८६ |
| बोधिदुर्लभत्वम् | ८३-९४ |
| लक्ष्मीविकारः | ८४-९७ |
| लक्ष्म्यां श्रीदेवः | ८४-१०० |
| मनोरथनैरर्थक्यं | ८५-१०६ |
| अभयदानमहिमा | ८६-१०७ |


समाप्तम्

अर्हम् ।

श्रेष्ठि देवचन्द्र लालभाइ-जैनपुस्तकोद्धारे ।

श्रीमलधारिगच्छनाथश्रीमद्राजशेखरसूरिकृतः

# कथाकोषः (संस्कृतः) ।

परिषदि रसप्रियायां रसावतारार्थमन्तरकथेयम् । मलधारिगच्छनाथः सूरिः श्रीराजशेखरः कृतवान् ॥१॥

## १ मोदकी कथा—

सर्वेऽपि लोभिनो यत्र, मन्दबुद्धिजनाश्रिताः । तत्र नैवानुगैर्भाव्यं, तां श्रुत्वा मोदकीं कथाम् ॥१॥

सुघोषग्रामे सर्वपशुस्तापस एकोऽस्ति, तस्य वालुङ्की-वार्त्ताकी-वृन्ताकी-हारहूरादिवल्लीलावाटिका वर्त्तते, तां स दत्तावधानो रक्षति । एकदा धेनोः पदानि प्रत्यूषे विष्वद्र्यग् विप्रेक्षिष्ट, केयं गौर्निशि मद्वाटीं चरतीति सरोषं दध्यौ, निशि यावत् सावधानो यष्टिहस्तस्तस्थौ तावत्तत्र सुरभिरेकाऽवतीर्य्य वल्लीः सलीलं ग्रसते, सहसा तापसस्तस्याः पुच्छेऽलगत्, तावदवष्कय्यपि गगने पक्षि-

णीवोड्डीय यान्ती प्राकारवेष्टितं सौधमेकं स्वस्थं ययौ सतापसा, अन्तःसौधं तस्थुषी तापसमाकार्यागदत्—भो तापस ! कामधेनुरहं, मम मन्दिरमिदं, सर्वपुष्पफलपत्रधान्यपयःप्राप्तिस्वस्थाऽपि गोस्वभावसुलभया क्षेत्रान्तरचारेच्छया नुन्ना तव साड्वलां वाटीं प्रतिनिशमटामि, तदन्ते च तस्याः पत्रपुष्पफलादीनि, त्वं नित्यं मल्लाङ्गूललग्नो मम सदने मोदकान् अद्याः, अहं ते वाटीमेष्यामीत्युक्त्वा (क्तो)मोदकान् चखाद, तुष्टस्तद्दिनं तत्रैव स्थित्वा निशि गोपुच्छलग्न उत्तीर्य्य स्वमठीमाटीत्, यदा यदा मोदकेच्छा तदा तदा पूर्वोक्तयुक्त्या मनोरथं पिपर्त्ति। एकदा सुरभिगवीं जगौ—यद्याज्ञा ते भवेत्तदा निजपरिवारं तव लड्डुकानतिथीकरोमि, कामधेनुः प्रतिपेदे, ऊचे च—यथा त्वं ममाधिपुच्छं विलगेः तथा त्वच्छिष्यस्त्वत्पादयोः अन्यस्त्वन्यतरपादयोरित्येवं परम्परया लग्नाः स्वच्छन्दमायान्तु को दोषः ?। तुष्टस्तापसः, प्रातः परिजनमाकार्यादिक्षत्—सर्वैः प्रगुणैः स्थेयं, कामगवीसिंहकेशरा भोक्तव्याः सन्ति, एवमेवं हि कथा निवृत्ता विद्यते, वेलायां सुरभ्यगात्, पुच्छे स भरटः, भरटांह्रिद्वये शैक्षकः, परम्परया तद्वृन्दं च, एवं गगनगमने प्रस्तुते केनापि पृष्टं—गुरो ! मोदकाः स्वामिभिरादिरे कियत्स्थूलाः ?, भरटकस्त्वज्ञो मूर्खः करौ प्रसार्यादीदृशत्, एतावन्मात्रा इति, परित्यक्ते पुच्छे सर्वे पेतुः, चन्द्रिकाङ्कितात्ङ्गा विजहृश्चेति ॥ इति मोदकी कथा १॥



### मृत्युप्रकारान्यथाऽभावे वणिक्कथा २—

यदा येन यथा मृत्युः, प्राप्तव्यः सोऽन्यथा नहि। आराधिते यमे तुष्टे, दैवयोगाद्वणिग् मृतः ॥२॥

लक्ष्मीनिवासे नगरे श्रीणां क्रीडागारे विनयी नयी सद्वाक्यमाणिक्याकरः शङ्करो नाम श्रेष्ठी, स पुत्रचतुष्टये कुटुम्बभारमारोप्य न्यायार्जितां श्रियं पात्रसात्कृत्वा एकदैवं परामर्श—गलितं तावद्यौवनं, आयाति जरा, जराऽनन्तरं ध्रुवं भावी मृत्युः,

मृत्योः परं भीषणं नास्ति, उक्तश्च—"मनोरथरतोल्लासास्तावद्दधति हृद्यताम्। यावन्न स्मर्यते मृत्योरमङ्गलविजृम्भितम् ॥१॥ वैभवादिमदोन्मादो, मृत्युरित्यक्षरश्रुतौ। नापैति यस्य सोऽवश्यं, मद्यपादपि दुर्मदी ॥२॥" ततश्च तत्किमपि मया कर्त्तव्यं येन यमः प्रसन्नो मम नामकं वहिकायाष्टालयतीति परिभाव्य गिरिपरिसरे कृष्णवर्णदेवकुलिकायां श्यामाकारं श्यामपरिकरं यमं ग्रावमयं श्यामवस्त्रं श्यामवस्त्रैः पूजयति, नैवेद्यादिभिश्च तथा तथा प्रीणाति, एवं जितेन्द्रियतया मितपरिच्छदस्य यमं सेवमानस्य कियत्यपि गते काले तत्र यमकिङ्कराः स्वैरं भ्रमन्तः समैयरुः, तस्य तां कीनाशसेवाचर्यां दृष्ट्वा विस्मिताः कीनाशमेत्य व्यजिज्ञपन्—देव! त्वामेवमेवं श्रेष्ठ्येकः समाराध्नोतीति, तदाकर्ण्य तुष्टः श्राद्धदेवस्तैस्तमाजूहवत्, उवाच च—साधु भोः! साधु कोऽप्यस्मान् एवं नाराध्नोति यथा त्वं तत्त्वयि प्रसेदिवांसः स्मः, याचस्व यद्रोचते। ततः श्रेष्ठी जगाद—मम नाम निजपत्रेभ्यो वालय यथाऽहं न म्रिय इति, यमोऽप्योमिति गदित्वा चित्रविचित्रौ कायस्थावाकारयत्, बहिः पट्टशालायामुपाविशतां, यावत्तयोरादेशं ददाति यमस्तावत्ताभ्यां पत्रेऽवाचि—यदा शङ्करश्रेष्ठी यमं निजामरत्वायार्थयिष्यते तदाऽकस्मात् पतितजर्जरभारपट्टाक्रान्तो बहिः पट्टशालायां मस्तके (मरिष्यति) इत्येवं वाच्यमाने बहिर्भारपट्टोऽपतत्, तेनासौ पराशुरासीत्। यमो हा! हा! असत्सेवाफलमस्य वराकस्य किमपि नासीदिति शोकाक्रान्तः स्वसदनमगमत् ॥ परसमयकथानकमेतत् ॥२॥

पंडितैकमत्यं ३—यद् यदेको बुधो वेत्ति, तत्तदेवापरे बुधाः। पयःस्थाने पयः क्षिप्तं, सर्वैर्नृपतिपण्डितैः ॥३॥ पंडितैक-
मत्यं ३
॥३॥

क्वचित् पुरे श्रीपुञ्जाख्यस्य राज्ञोऽधीतसकलविद्यानां कवीनां पण्डितानां च पञ्च शतानि ग्रामाग्रहारादिग्रासवाससुस्थितानि विद्यन्ते। एकदा राज्ञा पुत्रिकायाः पाणिग्रहणमहभोजनवेला प्रचक्रमे, पश्चापि पण्डितशतान्यादिदिशिरे—घोलगृहे नान्दीपात्रेष्वेकैकं

दुग्धकुम्भं क्षिपध्वं, पण्डिताः सर्वेऽप्युत्थायागुः, एकेन विममृशे—ममैकं जलकुम्भं बहुदुग्धकुम्भान्तः को ज्ञास्यतीति धिया जलकुम्भमेव न्यक्षिपत्, शेषा अपि सर्वे एवमेव यावत् कर्मकराः क्षीरं निभालयन्ति तावज्जलमेव, राजा विज्ञप्तः, कुतूहलाद्भूयमालोकितुमगम(द)त्, तत्तथैव जगाद सहासं, सर्वेषां पण्डितानामेकैव रीतिः ॥ इति पण्डितकथा ॥३॥

**लोकवागनादरे ४–असमञ्जसवाग् लोको, न भाव्यं कर्णदुर्बलैः। गृहभञ्जनकश्चक्रे, कलिं पतिकलत्रयोः ॥४॥**

गृहभंजक-
कथा ४

शान्तिपुरे तिलकः श्रेष्ठी, विजया भार्या, तौ द्वौ मिथः स्नेहलौ, अपत्यानि तु न जीवन्ति तयोः, अतः पृच्छतो ज्योतिषिकान्, गृह्णीत उपश्रुतीः, स्नातौ तीर्थेषु, ददाते दानानि, एकदा तद्गृहे शठो वैदेशिक आयासीत्, स भोजनमयाचीत्, न पुनः प्रापद्, अतोऽकुपत्, अस्मिन् गृहे पुत्रा न जीवन्ति जनमुखादिति पर्यज्ञासीत्, अतो द्वादशतिलकभृत् शुचिवेषो द्विजो ज्योतिषिको भूत्वा पुनर्गृहमागमत्, श्रेष्ठिन्या पपृच्छे–के यूयं?, किं वित्थ?, स प्राह–महामौहूर्त्तिकोऽहं त्रिकालज्ञः, तयाऽभाषि–तर्हि किमिति ममापत्यानि न जीवन्ति?, शठो बभाषे–तव भर्त्ता राक्षसस्तान्येष भक्षति दुर्द्धरमन्त्रशक्त्या, सा स्माह–कः प्रत्ययः?, सोऽप्याचष्ट दुष्टः–तस्य शरीरं क्षारमस्ति, लीढ्वा गवेषयेरित्युपाकर्णिता, तया मंत्रयित्वा गतो हट्टं, आलपितः श्रेष्ठिना–दैवज्ञ! वेत्सि किञ्चित्?, स प्रललाप सर्वमिति। ततः प्रमुदितः स पप्रच्छ–किं मे पुत्रा जाता जाता विपद्यन्ते?, स उत्तरयति–तव भार्या शाकिनी, सा तानि जातमात्राणि भक्षयति, कः प्रत्ययः?, ऊचे सः–सा तव सुखप्रसुप्तस्य विश्रब्धस्य जिव्हयाऽङ्गं लेक्ष्यतीति लिङ्गं, विसृष्टो गणकः, आयातः श्रेष्ठी मन्दिरं, सुप्तो मध्याह्ने पल्यङ्कतल्पे श्रेष्ठिन्या सह, यावत् किल श्रेष्ठी छद्मना निद्राति तावत् सा ज्योतिषिकवाक्प्रत्ययाय पृष्ठं लेढुं ढुढौके, श्रेष्ठी तद्वाक्प्रत्ययापन्नः श्रेष्ठिनीमाः शाकिनीं जानामीति चुक्रोश, साऽपि रे राक्षस! बुद्धोऽसीति

निष्ठुरं मललाप, कलिर्मुहूर्त्तमेकं यावद्बभूव तावन्मिलिते लोके वार्त्तामूले गृहीते गृहभञ्जकस्य कस्यापि विलसितमिति जज्ञे, तावत् सोऽपि कलिनारदः कलिं समालोकयन् गृहोद्देशभागमागतोऽस्ति, लोके मिलिते समेत्याऽऽत्मानं कलिकारापकं जगौ ॥इति गृहभञ्जककथा॥

पूर्णावधारणं ९–आमूलचूलं श्रोतव्यं, श्रोतव्यं नांशमात्रतः। अज्ञातपारम्पर्येण, गुरुः शिष्येण ताडितः ॥९॥



वीरपुरे कश्चिज्जटाधरो जरातुरो बधिरः, तस्य महावैधेयः शिष्यः, कदाचिद्गुरुणा शिष्यो भाषयामासे–वत्स ! बधिरोऽहं न शृणोमि किञ्चन, गत्वा वैद्यं पृच्छ किमप्यौषधं, चलितः शिष्यो, मध्याह्नसमये वैद्यगृहद्वारं यावज्जगाम, स्थितश्चोर्ध्वस्तत्रैव, तावद्वैद्यो नगरं पर्यट्याऽऽगतः स्वसदनं, तेन च प्रातर्भ्रमणिकायै गच्छता ज्येष्ठपुत्रो लघुपुत्रपठनाय नियुक्तोऽभूत्, स ज्येष्ठपुत्रो भाषितः–भोः। त्वयाऽस्य शिशोः पठनाय किमपि यत्नः कृतो न वा ?, पट्टिका समभ्यस्ता न वा ?, ज्यायानुवाच–तात ! मद्वचनमसौ न शृणोति, इत आहूत उत्प्लुत्यान्यतो याति, कुपितो वैद्यश्चपेटाभिस्तं शिशुं जघान चिरं, किं रे ! श्रोष्यसि न वेति भूयो भूयो बभाषे च। श्रुत्वा चेदं भरटकशिष्यः इदमेव हननं बाधिर्यभञ्जनोपाय इति निश्चित्य मठं गत्वा गुरुं हस्ते गृहीत्वा भुवि पातयित्वा प्रचण्डाभिश्चपेटाभिस्ताडयति, किमद्यापि न शृणोषीति वदति च, मिलितो लोकः, पृष्टं गुरुकुट्टने कारणं, सोऽप्यौषधमिदमिति वदति, कुत इदमौषधमधिगतमिति पृष्टे वैद्यादित्यूचे, को वैद्यः ?, अमुकः, पारम्पर्येण गवेष्यमाणं मूलं न किञ्चित्, महता क्लेशेन गुरुर्मार्यमाणो लोकेन रक्षितः ॥ इति मूर्खशिष्यकथा ९ ॥

बोधनं यथामति ६–यो यथा बुध्यते जन्तुस्तं तथा बोधयेद्बुधः। कखप्रलापी दधनेत्यार्यो याज्येन बोधितः ॥६॥

क्वचिद् ग्रामे धनधान्यसमृद्धः श्रेष्ठ्येकोऽस्ति, स च तापसभक्तो दाता विनयी दक्षः, अन्यतो नगरादेकं टट्टारशिवनामानं

तपस्विनं समाकार्य स्वग्राममानयत्, चतुर्मासीमवास्थापयच्च। कियद्गते काले वर्षारात्रे ग्रामो रात्रौ धाट्या ज्वलितः, सर्वगृहेष्वन्नं दग्धं, काका नेशुः, यजमानगृहेऽपि रात्रौ प्रदीपनं लग्नं, ज्वलितं सर्वमन्नरुतकर्पासादिजातं, प्रातर्लगति स्म गुरोर्बुभुक्षा, शिष्यो भैक्षाऽऽनयनाय जगाम यजमानमन्दिरे, न किमप्यन्नं प्राप्तं,प्राप्तो गुर्वन्तिकं, गुरुस्त्वन्नालाभदुःस्थः प्राह–यदपि तदपि भक्ष्यमानयेति पुनस्तमेव प्राहिणोत्, तेनापि कस्मिंश्चिन्निम्बद्रुमे रात्रिलग्नाग्निज्वालादग्धमृतपतितकाकशबान्यानिन्यिरे, गुरुस्तान्येव जिघ्रसिषया चुम्बयितुं प्रवृत्तः। अत्रान्तरे यजमानस्तादृशं विकर्म दृष्ट्वा गुरुमुपालेभे–गुरो! स्मृतिवेदपुराणेषु काकमांसभक्षणं न विहितं, किमेतदारब्धं भवता?, गुरुराह–यजमान! बाढं क्षुधा बाधितोऽहं, तव तु गेहेऽग्निदाहादन्नादिप्राप्तिर्नास्ति, अत एतान्यपि काककलेवराण्यद्मि, न चात्र दोषः, न हि वयमपरं किमपि शास्त्रं पठामः, मातृकापुराणे तु गुरुपरम्परया जानीमस्तत्र 'कखा' इति पठ्यते, अस्य चायमर्थः–क इति काकाः, ख इति खादनीयाः इति शास्त्रोक्ताचरणे को दोषः?। यजमानेन तस्य तावतीं पात्रतामाकलय्य जगदे–भगवन्! मातृका चेत् प्रमाणं तर्हि तत्रैव 'दधने'ति चिन्त्यतां, दग्धाः काका न भक्ष्याः स्युरित्यस्यार्थः, गुरुर्वदति–ज्ञातं, त्यक्तास्तर्हि वायसाः॥ इति व्यवहारज्ञबोधककथा ॥६॥



**नृपशोरबोध्यता ७–केचिपन्नृपशवो लोके,तेषां सत्त्वकथा पुनः। व्यवहारविदे नैषां, न बुधत्वं तपस्विवत्॥७॥**

क्वचिन्निवेशे जटी मूर्खो गेही च, तच्छिष्यस्तु तदधिकः, कदाचिदासन्नग्रामस्थपितृभ्रातृमण्डलवासिनीं निजां जायामानेतुं गुरुणा विनेय आज्ञप्तो याहीति, सोऽप्यप्राक्षीत्, तत्र गतेन मया किं किं कर्त्तव्यं?, जटाभृताऽऽदिष्टं–उण्डानि वक्राण्युच्चानि वाक्यानि वाच्यानीति, गतः शिष्यो ग्रामं, मीलितस्तेषां, आलापितस्तैः प्रथमं–गुरोः कुशलमिति ब्रूहि, तेन कूप इत्युत्तरं दत्तं,को भावः?–

गुरुणा ह्यादिष्टं–उण्डानि ब्रूयाः, न च कूपात्परं किमप्युण्डमिति, पुनस्तैरालापे शिष्यो वक्राण्यभिधातव्यानीति स्मृत्वा दात्रमिति ललाप, पुनः क्षेमप्रश्ने उच्चानि वाच्यानीति धिया डुङ्गर इति निर्वचनमर्पितं, तत् कुटुम्बमखिलं चकितं, ध्रुवं स जटी दात्रं गृहीत्वा तृणच्छेदाय गिरिशिखरं गतः, ततश्चलन् स्खलनवशाद् अधोगभीरेऽवटेऽपतत् मृतश्च, अत एवासौ व्यक्तं न वक्तीति विमृश्य तमुच्चैः पृच्छन्ति–कुशलं कुशलं ?, स पुनस्तदेव २ प्रणिगदति, निश्चिततपस्विमरणैस्तैर्हा हा इत्युक्त्वा राउलपत्नी रण्डितेति तारपूत्कारं रोदितुमारेभे, क्षुल्लकोऽपि रोदिति, एवं बहून्यहोरात्राण्यतिक्रान्तानि, विसृष्टशोकैस्तैः शिष्यः प्रैषि–प्राप्तो गुरुमठं, रोदत्येव मुक्तकण्ठं, गुरुणा पृष्टं–किं रे ! रोदिषि ?, राउलपत्नी रण्डितेति, तच्छ्रुत्वा राउलोऽपि तारमरटत्, तदेवं पुनः पुनः प्रलपति, मिलितो लोकः, कथं रुद्यते ?, तथैव जगाद, लोकः प्राह–त्वयि जीवति सा कथं रण्डेति, स सक्रोधमाचष्ट–रे दुष्टाः ! तत एव चेलुक आयातः, कथं कूटमिदं ?, लोकस्तं त्यक्त्वा गतो, बोध्यमानोऽपि न बुध्यति ॥ इति जटिककथा ७ ॥

सर्वसुन्दरता ८–कदाचिद्धानिरपि हि, वृद्ध्यै स्यात्पुण्ययोगतः। सर्वं विप्रियमप्युच्चैः, श्रेष्ठिना भव्यमौच्यत ॥८॥



तारापुरे देवानन्दः श्रेष्ठी, पत्नी तारा, वधूश्चैका विधवा, श्वा चैको नित्यसेवकः, कदाचित्कलहकुपिता वधूः पितृगृहमगात्, श्रेष्ठिन्या जगदे–श्रेष्ठिन् ! वधूरद्यापि नायाति रुष्टा, ततश्चाग्रहादाह्वायतां, श्रेष्ठी–नन्विदमपि भव्यस्य कारणमिति प्रोवाच, 'थिरह लच्छि' इति पुनः पुनरुवाच। एकदा मृतो मण्डलः, मण्डलान्तरानयने प्रेरितः श्रेष्ठिन्या पतिः, इदमपि भव्यस्य कारणमित्याह। पतिता चान्येद्युः सकपाटा खटकी। तत्रापि ते एव वचनप्रतिवचने। अथ कदाचिद्देशाद्देशान्तरं प्रति गच्छत्सु निशि राजकीयधनवाहिषु रासभेषु निरङ्कुश एको रासभराद् राजकीयनरदृष्टिदूरस्थो बदरकभारातुरस्तद्गृहमेतः, धनमपीपतदगाच्च वृन्दमध्यं, उत्थितो

देहचिन्तार्थं श्रेष्ठी, गोणीं हेमनाणकभृतां दृष्ट्वा श्रेष्ठिनीमाकार्याऽदीदृशत्–मुग्धे ! यदि खटकी सग्रहाऽभविष्यत्कथं प्रावेक्ष्यद्रासभः ?, अतः श्वाऽपि खरादिवेशे प्रत्यूह एव, वधूस्तु विजातीया बहिरलपिष्यत्, यन्मयोक्तं तत्तथ्यमेव, श्रेष्ठिन्यप्योमित्येव मेने ॥ इति पुण्याधीनहितप्राप्तिकथा ॥८॥

बुद्धिप्राधान्यं ९–यन्न सिध्यति शक्त्याऽपि,तत्साप्नोति धिया बुधः। उपरि ग्रन्थिकरण–युक्त्या चौरमहद् वणिक्॥ सुखोपायज्ञवणिक् ९

कोद्रवपुरे वीरङ्गः श्रेष्ठी, जाया तु माया नाम, कदाचिदन्धकारे निशायां सुप्तौ तौ दम्पती,निशीथे च तस्करः पाश्चात्यभित्तौ खातं पातयति, ज्ञातं श्रेष्ठिभ्यां, तथाऽपि भिया हक्कयितुं न शक्नुतः। अत्रान्तरे मुत्कलसिंहनामा तलारक्षः प्रत्यासन्नराजमार्गेण हिण्ड्या गच्छन् हयखरखुरपुटखाट्कारचारभटादिभिर्ज्ञातः,परिचितश्चायं श्रेष्ठिना,अतः कैतवादन्योऽन्यं वार्त्ताऽऽरब्धा दम्पतिभ्यां यदावयोः पुत्रमुत्पत्स्यते क्रमिष्यति च क्रमाभ्यां तदा मुत्कलसिंह ! इहागच्छेति समालपयिष्यामः,तं तु प्लुतप्रधानं शब्दं निशम्य समायातस्तलारक्षः,भाषितः श्रेष्ठी,आकृष्टानि बीटकानि, संभाषितस्तलारक्षो वणिजा–देव ! दीपकालोकस्तावदभङ्गुरस्तिष्ठति,उपलक्ष्य २ स्वमानुषेभ्यो बीटकानि दापयत, यावद् दत्तानि नामग्राहं भूरिभ्यः, सोऽपि चौरः परिपाट्या बीटकं मेलापकरुद्धत्वेन गन्तुमक्षमीभूतत्वाद् ग्रहीतुं लग्नः, श्रेष्ठिना भाषितं–किं तलारक्षपादाः ! अयमपि भवदीयः ?, तलारक्षः प्राह–नेति, श्रेष्ठिनाऽप्यूचे–अयमनेन द्वारेण समागतः संभाव्यते, कृतः सग्रहो भटैर्बद्धश्च, खातस्य दृष्टत्वात्, जातं प्रत्यूषं,गृहीतः कारायां चौरः तलारक्षेण,कृतमन्तुरिति श्रेष्ठिनः पश्यत एव नीतो वटशाखायामुद्बद्धश्च रज्ज्वा, रज्जुग्रन्थिस्तु गलकात्तिर्यग् वर्त्ततेऽतः कदाचिद् विच्छुट्यापि यायादिति धिया श्रेष्ठिना नगरारक्षोऽभाषि–नगररक्षाचकोर ! तावदसाकमयमाचारः पण्यादिकं तोलयद्भिर्ग्रन्थिरुपरि क्रियते, तलारक्षेणापि

ज्ञातो भावः, मा अयं जीवन् विच्छुटितः पुनः प्रत्यपकारं कुरुतामिति हि श्रेष्ठी कल्पयति, तथैव रज्जुग्रन्थिरुपरि कृतः, ततश्च मृतः पाटच्चरो, बभूव निःशल्यो वणिक् ॥ इत्युपायज्ञवणिक्कार्यसुखसाध्यताकथा ॥ ९ ॥

श्रीकथाकोषे ॥९॥

दीर्घमनोरथाकरणं १०—मनोरथान् प्रत्ययतां,कार्यं नश्यति मूलतः। केषाञ्चित्पुण्यहीनानां,सक्तुगड्डुकविप्रवत् ॥१०॥

बटुकथा१०

आनन्दपुरे माणवक एको युवा निःस्वो निष्पुण्यो निष्परिजनो भिक्षामात्रोपजीवी निरक्षरः शिखामात्रधारी प्रत्यासन्नकोपी निवसति। तस्यैकस्यां नवसक्तुकायाममावास्यायां भिक्षमाणस्य सक्तवो बहवो मिमिलुः, यावत्सायं भृतो गड्डुकः, तं च पादोपान्ते दत्त्वा सुप्तो बटुः, स्वापं स्वापं जागरितः कल्पयत्यन्तर्मानसं—यथा सक्तूनां पूर्णस्तावत्कुम्भः, द्रम्मद्वयस्यैते भविष्यन्ति, द्रम्मास्तु सप्त पुराऽपि ग्रन्थौ बद्धाः सन्ति, तैः समुदितैः करिष्यामि क्षुद्रहट्टिकाऽऽरम्भं, त्यक्ष्यामि लाघवकारिणीं भिक्षां, भवितारः शतं द्रम्माः, व्यवसायो हि धनागमप्रतिभूः, ततः प्रौढप्रौढतरारम्भयोगान्मिलिष्यति सहस्रं, ततश्चायुतं,ततः परिणेष्यामि विप्रस्य कन्यां, सा च शुश्रूषयिष्यति मां यावदपत्यानि नोत्पत्स्यन्ते, उत्पन्नेष्वपत्येषु निरादरा यदा मामवहेलयिष्यति तदैवं पादाग्रेण हनिष्यामीत्यतिरभसा घटमेवास्फोटयत्, गताः सक्तवः, संजाता चिन्ता फल्गुरिति॥ इति बटुकथा ॥ १० ॥

यावन्निर्वाहमाज्ञापनं ११—

यावदायाति निर्वाहं, आज्ञैश्वर्यं विवेकिना। तावदेव प्रयोक्तव्यं, श्रुत्वा तां तापसीं कथाम् ॥११॥

जटिलकथा ११ ॥९॥

चन्दनिकाग्रामे धनकनककणसमृद्धे शिवराशिर्नामा जटामौलिः,तस्य बहवः शिष्या बठरशिरोमणयो बहुभुजः,कुन्तीस्थाने कुती, लक्ष्मणस्थाने लाख, हनूमंतस्थाने हणूआ, परमेश्वरस्थाने शरफरा, धुन्धुकमारस्थाने ढुंढुणमार,युधिष्ठिरस्थाने जूठिला इत्यादि-

पाठपरायणास्ते, चतुर्मासीं वर्षारात्रौ स्थितो गुरुः सशिष्यः, भाद्रपदे वृष्टेरभावात् क्षेत्रान्नानि म्लायन्ति, यजमानः खेदमेदुरः कश्चिद्विज्ञपयति स्म-भगवन्! सस्यानि सीदन्ति जलाभावात्, गुरुराह-न खेदो धार्यः, अथ प्रभाते जलप्लुतानि धान्यानि प्रेक्ष्यसि, तुष्टो गच्छत्यथ यजमानः, गुरुस्तु निशि निजशिष्यैरासन्नसरोवरादगाधजलात् कुम्भशतैरानाय्य जलं क्षेत्रं सेचयति, प्रत्यूषे क्षेत्रं जलप्लुतं दृष्ट्वा प्रीतो भक्तिं करोति, एवं द्वितीययजमानक्षेत्रसिञ्चनं शिष्यैः,तृतीयतुर्यादिदिनेषु निर्विण्णाः शिष्या एकमतीभूय विममृशुः, तैरुक्तं-यः कथयति स वहतीति, लब्धमर्मा लोको गुरुं तत्याज॥ इति जटिलकथा ११॥

निश्शंकताफलं १२-निश्शङ्कः पुरुषः सर्वकार्येषु लभते फलम्। क्षत्रियस्यार्थलाभाय, दण्डाय वणिजः सुरः॥



कलिकाग्रामे साधिष्ठानो यक्षः एकः काष्ठमयो महाप्रमाणो लब्धमहापूजः प्रत्ययसारो वसति। तत्रैव ग्रामे निर्भयभीमवृत्तिर्व्याघ्रो नाम राजपुत्रः सकुटुम्बः,तस्यैव च प्रातिवेश्मिको वणिगेकः सिन्दूकरनामा सगृहो निःस्वः,तत्पत्न्योः सख्यं,एकदा क्षीणवृत्तिः क्षत्रियश्चिन्तयति-नास्ति कश्चिदुपायोऽन्यो, ग्रामासन्नोऽद्य यक्षः परिपन्थनीयः, कुठारमादाय कठोरधारं जगाम, यक्षान्तिकमेत्य सवीरं धृतो यक्षः कलाचिकायां, भाषितश्च-रे! देहि किञ्चिद्, अन्यथा कुठारेण त्वामिन्धनमेव करिष्यामि, भीतो यक्षः साक्षादाचचक्षे-मूढकगोधूमान् दाताऽस्मि श्वः, तावत्पत्नीकराङ्गुलीस्थया हेममुद्रिकया वृत्तिं कुर्याः। तुष्टो भटः, प्राप्तः स्वस्थानं, आगामिगोधूमाशया दिनवृत्तिं प्रारेभे, तदा तस्य गृहेऽदृष्टपूर्वां रसवतीं सर्पिर्बहुलां दृष्ट्वा वणिकपत्नी सखीं पप्रच्छ-किमद्य सखि! रङ्गोत्तरङ्गा यूयं?, तया यक्षस्वरूपं न्यगादि, सुष्ठूपायोऽयमिति मत्वा ययौ गेहं, जगाद पतिं-त्वमपि प्रातिवेश्मिकभटवत्साहसं कुरु, ज्ञापयामास तां कथां, गतो वणिग् यक्षान्तिकं सपर्शुः-दृष्ट्वा यक्षं शङ्कितः, तेन यक्षेण बद्धः, स आरार्टी मुञ्चति, मुञ्च मुञ्च

मामिति रोदिति, राजपुत्राय वित्रक्षिताय मद्देयं गोधूमकं दत्से तच्छुटसीति दण्डमादाय वणिग् मुक्तः, ऋणमपि कृत्वा तद्ददौ ॥
॥ इति सशङ्कनिश्शङ्ककथा ॥ १२ ॥



धैर्यधीमत्त्वफलं १३–धीरे धीमति निःशूके, देवा अपि हतौजसः। कैतवेन यदादिष्टं, तत् सर्वं देवताऽकरोत्॥

उज्जयिन्यां हालाहलो नाम द्यूतकारो मार्जाराक्षः स्थूलोष्ठोऽतिलम्बो रूक्षमूर्द्धजो वाचालो वितथवाग् वेश्यारतः प्रपाजलानां पिबः कान्दविकगृहचरो दण्डीखण्डधरः, सोऽन्यदा निशीथे वारवासिन्याख्यायास्तत्रस्थाया देव्या गृहमगात्, बुभुक्षाक्षामकुक्षिर्नैवेद्यमण्डकान् (दृष्ट्वा) देव्याः स्कन्धयोः पादौ दत्त्वाऽत्युच्चस्थानस्थदीपतैलेन सह मण्डकान् अत्ति, देवी क्रुद्धा, तं भापयितुं जिह्वामाचकर्ष, सोऽपि धीमान् निःशूको मुखस्थं अर्द्धचर्वितमण्डकपङ्कं देव्या जिह्वायां लगयामास, देवी शूकया जिह्वां पश्चान्मुखीं नापसारयति, किन्तु तदवस्थामेव हस्तमात्रां लम्बां समतिष्ठिपत्, गतः कितवराट्, सा जिह्वा तथैव, प्रातर्मिलितो लोक , चकितः, राजाऽऽजगाम च, महोत्पात इति कारणाद् बिभयांबभूव। आहूता विप्राः, प्रारब्धानि शान्तिकानि, हूयन्तेऽग्नयः, दीयन्ते दानानि, कार्यन्ते विविधजपाः, सा जिह्वा कराला तथैव, राज्ञा पुरे पटहो दापितो, घोषयाञ्चक्रे–यो देव्या विकृतामिमां चेष्टां निवर्त्तयति स हेमलक्षं लभते, आजगाम हालाहलः, पस्पर्श पटहं, निन्ये राजाऽन्तिकं, स्फूर्जयन् विज्ञपयामास–कर्त्ताऽस्मि तवेप्सितं देव!, अर्द्धमिदानीमेव देयस्य देहि, पश्चात्पाश्चात्यार्द्धं, अष्ट चारक्षान् मद्रक्षायै दिश, यथा नाशित्वा न गच्छामि, चक्रे तत् तथैव भूभुजा, प्राप्तो द्यूतकृद् देवीसमीपं, कर्णान्तिके भूत्वाऽचकथत्–यदि जिह्वां न व्याघोट्य पश्चान्नेष्यसि तदा ग्राव्णा त्वां भङ्क्ष्यामीति, भीता देवी, स्थिता स्वभावस्था, गतमशिवमिति राज्ञा तस्मै देयं दत्तम् ॥ इति द्यूतकृत्कथा ॥ १३ ॥

व्यन्तरच्छलना १४–नराणां वञ्चने कैव, कथा ? बुद्धिधरो नरः। देवानपि च्छलयति, व्यन्तरं वाणिजो यथा ॥

छेकवणि-कथा १४

कदलीपुरे करवीरश्रेष्ठी व्यवहारज्ञो विद्वान्, एकदाऽसौ विशिष्टकाष्ठनिमित्तं वनमेकाकी ययौ, यावत् सुन्दरतरं तरुं दृष्ट्वा छेदनायोद्यतः तावत्तद्वासी व्यन्तर एकः प्रत्यक्षीभूय सविनयमिव कृताञ्जलिर्जगौ–श्रेष्ठिन् ! मा मे स्थानभूतं द्रुमं छेत्सीः, अहं ते वाञ्छितं चिन्तामणिरिव पूरयिष्यामि, एकं तु वच्मि–यदा निर्देशं न दास्यसि तदा छलयिष्यामि, वणिगपि तथैवेत्युक्त्वा व्यन्तरेण समं गतः स्वसदनं, आदिष्टो व्यन्तरस्तेन–कारयोत्तुङ्गतोरणं धवलमन्दिरं, कृतं तत्तेन पुनः, पुनर्धान्यधनवसनधूपकर्पूरागुर्वाद्यानयनं समादिष्टं, तत्तदेवाकरोत् सुपर्वा, श्रेष्ठिना तस्य तद्वाक्यं स्मरता कर्त्तव्यान्तराभावान्नियुक्तः–पर्वतात्तुङ्गमेकं वंशमानयस्वेति, सोऽप्यानीतः, श्रेष्ठ्याह–यावदहं स्वकार्यं किमपि न कारयामि तावदिहारोहावरोहौ त्वया करणीयाविति श्रुत्वा जहास देवः, छलितोऽस्मीति नत्वा क्षमित्वा स्वास्पदतरुमेवाऽगात् ॥ इति छेकवणिक्कथा ॥ १४ ॥

प्रतिधूर्त्ताविश्वासः १५–धूर्त्तानां प्रतिधूर्त्तेषु, मा श्रद्धां दधतां बुधाः। गन्धर्वाय प्रपन्नोऽश्वो,न दत्तः शठभूभुजा ॥

धूर्तश्वरकथा १५

देवपुरे कुन्तपालो राजा वक्रहृदयः, तं सेवितुमन्येद्युः कोऽपि गाथको देशान्तरादागतः, निशि श्रुतिमूर्च्छनातानग्रामाभिरामं गीतं जगौ, राज्ञा प्रोक्तं–जात्यं तुरङ्गं लेयाः, तुष्टो, गतो, नित्यं याचते, न च लभते, ततो रोषादाह–देव ! किमश्वं न दापयसि ?, राजोवाच–त्वया किं कृतं ?, गाथकः प्राह–मया गीतगानं कृत्वा तव कर्णसुखमुत्पादितं, राजापि प्रत्युवाच–मयाऽपि ते कर्णसुखं कृतं, अद्यापि मूढ ! किं याचसे ?, शिरः कण्डूयित्वा प्राप्तः स्वस्थानं कलावित् ॥ इति धूर्त्तेश्वरकथा १५ ॥

खलाविश्वासः १६–खलवाक्प्रत्ययेनार्थं, सिद्धं निर्नाशयन्ति हा !। केचिन्नराधमास्तत्र,कन्थाविप्रो निदर्शनम् ॥

क्वचिन्नगरे दरिद्रो ब्राह्मण एकः पशुदेश्यः, कलहकारिणी भार्या, बहून्यपत्यानि, भग्ना वृत्तिः, शैवलित उदकोदश्चनः, शीर्णानि छर्दीषि, धूलीनिकुरम्बमयमङ्गणं स्नाय्वस्थिशेषं वपुः–"तद्गेहे मुशलीव मूषकवधूर्मूषीव मार्जारिका, मार्जारीव शुनी शुनीव गृहिणी वाच्यः किमन्यो जनः ?। क्षुत्क्षामक्कमघूर्णमाननयनैश्चोन्निद्रमुर्वीगतैः, कर्त्तुं वाग्व्ययमक्षमाऽपि जननी डिम्भैः समालोक्यते ॥१॥" अन्येद्युरसौ सिद्धपुरुषमेकं धनार्थी सिषेवे, तुष्टेन तेन षण्मासिक्या श्मशाने मासोपवासब्रह्ममौनप्रधानया क्रियया साध्यः साम्नायो मन्त्रोऽदायि, तं चासौ तथैव श्मशानेऽसाधयत्, प्रत्यक्षा देवताऽभूत्, ऊचे च–गृहाणेमां कन्थां, प्रातरसौ कन्था प्रस्फोट्यमाना रत्नपञ्चशतीं विकिरति, विवर्णेत्यमूं मा द्राक्षीः, परमं तत्त्वमिदं, गृहीतकन्थो विप्रः पुरप्रवेशे लोकेन जजल्पे–किं द्विजपते ! शिरसि तवेदं ?, सोऽपि देवदत्तां तां प्राख्यल्लोकाय, लोकोऽप्याह–श्मशानसत्केयं त्वया गृहे गृहीता, मृतकाय कल्प्या इत्यादिवाग्भिः खटखटापितेन तेन सा कन्था हृदयदुर्बलत्वादुज्झाश्चक्रे, गगनेनोत्प्लुत्य गता, स तु दीनास्यो गेहमगात्, गेहिन्यै तत्तथाऽऽख्यत्, गेहिन्या पादप्रक्षालनपात्रेण मूर्द्ध्नि हत्वा निष्कासितः॥ इति स्वार्थमूढविप्रकथा ॥ १६ ॥

स्त्रीवचनाकरणम् १७–न वर्त्तितव्यं धीरेण, स्त्रीनिदेशात् कदाचन। स्त्रीवाग्वशंवदत्वेन, तन्तुवायः क्षयं गतः॥

चन्द्रिकायां नगर्यां वीरणको नाम तन्तुवायः, स कदाचिद्विशिष्टकाष्ठकार्येणाटवीमाटीत्, महीरुहं महान्तमेकं छिन्दंस्तत्र वास्तव्येन व्यन्तरामरेण जगदे–भो पुरुष ! मा छिन्दस्तरुमिमं मम गेहं, तवाहमीप्सितं ददे, याचस्व यदृच्छया, इति देववचः श्रुत्वा महिलामुखो वराकः कुविन्दो ललाप–भार्यां पृच्छामि किं याचे ? इति, गतो गृहमसौ, ऊचे च महिलामपि–सुन्दरि ! एवमेवं व्यन्तरो मां भाषते किं प्रार्थये ? इति, तयाऽपि परामम‍ृशे, यतः–प्रवर्द्धमानः पुरुषस्त्रयाणामुपघातकः। पूर्वसञ्चितमित्राणां, दाराणां

सज्जनामपि ॥१॥ इदं ध्रुवं, ततोऽसौ श्रीसम्पत्तौ अन्याः स्त्रीः करिष्यति, रूपयौवनलावण्योदारा दारा भविष्यन्ति, ततो मामव-करिकामिव परिहरिष्यति गलितयौवनां,परिचितगुणद्वेषी लोको नवं नवमिच्छति,अतो वृत्तिमात्रमेव ममास्य चास्त्विति, ततश्चाऽऽ-लापितस्तया–प्रियतम ! अस्माकं किं महत्या राज्यादिश्रिया ?, पुरा यथास्थितेन शरीरेण त्वं दीनारद्वयमर्जेसि वानवृत्त्या,देवात्तु परि-तुष्टाद्विगुणधनार्जनाय द्विगुणं देहं याचस्वेति, सोऽपि मातृमुखवत् स्त्रीमुखस्तत्तथैवेति प्रतिपद्य सद्यस्तत्र गत्वा तं देवं द्विगुणमङ्गं ममास्त्विति ययाचे, तच्च तथैवासीत्, चचाल वनात् स सदनं प्रति, यावत् प्राकारद्वारमायाति तावदमिलल्लोकः, जगाद च–अहो ! आश्चर्यं, अहो विकृतमूर्त्तिः कुणपोऽयं कोऽपि नगरजनखादनेच्छया समागच्छति ततो हन्यतां हन्यतां, ततश्च यष्टिमुष्टिग्रावादिभिः क्षणाज्जघ्ने ॥ इति स्त्रीमुखकुविन्दकथा १७ ॥

धीकृता सिद्धिः १८–यत् सिद्ध्यति धिया पुंसां,तद् बलेन न सिद्ध्यति। गाथकोपद्रवो वाद्यनादेन वणिजा हृतः॥

केरलपुरे कुन्ददन्तः श्रेष्ठी वसति स्म, एकदा राज्ञः प्रसादपात्राणि गन्धर्वाः श्रेष्ठिगृहासन्नं महन्मन्दिरं निवासाय लेभिरे, तेऽपि द्विसन्ध्यमपि मन्द्रमध्यतारभेदेन स्वरसाधनां कुर्वते कारयन्ते च, भवति गगनाङ्गणव्यापी कोलाहलः, तदाकृष्टानि श्रेष्ठि-कुटुम्बमध्यात् पत्नीस्नुषापुत्र्यादीनि मानुष्याणि श्रवणेन्द्रियलौल्यान्मृगवद्गच्छन्ति त्यक्त्वा प्रस्तुतकार्याणि,–सुखिनि सुखनिधानं दुःखितानां विनोदः,श्रवणहृदयहारी मन्मथस्याग्रदूतः। रतिरभसविधाता वल्लभः कामिनीनां, जयति जगति नादः पञ्चमश्चोपवेदः॥१॥ हरति हरिणचित्तं का कथा चेतराणां ?, रमयति च महेशः को वराको गणेशः ?। सुखयति च शिशूनां किं पुनश्चामराणां ?,अहह जगति मध्ये कस्य सेव्यो न नादः ? ॥२॥ ततः श्रेष्ठिना चिन्तितं–अमी गातारो राजमान्याः, मया गायन्तः कथं निषिद्ध्यन्ते ?,

कुटुम्बमप्यसम्बद्धं, विटत्वसहचारिणी च गीतविद्या, तद् ध्रुवं योषितामासां धर्मविप्लवो भावी, ततोऽनागत एव जले पालिबन्धः श्रेयानिति, अथ कारितमेकं स्वमन्दिरासन्नं देवतायतनं, स्थापिता देवता, सोपायनेन गत्वा भेटितो भूपतिः, भूपतिनाऽपि दानबाहुल्यतुष्टेन श्रेष्ठिन्! किमयमियानुपक्षयो विधीयते ?, याचस्व किमपीत्युक्ते श्रेष्ठिनाऽभाणि-देव! मया कारितं देवतागृहं, तत्र त्रिसन्ध्यमपि विचित्रवादित्रनिनादभरितभुवनान्तरालं संगीतकं कारये यदि प्रसादस्ते भवेदिति, राज्ञोक्तं-स्वैरं वादय वाद्यानि, योऽत्र निषेद्धा तस्य रुष्टः कृतान्तः, तच्छ्रुतं तैर्गाथकैरन्यैश्च, श्रेष्ठी नित्यं तद्गीतश्रमकारेभ्यो भेरीभाङ्कारस्वनैः स्फोटयति तत्कर्णान्, उद्विज्य गृहान्तरमगृह्णन् गीतविदः, सुखेन जिजीव श्रेष्ठी। इति कार्यतत्त्वज्ञश्रेष्ठिकथा ॥१८॥ कार्यतत्त्वज्ञस्य १८

## सेवाफलादाननिन्दा १९-

सेवाफलमयच्छन्तः, स्वामिनो हास्यभाजनम्। भृत्यानामपि जायन्ते, शुभ्रदन्तचतुष्कवत् ॥१९॥ सेवकशत्रुस्वामिनः १९

बकुलपुरे भद्रशालचन्द्रशालौ द्वौ मन्त्रिपुत्रौ सह पांशुक्रीडितौ सर्वविद्यौ व्यवहारसारनिश्चयतृतीयलोचनौ स्तः, प्रथमोऽवसरं जानाति, द्वितीयस्तु दर्शितेऽवसरे वक्तुं वेत्ति शक्नोति च। अन्येद्युस्तौ क्षीणप्रायधनौ बहुधनाशयाऽमरपुरे देवानन्दनामानं राजानं सेवार्थमुपतस्थाते, राजानं प्रधानपुरुषद्वारेण ददृशतुः, सेवेते च यथाविधि, तयोः स्वामी न ददाति वसनखण्डमपि, केवलं धवलं २ दन्तचतुष्कमुद्घाट्य प्रमुदित इव हसति, खिन्नौ तौ, अन्यदाऽश्वक्रीडया राजा निर्ययौ, तौ पृष्ठस्थौ यातः, पृतना पश्चादस्ति, अश्वेन राजा भूमौ पातितः, भग्नं राजदन्तचतुष्कं, ततो यत्कथनीयं तन्निवेद्य तौ गतौ ॥ इति सेवकशत्रुस्वामिकथा ॥

यस्यालस्यमसामान्यं, तस्य देहेऽपि नादरः। मामागिराविभौ लोके, न श्रुतावग्निदीपने ! ॥२०॥

प्रच्छन्नवाच्यं यद् वाच्यं, नैव वाच्यं तदुच्चकैः। ततो ह्यनर्थवृद्धिः स्यादाचार्यप्रोक्तचूर्णवत् ॥२१॥
अपुनःकारिता यत्र, तन्मिथ्यादुष्कृतं शुभम्। अन्यत् पुनः कुम्भकारमिथ्यादुष्कृतवन्मृषा ॥२२॥
मा कस्यचिदवष्टम्भाद्वैरमारभतां सुधीः। वणिग्भिक्षाकदृष्टान्तान्न कश्चिद्विषमे सखा ॥२३॥

कुरुबिन्दपुरे कलहंसः श्रेष्ठी प्रभूतविभूतिभाजनभूतः, कदाचिदस्य सदनेऽनेकभक्ष्यपेयलेह्यसङ्कुला रसवती महोत्सवदिनवशान्निष्पन्ना, भुञ्जते जनाः, तदैकः कार्पटिको भिक्षितुमाजगाम, गृहपतिना पुरोनिविष्टेन पत्नी समादिष्टा—भिक्षामस्मै देहीति,सा भिक्षां लात्वा तदभिमुखं ययौ, स तु तामेव दिव्ययौवनलावण्यपुण्यावयवां पश्यन् भिक्षाग्रहणमपि व्यस्मार्षीत्, रे कार्पटिक! ममैतां दयितां प्रसारिताक्षः पश्यसि तत् किमिमां गृहीत्वा यास्यसि?, लब्धचैतन्यः स आचष्टे—एतां ते पत्नीं गृहीत्वैव गन्ताऽस्मि, गृहीत्वा गच्छन्तं मां निषेधयिष्यसि तदा तव गृहद्वार एव मरिष्यामि, कृतप्रतिज्ञो लङ्घितुमुपविष्टः, केनापि नोत्थापयितुं शक्यते, जातं लङ्घनं पञ्चदशकं १५, श्रेष्ठिना विमृष्टं—आसन्नमरणस्तावदसौ भिक्षुः, अथ कदाचिदयं कालधर्ममुपैति चेत् तदैतन्मरणप्रभवं पङ्क्त्युत्तारणादिकं स्वजना राजन्याश्च कुर्युः, तेषां चित्ताभिप्रायं ज्ञात्वा तेषां सदने गत्वा तत्पत्नीग्रहणनिश्चयं निवेद्य च यत्करणीयं तत्कुर्वे, ततस्तेषु केचिद्वैरिणः केचित् परविघ्नसन्तुष्टाः केचिल्लुब्धाः केचित् कोपिनः प्रलेपुः—श्रेष्ठिन्! मृतश्चेत् स तदा त्वं पङ्केरुत्तीर्ण एवासि, श्रेष्ठी प्राह—मम को दोषः?, ते किमपि न शृण्वन्ति, केवलं तदेव ब्रुवन्ति, तदभिप्रायं ज्ञात्वा तलारक्षमहामात्यादीनप्यगात्, तत्तथाऽऽचख्यौ, ते तु लुब्धा दण्डयितुमेवेच्छन्ति, अथासौ लब्धलोकमर्मा लोकं लक्षसङ्ख्यं संपिण्ड्य गृहे कार्पटिकमाललाप—प्रसीद, गृहाण मम जायामित्यार्पयत्, सोऽपि शान्तीभूयाऽऽचष्टे—सुष्ठु नम्रीभूतस्त्वं, अतो मे भगिनीयं ते पत्नीति

श्रान्त उत्थाय गत एव, कलहंसेन ज्ञातयो राजकीयाश्च भाषयाञ्चक्रिरे–मया लोकस्य तत्त्वं ज्ञातं–

वाङ्मात्रमैत्रीमधुरो जनोऽयं, न गूढकार्ये घटते सहायः। अनन्यसाध्यां जठरस्य यात्रां, साधुं जनं वा समुज्झन्ति धीराः॥१॥ लोको लज्जितः स्वं स्वं स्थानमगात्। श्रेष्ठिना चिन्तितम्–ज्ञानामृतोर्मितृप्तस्य, कृतकृत्यस्य योगिनः। नास्त्येव किञ्चित् कर्त्तव्य-मस्ति चेन्न स तत्त्ववित् ॥२॥ अतो गृहवासपरित्यागं कृत्वा निष्क्लेशं पदमाससाद ॥ इति वणिग्भिक्षाककथा ॥ २३ ॥

परद्रव्यानर्पणकृत् २४–परद्रविणमादाय, तस्य प्रत्यर्पणं खलाः। मनसाऽपि न चिन्तन्ति, यथा स स्वर्णकारकः॥ द्रव्यानर्पकस्वर्णकारः २४

एलापुरे नगरे कलाकेलिनाम स्वर्णकारः, चन्दनो नाम श्रेष्ठी, चन्दनस्य गृहे कदाचित् पुत्री जाता, तस्या आभरणघटनाय श्रेष्ठी तस्मै कलादाय जात्यहेमं पलप्रमाणमर्प्पयामास, श्रेष्ठी नित्यं याचते–हेमं देहि तद्भूषणं वा, स्वर्णकारस्तु ददामीति वदति, न तु स ददाति, यावज्जाता श्रेष्ठिनन्दिनी यौवनस्था, परिणिन्ये केनापि महर्द्धिना वणिजा, जगाम श्वशुरधाम, संपन्ना गुर्वी, तादृशी च पित्रा सगौरवमानीता वात्सल्यान्निजगृहं, कालेन सुतामसूत सा, श्रेष्ठी तद्धेम याचते, हेमालङ्कारो दौहित्र्याः कृते, स तु वाहयत्येव धूर्त्तः। एकदा रोषारुणलोचनः श्रेष्ठी प्रातर्विपणिनिषण्णं नाडिन्धमं गत्वा तत्तथा ययाचे, न चासौ प्रतिवचनं दत्ते, ततः श्रेष्ठी निष्ठुरमभाविष्ट–भोः! पुत्रीभूषणायार्पितं जाम्बूनदं दौहित्रिकाभूषणेऽपि न ददासि?, तच्छ्रुत्वा कलादसूनुस्तत्रोपविष्टस्तातं प्रत्यभ्यधात्–तात! त्वमपीदृशैः कापुरुषैरुत्सुकैः सार्द्धं व्यवहारं करोषि, न जानासि पुरुषपरीक्षां, श्रेष्ठिना बभाषे–पौत्रीभूषणार्थमर्पितं हेम दौहित्रीभूषणावसरे मया याच्यते, अहमुत्सुकश्चेत्तर्हि कोऽनुत्सुको य इयन्तं कालविलम्बं सहिष्यते?, कलादसुतेन कथ्यते स–अस्माकमियं स्थितिः पूर्वजेन यद् गृहीतं तत् सप्तमोऽपि सांतानिकः पुनर्नैव ददाति, राजकृतवधबन्धादिप्रसङ्गेऽपि विलम्ब

एव कार्यो दृढचित्तीभूय,न तु किमप्यर्पणीयमिति, तद्गिरं श्रुत्वा श्रेष्ठी कनकमृगतृष्णां मुक्त्वा गतः॥ इति लुब्धशठकथा ॥२४॥
संचायकक्लेशिता २५–भोक्तारोऽर्थस्य कार्पण्यसंचितस्यापरे नराः। सञ्चिता केवलं पापक्लेशपात्रं यथा वणिक् ॥

कुन्दकलिकायां नगर्यां कुरुबको नाम श्रेष्ठी महाकदर्यो धनेश्वरश्च रूक्षाङ्गो रूक्षवाग् रूक्षहृदयो मलिनाननः स्नानादिहीनः, तेन संचिक्ये भूरिहेममाणिक्यवज्रादि, तत् क्षितिक्षेपाय कदाचिद्वशीकृत्य स्वयमेकाकिना निशि बहिरारामे निन्ये,अभिज्ञानं कृत्वा निचख्ने भूमौ, उपरितने च समारितः स परिसरः, तथाऽपि मनसि भीतोऽसौ यदि पुनरासन्नशून्यदेवकुलस्थेन केनापि धबधबशब्दः श्रुतो भविष्यति, सम्यक् पश्यामीति तदैव देवकुलसमीपमुपससर्प, तत्र कार्पटिक एको वैदेशिकः आगत्य सुष्वाप, तेन निशीथे निर्जने निःशब्दान्तरे स शब्दः श्रुत एव, ज्ञातं च निधिक्षेपोऽत्र कस्यचिदिति,शब्दविधेयो,धब२शब्दलक्ष्यत्वात्,यावता च वणिगागच्छन् ददृशे तावता शैशवादारभ्याभ्यस्तपवनजरणोऽयं पवनं रुद्ध्वा परासुरिव पतित्वा तस्थौ, वणिजा च दृष्टौ नासां कर्णौ च छेदयित्वा श्रेष्ठी निश्चिन्तः स्वगृहमुपतस्थे, सुष्वाप, कार्पटिकोऽपि शनैरुत्थाय तद्धनं बद्धरुद्धमादाय तं प्रदेशं तथैव समारचय्य अविभातायां रात्रौ स्थानान्तरे निक्षिप्य किञ्चित्सहादाय वेश्यायाः सदनं गत्वा तद्धनं विलसन्नास्ते, मतः कियानपि समयः, कुरुबकश्रेष्ठीति नामाङ्कं मुद्रारत्नमेकं विक्रेतुं दुकूलपटीपिहितसर्वाङ्गो हेमकारहट्टिकामटाट्यामासे, तच्च कुरुबकेणापि गृहीतं करेण, दृष्टं नाम, चकितो मनसि, किं स एवायं यो मया नासाकर्णच्छेदनपूर्वं मृतत्वप्रत्ययान्मुक्तः?, ध्रुवं स एव मायावी पवनरोद्धा जीवन्नेवाऽऽसीत्, अर्थलोभात्तावतीं वेदनां ससाह, मदर्थं च ललौ, एतन्मुद्राप्राप्त्यन्यथाऽनुपपत्तेः, ततः श्रेष्ठिना चौर इतिकृत्वा गृहीतो ग्रहः, तेन जातो राजकुले वादः, आशिखं यावद्वाससा छन्नाङ्गेन कार्पटिकेनोक्तं–देव! वस्तु प्रति वस्तु गृह्यते किमेषाऽपि

चौरी वृत्तिः ?, राजन्यकेनोक्तं—किं त्वयाऽसौ वणिजे दत्तं ?, स सर्वमप्याह, तत्र व्यवस्थायां कृतायां पश्यत पश्यतेत्यादि गाढमभिधाय दुकूलं दूरे कृत्वा दर्शितं छिन्नं कर्णयुगं नासापुटं च, दृष्टं कारणिकैः, किं बहुना ?, यदि न रोचते तदा मदीयं वस्तु मम दत्तां, स्वं तु स्वयं लात्विति, तद्वचनमाकर्ण्य श्रेष्ठिनमाहुस्ते—किं करिष्यसि ?, श्रेष्ठिना दीर्घमुष्णं च निःश्वस्य जगदे—कृतं यत्कर्त्तव्यं, किमुच्यते ?, सर्वथा प्रतिकूलो विधिः, एवं वदत एवास्य कारणिकैरूचे—कार्पटिक ! गच्छ सुखं, भुङ्क्ष्व धनानि, श्रेष्ठी तु मूर्च्छन् रुदन् पतन् विलुठन् खं पश्यन् विलक्षः स्वसदनमगमत् ॥ इति कृपणकथा २५ ॥

सद्वाग्दीपबोधः २६—संशयध्वान्तमग्नानां, सद्वाग्दीपः प्रबोधकः। सोमदत्तेन विप्रेण, बोधितः श्रेष्ठिनन्दनः॥ वादी-प्रबोधः२६

कक्कोलिकापुरि नन्दिवर्द्धनः श्रेष्ठी, तस्य जिनदत्तः पुत्रः, परिणिन्ये विशुद्धकुलोद्भवां कन्यां, अन्यदाऽऽक्रान्तो नन्दिवर्द्धनो रोगैः, वैद्या अपि न चिकित्स्योऽयमिति तत्यजुः, श्रेष्ठ्यपि पाटलीपुत्रपत्तनवास्तव्यं सोमदत्तं बालमित्रं भूमिदेवमाहूयाय्य सत्कृत्य किञ्चिद् गृहसूत्रं भविष्यत्कालोपयोगि निधिभूदर्शनलक्षणं तेन सह मिलित्वाऽकार्षीत् ,वस्त्रादिभिः सत्कृत्य साश्रुदृशाऽनुव्रज्य विससर्ज। सप्तक्षेत्र्यामुवाप वित्तबीजं, यतः—उप्तं न सप्तक्षेत्र्यां यैर्न शीलं परिशीलितम्। भावतो न तपस्तप्तं, कुतः काङ्क्षन्ति ते सुखम् ?॥१॥ प्राणप्रयाणे प्रत्यासन्ने पुत्रं जिनदत्तमाकार्य्य रहः शिक्षामेवं ददौ—वत्स ! चलिता वयं परलोकाय, त्वं प्रकृत्या गुणवानसि तथापि एता मम शिक्षाः कर्णे कार्याः पालनीयाश्च,तद्यथा—दन्तैर्वृत्तिर्ग्रामे ग्रामे कार्या १,दत्तं न याचनीयं २, महिला बद्धा कुट्टनीया ३, मिष्टं भोक्तव्यं ४, सुखं सुप्तव्यं ५, ग्रामे ग्रामे गृहं कार्यं ६,गङ्गातलं खनितव्यं ७, वृत्तिदौःस्थ्ये सति पाटलीपुत्रपुरे सोमदत्तपार्श्वे गन्तव्यं ८,इत्येवं वदन् विपेदे। निष्पन्नान्यौर्द्ध्वदेहिकानि। जिनदत्तस्तु पितृवचनशिक्षां श्रुत्वाऽवधार्य च तत्तथैव निर्मि-

तत्रान् ॥ इति तत्त्वबोधिजिनदत्तकथा ॥ २६ ॥

अव्यवहार्यगुरुशिक्षणं २७--



गुरुमव्यवहारस्थं, हितवाचामगोचरम् । क्रौर्ययुक्त्या शिक्षयन्ति, धीरास्तापसयाज्यवत् ॥२७॥

चम्पकपुरे चकोरः श्रेष्ठी प्रगल्भमतिस्तापसभक्तः, कस्मिन्नपि पर्वण्यसौ सशिष्यं गुरुं निमन्त्र्याबूभुजत्, भुञ्जानेन तेन उदरंभरिणा स्फारशृङ्गारगोरोचनवर्णे लम्बकर्णे यजमानस्य द्वे दुहितरौ ददृशाते, उज्जजागारास्य मारविकारः, यजमानं शिष्येभ्यश्छन्नं जगौ–भो यजमान! के इमे स्त्रियौ?, स आह–मम पुत्र्यौ, तर्हि मह्यं देहि, याज्यः प्राह–गुरो! चिन्तितुमपि न युक्तं भवादृशां, किं पुनर्व्यक्तं वक्तुं?, गुरुर्ब्रूते–यदि न दास्यसि तदा त्वां निजमरणेन हत्यादूषितं करिष्यामि, देह्येव, नोत्तिष्ठाम्यन्यथा ध्रुवं, तस्य तं कुग्रहं दृष्ट्वा रहो गृहीत्वा गुरुं प्रोचे सः–भगवन्! न मे युष्मभ्यं किञ्चिददेयं, जनसमक्षं समर्पयन् जिह्रेमि, सम्प्रति नगरबहिःस्थं स्वं मठं गच्छ, अत्रासन्नाऽस्ति ह्रदिनी, तस्या अनुश्रोतसा मञ्जूषायां निवेशिते द्वे अपि निजे सुते श्वः प्रातः प्रेषयिष्याम्येव, नात्र सन्देहः, जगाम मठं कुण्ठमतिर्जटी, पश्चात्तेन यजमानेन मध्ये वानरीद्वयं क्षिप्त्वा मञ्जूषाऽनुश्रोतसा प्रेरिता तटिनीतटमटति स, दृष्टा मठस्थेन तेन, जहर्ष च, शिष्यान् प्रहित्याऽऽकृष्य सा मञ्जूषा मठान्तरानिन्ये, उवाच तान्–भो विनेयाः! किमप्यत्र मञ्जूषायां रहस्यवस्तु भविष्यति, तस्मादिमामपवरकमध्ये नेताऽस्मि, अपवरको गाढं द्रढनीयः, मद्वाचं विना नोद्घाटनीयौ कपाटौ, शिष्यैस्तथेति प्रतिपन्नं, कृतं च, गुरुस्तां मञ्जूषां गृहीत्वाऽपवरकान्तः प्राविशत्, ततो यज्जातं तत्स एव वेत्ति, तत्कृतवेदनापराभूतो, महता कालेनोद्घाटिते कपाटे, निस्ससार गुरुः क्षताङ्गो रक्तधाराप्रवाहविधुरः, पृष्ठतश्च ते कपिके, पपृच्छे शिष्यकैः–भगवन्!

किमेतत् ?, बलादपि तत्तथ्यमेवाभिदधे, शिष्यैरुक्तं–नास्ति दोषः, सुखसन्तुष्ट्या तिष्ठ, महता कालेन सज्ञाज्ञो जातः,यजमानेनाप्युपहासितः, अबोधि च शनैः ॥ इति निरङ्कुशगुरुदमनयजमानककथा ॥२७॥

निर्मर्यादनितम्बिनीकृत्यं २८—



शक्या केन वशीकर्त्तुं निर्मर्यादा नितम्बिनी। पतिरन्यायकारिण्या, धीबलात् किङ्करीकृतः ॥२८॥

विशालायां कोकिलो नाम गृहपतिः, तस्य मयूरिका नाम गृहिणी स्वैरिणी वैरिणी, सन्ध्यायां प्रत्यासन्नेषु दूरस्थेषु केषुचिद्गृहेषु भ्रामं२स्वगृहमेति, ततश्च कुप्यति पतिः, कलहायते–रे रे दुश्चारिणि! यदृच्छया चरसि?, मां न जानासि दुर्दमदमनं?, साऽपि प्राह–ज्ञातोऽसि सङ्ग्रामसहस्रबाहुस्त्वं यदेवं भर्त्सयसे मां, किं करिष्यसि त्वं ?, स्वच्छन्दं भ्रमिष्यामि, सोऽपि स्पष्टमभाषिष्ट–यद्यनस्तमिते भास्वति न स्वगृहमधिष्ठाय स्थास्यसि तदा गृहान्निष्कासयिष्यामि, साऽपि जगाद–एवमस्तु, ज्ञास्यते लग्नं, गतानि पञ्चषानि दिनानि, तथैव भ्रमन्ती साऽस्थात्, अथ रुष्टः पतिर्गृहद्वारं पिधायाऽस्थात्, रात्रेः प्रथमे यामे गते समायाता सा, द्वारं खटत्कारयामास, धवस्तु नोद्घाटयति रोषात्, चाटूनि वक्तुमारेभे–नाथ! नाश्रितेषु इयान् कोपः कर्त्तुमुचितः, कीटिकाया उपरि कः कटकारम्भः?, पुनर्नैवाऽपराधमाचरिष्यामि, प्रत्यासन्नसख्या सह प्रेमपरवशा कालमियन्तं वार्त्ताभिः स्थिता, न तु तव किमपि प्रतिकूलमाचरितवती, एवं लपन्त्यामपि तस्यां नोत्तरं ददौ। ततो बुद्धिबलेन गृहद्वारासन्नतरकूपिकायां तटस्थं महान्तं ग्रावाणं लोठयित्वाऽपातयत् सा, तच्छब्दश्रवणाच्चिन्तयति–ध्रुवं मदवज्ञातया तया कूपिकायां पतितं, हा! हत्याकारीति लोके निन्दिष्ये, तदा द्वारमुद्घाट्य कूपपतितपत्नीसमाकर्षणधिया किल दीपिकादिप्रक्रियामारभते यावत्तावल्लब्धलक्षा सा गृहान्तः प्रविश्य कपाटयुगं

निविडं दत्त्वा सुखं तस्थुषी, पतिर्यावत् कूपिकायां विलोकयति तावत्तया गाढस्वरेण भाषितोऽसौ-रे ! कूपिकायां नास्म्यहं पतिता, त्वमेव पतिष्यसि, यन्मम चिकीर्षुरासीस्तत्त्वैवाऽऽपतितं, यदि शूरोऽसि तदा पुनर्गृहमागच्छेः, मिलितो नगरजनः, तत्पुरस्तात्तद्दूषणान्युक्त्वा मयाऽस्या निन्दा न कार्येति भाणयित्वा गृहे प्रवेशयामास पतिं, सा यदृच्छया बभ्राम ॥ इति निर्मर्यादनारीकथा॥

## श्रद्धाजन्यो लाभः २९--

अप्रार्थितेऽपि स्याल्लाभो, नियतं श्रद्धया भवेत्। श्रद्धया विरहे लाभः, क्वास्ति वृद्धानिदर्शनात् ॥२९॥

श्रद्धाजन्यो
लाभः
२९

क्वचिन्नगरे श्रीवर्द्धमानस्वामी छद्मस्थावस्थायां वर्त्तमानः कयाचित् पुण्यवत्या मिष्टान्नैः प्रत्यलाभि, तदा च देवैः १२ कोटयो हिरण्यानां च ववृषिरे, देवदुन्दुभेर्निर्घोषः, चेलोत्क्षेपं गन्धोदकपुष्पवर्षं च सर्वं संजातं, इदं च सर्वं प्रतिवेश्मिन्या कयाचिज्जरत्या ददृशे, विममृशे च-धनलाभे सुष्ठूपायोऽयमिति, दिनेषु पञ्चषेष्वतीतेषु तया भिक्षार्थं पर्यटन् कश्चिल्लिङ्गमात्रोपजीवी आमन्त्र्य तैस्तैरन्नपानैः प्रतिलाभितुमारेभे, प्रतिलाभयन्ती च सा पुनः पुनर्गगनगह्वरमालोकते, पृष्टं च लिङ्गिना-भद्रे ! किमितस्ततः पश्यसि ?, साऽपि बभाषे सर्वं स्वरूपं, ज्ञातवृत्तान्तः स्मयमानः प्रोवाच-तर्हि मुग्धे ! गृहमध्यं प्रविश, यतस्तवानया श्रद्धया मम चानेनेदृशेन दुस्तप्येन तपसा वियतोऽङ्गाराः पतन्तः संभाव्यन्ते, यतः दुहा-वो साधु वो श्राविका, तूं भांड। थारा म्हारा योगसे पत्थर वरसे रांड ॥१॥" गतो लिङ्गी ॥ इति निःश्रद्धानकथा ॥२९॥

॥२२॥

## स्वामिचित्तानुवर्त्तनम् ३०--

स्वामिनो रोचते यद्यत्, तत्तदेवानुजीविनः। प्रमाणयन्ति वृन्ताकनिन्दकस्तोतृभृत्यवत् ॥३०॥

अचलपुरे कुलतिलको नाम राजा, तस्य च दानकल्पद्रोरनेके सेवकाः, तेष्वेको मन्त्री नीतिविदुरः सर्वशास्त्रपरिमलितमतिरस्ति, एकदा भोजनावसरे भुञ्जानस्य भूभुजः सूपकारेण सुपरिकर्मितानि वृन्ताकानि परिवेषितानि, तेन च सस्वदिरे, ततः स्वादुंकाराणि भुक्तानि, भुक्त्वाऽनन्तरं बाह्यमण्डपिकायां निषण्णेन राज्ञा वृन्ताकानि शश्लाघिरे–अहो ! वृन्ताकानामपूर्वः कोऽपि रसः, अतः परं किमपि नास्त्येव, मन्त्रिणाऽपि जगदे–स्वामिना सुष्ठ्वादिष्टं, सत्यं ईदृशान्येवैतानि, वेधसाऽत्र फलेष्वमृतरसो न्यासि, राजा रञ्जितः । समयान्तरे पुनः परिकर्मणासामग्रीवैगुण्यात् सूदेन पक्वान्यपि न रुरुचिरे, ततो भूपतिना तस्यैव मन्त्रिणः पुरो निनिन्दिरे–अमूनि धिग्, विरसानि, तेनापि तथैव निन्दितानि, राजा चमत्कृतः, तान्येव स्तुत्वा किं निन्दसि ?, मन्त्र्याह–देव ! नाहं वृन्ताकानां ग्रासं ग्रसे, किन्तु तवेति तव रुच्यरुची अनुवर्त्ते, राजा जगाद–सत्यं ईदृगेव सेवाधर्मः, यतः–"यश्चारुचाटुवचनोच्चरणप्रगल्भो, लोकाद्धनग्रहणकर्मणि मर्मविद्यः । यश्च प्रपूरयति पाणिमुपायनेन, प्रायः प्रियो भवति भूपतिमन्त्रिणां सः ॥१॥" इत्युक्त्वा प्रससाद दानं, विससर्ज ॥ इति चाटुकारकथा ३० ॥

स्वामिचित्तानुवृत्तिः

**उपकर्त्तरि नोपलम्भः ३१–उपकारकरं ज्ञात्वा, प्रीणीयान्न तु खेदयेत् । उद्वेजितेन श्राद्धेन, नोपालब्धो यतिर्यतः ॥**

प्रवालपुरे कलिङ्गदो नाम श्रेष्ठी, तस्य पञ्च पुत्राः–हरिषेणो १ देवः २ कुलनन्दनः ३ चन्दनो ४ वर्द्धमान५श्चेति, तत्र प्रथमः साधुशुश्रूषणातत्परः, एकदा तत्रागताः केऽपि सूरयः, तद्गच्छे बहवः श्रमणाः, तेष्वप्येकः सुगुणतमः, तस्य विश्रामणार्थं हरिषेणो नित्यमेति, अन्येद्युरस्थिमांसत्वग्रोमसुखां संवाहनां कुर्वाणे तस्मिन् मुनिः प्रकामं पिप्रिये, अतश्च इत्थं इति न व्याकरोति, प्रहर एको व्यतीयाय, पृच्छा तदुत्तरं च ॥ इति अतृप्तयतिकथा ॥३१॥

उपकारे प्रीतिः ३१

दाम्भिक-श्रावकः ३२

यतिविक्रायकः ३२-भ्रमन्ति दाम्भिकाः केचिददेवगुरुधार्म्मिकाः। परद्वीपादुपेतेन,विक्रीतौ वणिजा यती ॥३२॥

भृगुपुरे केचिदाचार्याः, तेषां गच्छो महान् बालग्लानशैक्षाकुलः, भृगुक्षेत्रे वेलाकूलात् तत्रागतं किमपि वाहनं, तत उत्तीर्णा लोकाः, तत्रैको वणिग् मायावी कर्णघृष्ट्याऽधीतश्रावकधर्मा मिथ्यादृष्टिरास्ते, सोऽप्यागात्, नगरान्तः भ्रमन् वसतिं प्रविष्टः, ववन्दे गच्छं, परिचयं च प्रारेभे, गच्छस्याभिमत इव जज्ञे, तत्रापि द्वौ क्षुल्लकौ भृशमावर्जयामास, प्रीतौ तस्य तौ, एकदा प्रवहणवार्त्तास्तेन प्रक्रान्ताः, क्षुल्लयोः प्रवहणदर्शनेच्छाऽजागरीत्, गुरूननापृच्छय तं खलं पुरस्कृत्य तौ गतावुपसागरं, तदा वाहनपूरणिकाऽवसरः, ध्वजपटाः प्रोत्तम्भिताः, सितपटस्ताडितः, पवनाः पूजिताः, तदा चायं वणिक् तौ क्षुल्लकौ दिदर्शयिषामिषेणोदधिबोहित्थमारोहयत् ,प्रेरितं यानं, क्रमेण प्राप्तं परतीरं, बब्बरकूले क्षुल्लौ तेन वणिजा कोलिकशालायां विक्रीतौ, ते हि कोलिका नृशोणितेन दुकूलानि साध्नुवन्ति, कोलिकेभ्यो बहुधनं गृहीत्वा गतो वणिक्। तक्ष्येते तीक्ष्णक्षुरैः क्षुल्लौ, आकृष्यते रक्तं, एवं जातौ अस्थिचर्मावशेषौ, गतो बहुः कालः, भवितव्यतावशात्तत्रागतेन भृगुक्षेत्रवास्तव्येन पूर्वपरिचितेन श्रावकेणोपलक्ष्य मोचितौ,आनिन्याते भृगुपुरं, सेवेते गच्छं, आलोचितप्रतिक्रान्तौ क्रियापरौ। गतेष्वब्देषु द्वित्रेषु स एव द्रोही वणिग् आगात् तोयेन, विज्ञाताबभूतां, निःसीही इत्यादिप्रक्रियापूर्वं समेत्य वन्दितुं प्रवृत्तः, ताभ्यां चोपालक्षि, आगतमात्रेण निमन्त्रितौ क्षुल्लौ यानदर्शनाय, ज्ञाततत्त्वौ च तौ ब्रूतः स्म-"दिट्ठं बब्बरकूलं दिट्ठाइं सव्व तुम्ह चरियाइं। अम्ने वंदसु सावय!, जे तुम्ह गुणा न याणंति ॥१॥" सर्वैर्ज्ञातः ॥ इति शाठ्यधार्मिककथा ॥३२॥

॥२४॥

अविमृश्य-कारी ३३

अविमृश्यकारी ३३-केचिज्जडधियः कार्ये, पौर्वापर्यं न जानते। पात्रपक्षद्वयात्पक्षे, घृततैले तपस्विना ॥३३॥

लक्ष्मीपुरे कोऽपि जटाधारी जाल्मः, तस्य विनेयस्तु तदधिकः, कस्मिन्नपि दिने गुरुः शिष्यमादिशत्-वत्स! धूपदहनमिदं गृहीत्वा गच्छ हट्टं, अस्यैकस्मिन् पक्षे तैलं घृतं च क्षिप्त्वा समागच्छ, तथेत्युक्त्वाऽविमृश्यकारी ययौ, भाषितो वणिग्-देहि मे घृततैले, अग्रे यज्जातं तत्सुप्रसिद्धमेव ॥ अपरामृश्यकारिकथा ॥३३॥

बहुभाषिफल्गुता ३४—



**यथा रुचिर्यथा पथ्यं, कार्यं कुर्यात् तथा बुधः। बहुभाषी जनः फल्गुस्तत्र श्रेष्ठी निदर्शनम् ॥ ३४ ॥**

कश्चन वणिक् सह बालेन पुत्रेण सवृषभश्चचाल ग्रामाद्ग्रामान्तरं, अन्तराले एको ग्रामः, तत्र पुत्र उत्तारितो वृषभात्, स्वयं चोत्तीर्णः, मा स लोकोऽवादीत्-वृषभपीडननिस्त्रिंशोऽयमिति, यावद् ग्रामान्तर्गच्छति तावल्लोको भाषते-अयं किमयमनड्वान् रक्षितो दुग्धं दास्यति?, कथं स्वयं नारोहसि?, पुत्रं वा नारोहयसि?, एवं श्रुत्वा वणिक् पुत्रमारोपयत्, तदा ग्रामलोको लपति-अहो! मूर्खो वृद्धः किमनेन शिशुना रक्षितेन?, स्वयं नारोहति, तदाकर्ण्य पुत्रमुत्तार्य्य स्वयमारुरोह, पुनर्लोकवचो यथा-अहो! निर्लज्जो निर्घृणो वणिक् पाल्यं बालं रोलयति, स्वयं नृपकुरिवारूढो याति। इति विविधवाङ्मुखरं जनं दृष्ट्वा वणिगन्तर्मानसं जगाद- "सर्वथा स्वहितमाचरणीयं, किं करिष्यति जनो बहुजल्पः?। विद्यते स न हि कश्चिदुपायः, सर्वलोकपरितोषकरो यः ॥१॥" ॥इति लोकाप्राधान्ये श्रेष्ठिकथा ॥३४॥

परोक्तिविश्वासदुःखं ३५—

**परोक्ते यस्य विश्वासस्तस्य दुःखं न दुर्लभम्। वृद्धावचनविश्रम्भात्, क्षुद्राभिस्तस्करो हतः ॥३५॥**

श्रीवर्द्धमानपुरे क्वचिद्गृहे श्वश्रूवध्वौ स्तः, कदाचित्तत्र चौरबाहुल्यं, नित्यं श्वश्रूवध्वौ जागृतः, तमसि गृहे प्रविष्टस्तस्करः, मन्दं २ पदौ ददत् भित्तिकोणे तस्थौ, तं च विदाञ्चक्रतुस्ते स्त्रियौ, विदित्वैवं च सुप्ते २ वार्त्तयतः, श्वश्रूराह–ऋजुस्त्वं कियद् ? वत्से ! जानासि ? सम्प्रतीह पुरि कोट्टपालाभावाच्चौराः प्रबलाः स्वैरं भ्रमन्ति,एतच्च त्वमपि वेत्सि, ततश्च कथं निजं नागोदरभूषणं न गुप्ततरे स्थाने न्यस्तवती ?, त्वयाऽत्र संमुखे पिचुमन्दे न्यस्तं सर्वं स्वकीयमस्मदीयं च हेमादि, अत्रारूढ चौरस्य कियान् विलम्बो भवेत् ?, इति श्रुत्वा तस्करस्तं निम्बद्रुममारोहति स्म,तत्र च चिराद्विद्यते मधुजालं,तत्र स्थिताः सरघामधुमक्षिकाः,ताः सहसोड्डिग्यिरे, उड्डीय तस्याङ्गे लग्नास्तुदन्ति, ततोऽस्रतीक्ष्णैर्मुखैर्वेष्टयन्ति, समन्ततो वहति रक्तः प्रवाहः, तदाक्रान्तः पतितोऽधश्चौरः, जातो धबकः, उक्तं मध्येस्थितया वध्वा–कोऽयं पतितः ?, स एव, वृद्धया व्यक्तमभाषि–कोऽपि किं द्रुमे हेम निक्षिपति ?, चौरो गतः ॥ इति परवाक्प्रत्यये चौरकथा ॥३८॥

प्रथमाडम्बरव्यर्थता ३६–प्रथमाडम्बरं दृष्ट्वा, न प्रत्येयं विचक्षणैः। अत्यल्पपठितं कीरं, ज्ञं मन्ये कुट्टिनी यतः॥ आडम्बर व्यर्थता ३६

सिन्दूरपुरे चन्दनको विप्रः, स शाठ्यनिधिः, शुकमेकं चतुष्पथे विक्रीयमाणं गृहीत्वा गृहमानीय श्लोकगाथादोधकादि पाठयितुमारेभे, न च किञ्चिदप्यागच्छति, निष्प्रज्ञत्वात्, भवन्ति हि तिर्यक्ष्वपि तारतम्येन प्रज्ञाभेदाः, ततो विप्र एतावदेवापीपठत् यथा–वीसइ विश्वा, एतत्तु शुकस्याप्यायातं, यौवनस्थं सुरूपं शुकं सपञ्जरं चतुष्पथे विक्रयार्थमानिनाय, तत्रागतैका कुट्टिनी, दृष्टस्तया शुकः, भाषितो द्विजः–किं विक्रीणीषे शुकमेनं ?, स प्राह–एवमिति, कुट्टिन्याह–किमपि पाठितोऽस्त्यसौ न वा ?, द्विजो जगाद–एनमेव पृच्छ, ततो जल्पितोऽनयाऽयं–वत्स ! कीर ! किं मातृकां पठितुं जानासि ?,कीरो धीरोक्त्या ललाप–वीसइ विश्वा,

प्रहृष्टा नर्तकीमाता, असौ वावदूको मम सदने भोगिनां रञ्जको भावीति कदाशया तं शुकं भूरिणा हेम्ना विक्राय, तुष्टो द्विजः, गता सा मन्दिरं, भोजितः शुकः, मध्याह्नानन्तरं भाषयामासे कीरस्तया, तथैव वक्ति, विप्रवञ्चिता खिन्ना सा ॥ इति प्रथमाडम्बरकथा ॥३६॥

दीर्घक्रिये खेदः ३७-किं न खेदयति प्राज्ञमत्यन्तचिरकारकः ?। श्रुत्वा वधूश्वशुरयोरालापं प्राघुणा ययुः ॥३७॥ दीर्घक्रिये खेदः ३७

पोतनपुरे कामपालो वणिक्,तस्य मल्लो नाम सुतः, वल्लालिका नाम वधूः, साऽत्यन्तमालस्योपहता, न किमपि वेलायां गृहकर्म करोति, करोति वा किञ्चित् तदपि मनसि ज्वालं २, न तु सहर्षं, एकदा कल्यायां विभावर्यामैयरुः प्रभूताः प्राघूर्णकाः, कृतः श्रेष्ठिना स्वागतसत्कारः, उपविष्टाः सर्वे, तदा चाभ्युदयते भानुमान्, त्रस्यन्ति तिमिराणि, वाद्यन्ते प्रासादेषु वाद्यानि, प्रवर्तन्ते व्यवहाराः, तदा च श्रेष्ठिना स्नुषा भाषिता—वत्से ! वधु ! दीपकं कुरु, साऽप्यूचे करिष्यामि, प्राघूर्णकाः प्रोचुः—श्रेष्ठिन् ! जम्बूद्वीपे प्रत्यासीदति दीपकरणस्य कोऽयमवसरः ?, श्रेष्ठ्यपि प्राह—न जानीत यूयमस्मद्वध्वा व्यवहारं, इयं च सम्प्रत्युक्तं दीपं सन्ध्यायां करिष्यति, ततोऽर्वागपि कथयन्नेवास्मि यदा तदा करोति, इति श्रेष्ठिवचः श्रुत्वा प्राघूर्णकैर्विमृष्टं—ईदृश्याः प्राधान्ये कदा देवार्चनं कदा भोजनं कदा ताम्बूलं ?, तस्मात् पलायनमेव श्रेय इति विचिन्त्य शीघ्रं शिरः कण्डूयन्तो ययुः, न पुनराययुः ॥ ॥ इति चिरकारिस्नुषाकथा ॥३७॥

असत्यात् कलहः ३८—

असत्यवादिभिः पुंभिरपाये को न पात्यन्ते ?। कारितौ कलहाक्रन्दौ, गृहिणोः शठवाग्मिना ॥३८॥

अवन्त्यां महाधनः श्रेष्ठी, स नव्यनव्यकथाप्रियः, तस्य भार्या मदनिका, एकदा तत्र धूर्त्तानां पेटकमायासीत्, तेषां परस्परमियं व्यवस्था-एकैकेन जनेन शेषाणां सर्वेषां भोजनं दातव्यं वारके २, प्रभातारम्भे एको धूर्त्तो विप्रवेषः श्रेष्ठिगृहमागच्छत्, श्रेष्ठिनमाललाप-भो महाभाग! देहि मे सकुटुम्बाय भोजनम्, "निक्षिप्य कर्षकः क्षेत्रे, प्रवर्द्धयति सम्पदः। न्यासीकुर्वन् पुनर्गेहे, नाशमायाति मूलतः ॥१॥" इत्यादि तद्वाचमाकर्ण्य श्रेष्ठ्याह-अहं तस्मै भोजनं ददामि यो मेऽपूर्वां कथां कथयति या पूर्वं नाभूत् न भवति न भविष्यति च, तादृशीं कथां कथयितुमसमर्थो धूर्त्तो निवृत्त्य स्वपेटकं प्राप्तः, आचख्यौ च धूर्त्तानां पुरः सर्वं स्वरूपं, तन्मध्यान्निष्पन्नधूर्त्त एकः समायातः, उपविष्टः श्रेष्ठिनः पुरः, ऊचे च-श्रेष्ठिन्! अद्भुतमेकमत्रैव नगरे सम्प्रत्येव दृष्टं यथा दशपुरुषवाह्यं वृन्ताकीफलमेकं पञ्चभिर्लोष्टिकैर्लभ्यते, पत्रशाकहट्टिकायां प्रकटितमस्त्येकेन नरेणेत्यपूर्वां वार्त्तां श्रुत्वा द्रष्टुं दधाव वणिक्, गच्छता च स गृहरक्षणे नियुक्तः, तदा हि तस्य पत्नी निकटे सरसि जलाहरणाय गताऽभूद्, गृहं शून्यं, धूर्त्तो रक्षति, ताम्बूलं चर्वति, आगता क्षणेन श्रेष्ठिगृहिणी, पतिमपश्यन्ती तं च नवीनं पश्यन्ती पप्रच्छ-कस्त्वं?, स च गृहपतिः क्व गतः?, धूर्त्तो बभाषे-अहं वैदेशिको भोजनार्थी श्रेष्ठिनः समीपमाजगाम, यावदहं सूक्तादिना रञ्जयामि तावदागता मत्तैका नितम्बिनी, तया सह चिरं वार्त्तयंस्ताम्बूलं स्वादयन्नस्थात्, सा च तं क्वापि गृहीत्वा गता, तत्प्रकीर्णकमिदमिह ताम्बूलमिति स्वताम्बूलमदर्शयत्, रुष्टा गृहिणी जलघटं प्रस्फोट्य पप्रच्छ-केन पथा स पापो गत इति, सोऽपि तमेव पन्थानं श्रेष्ठिक्षुण्णं कथयित्वा प्राहिणोत्, दधाव सा, ददर्श भर्त्तारं तादृशवृन्ताकादर्शनादितस्ततो भ्रमन्तं, शून्यास्यं दृष्ट्वा च चुक्रोश-रे पारदारिक! किं भक्षितद्विको मूषिक इव भ्रमसि? इत्युक्त्वा निर्द्धमनपङ्केनाताडयत्, सोऽपि तां, कोऽपि यदि ब्रूते-किमेतद्?, रुदती तं बभाषे, साऽपि क्षुद्रा लपति

तानि २ दुर्वचांसि, श्रेष्ठिनोक्तं–कथं यत्तद्भाषसे ?, साऽप्याह–त्वमेवं स्वैरी दुरात्मा, मम तेन वैदेशिकेनोक्तं–परस्त्रिया हृतो गत इति, श्रेष्ठिना शपथशतैः प्रत्यायिता सा, भाषते च–धूर्त्तवाचाऽहमेवं चैवं च भ्रान्तः,त्वमपि भ्रान्ता, खरंटितौ स्तः,पङ्काद्युत्सारणाय सरसि स्नानाय गतौ, दृष्टौ च स्नातौ दूरात्तेन तौ गृहगवाक्षस्थेन, अत्रान्तरे ग्रामादागता श्रेष्ठिनो भगिनी सफरिकरा, तद्गृहं प्रविशन्ती च न भ्रातरं न च भ्रातृजायां पश्यति, ततः शठमप्राक्षीत्–क्व गृहस्वामी स्वामिनी च ?, स ललाप–तयोः स्वजनेषु कोऽपि वल्लभः प्रमृतः, तज्जलाञ्जलिदानाय तौ जलाशयमगातां, पश्यत शुचा, शोकेन एवं जलपात्रं स्फोटयन्तौ तौ गतौ इति गृहस्वामिनीभग्नं तमेत्र कुम्भं दर्शयामास। "असत्यमपि सत्याभं,भाषन्ते शठबुद्धयः। उच्चं नीचं समेऽप्युच्चैर्व्यग्ज्ञुश्चित्रकरोत्तमाः ॥१॥" प्रत्येति स सा ऋज्वी,स्थिता च सशोकमूकाननाब्जा,मुहूर्त्तेन चागमतां तौ दम्पती जलक्लिन्नकेश(काय)वसनौ,तथाविधौ दृष्ट्वा शोकं निश्चित्य गले तयोर्लग्ना रोदिति प्राघूर्णिका, तावपि रुदतः, बहुं कालं यावद्, रोदं २ सर्वैः पृष्टं परस्परं कारणं, यावत्सर्वत्र कुशलं, तावद् धूर्त्तं कोणके उपविष्टं हसन्तं विलोक्य श्रेष्ठिना ऊचे–भोः! किमेतत्ते चरितं?, प्रथममहं वृन्ताकवार्त्तया विप्रलुब्धः, भार्या तु मामकीना मच्छीलविप्लवकथनेन विप्रतारिता, भगिनी तु शोकाक्रन्देन खेदिता, धूर्त्तः प्राह–श्रेष्ठिन्! भोजनार्थिनो वयं, ऋजुपद्धत्या त्वं किमपि न ददासि,अद्भुतां कथां पृच्छसि,चमत्कृतो वणिक्, सर्वान् धूर्त्तानबूभुजत्, सर्वमेभिः सिद्ध्यतीति परिभाव्य, भगिनीं च व्यसृजत् ॥ इति मृषावादे धूर्त्तकथा ॥३८॥



### जडचिरविमर्शवृथात्वं ३९—

जडश्चिरं विमृश्यापि, विदधात्यसमञ्जसम्। अरालवालिताऽनड्वच्छृङ्गान्तः कं न्यधाज्जटी ॥३९॥

वक्रवलितयोर्वृषभशृङ्गयोर्मध्ये भरटको मस्तकं चिक्षेपेत्युत्तरार्धार्थः ॥३९॥

यत्तद्भाषिणोऽपि पुण्यात् सिद्धिः ४०—



यत्तत् प्रजल्पतः कार्यसिद्धिर्भवति पुण्यतः। कडुआ-बडुआ-सोहीभाषणे श्रेष्ठिचन्द्रवत् ॥४०॥

पुष्पपुरे चन्द्रः श्रेष्ठी, स प्रकृत्या वदान्यो महाजनप्रियः कारुणिको जैनमुनिसेवाहेवाकी, तत्रैव पुरेऽरिमर्दनो राजा, प्रजानां पाता, एकदा तत्र पुरे द्वौ भ्रातरौ राक्षसौ कडुआबडुआनामानौ एका च तद्भगिनी सोहीनाम्नी उपतस्थिरे, संमिलिताश्च गृहे २ मानुषाण्यधिष्ठाय रोगमुत्पाद्य धातून् अदन्ति, अथ म्रियते लोको वराकः, राजाऽपि कृच्छ्रेण पीड्यते, अन्यदा नृपेण समादिष्टं—यः कश्चिन्मम नगरे कारणं सम्यग् ज्ञात्वा तत्प्रतीकारमाचरति तस्य स्वकीयं भाण्डागारं मुत्कलं कारयामि, तच्च नृपवचनं तत्रोपविष्टेन श्रेष्ठिना चन्द्रेणापि शुश्रुवे, आजगाम श्रेष्ठी निजं धाम, श्रेष्ठिना च गतदिने तिलाः शिशूनां सुखभक्षिकार्थं दत्ताः, तान् ते भक्षयन्ति भ्रमन्ति च स्वैरं, अत्रान्तरे च श्रेष्ठिकुटुम्बभक्षणार्थं समाजग्मुर्द्वारे कडुआबडुआसोहीकाः, पुण्याधिष्ठिते तस्मिन् सद्मनि प्रवेष्टुं न शक्नुवन्ति, सहसा विलोकयन्ति तु प्रवेशावकाशम्। इतश्च मध्यापवरकस्थः श्रेष्ठी बालकेनैकेन बभाषे—तात! कडुकाः कर्कराकुलाश्चैते तिलाः कथं भक्षतां न यान्ति ?, ततः श्रेष्ठी सरोषः परुषमाह प्राकृतभाषया—कडुआ बडुआ! सोही खाहि इति पुनः पुनरुच्चैः स्वरं, एतच्च वचनं बहिःस्थैस्तैः शुश्रुवे, न तु बालकवचनं, बालो हि मन्दवाक् वृद्धस्तु तारस्वरः, श्रुत्वा च पर्यालोचितं मिथः—अहो! आश्चर्यमदृश्यरूपतयाऽऽगतानां देवजातीयानामस्माकमागमनं नाम च जानाति, ततोऽयं त्रिकालदर्शी कश्चिदनुमीयते, अन्यथा मन्त्रशक्त्यादिना निग्रहीष्यति, एवं श्रेष्ठिपुण्योदयादात्मभयव्यथितास्ते सहसा समेत्य पादयोर्लग्नाः, रूपमदीदृशन्, ऊचिवांसश्च—

कथमस्मान् विगोपयसि ?, ते वयं कडुआबडुआसोहीनामानस्तव दासाः, मा स्मोच्चैर्भाषिष्ठाः,एवं श्रुत्वा वीरपारम्पर्यं ज्ञात्वा शठतया हसन्नगादीत्–न मुञ्चामि वो जीवमानान्, पुनः पुनस्तेऽनुनयन्ति,ततः श्रेष्ठिनाऽभाषि - एकदा राज्ञे दर्शयिष्यामि वः,पश्चान्मोक्ष्यामि, अभयं वः, दक्षिणहस्तं दत्त्वा नीता राज्ञः पार्श्वं, भाषिताः, दर्शितं तद्रूपं राज्ञे, प्रेषिताः, सर्वे चमत्कृता राजाद्यास्तच्छक्त्या, जातो मुत्कलोऽर्थकोशः, स्तौति स्म, निर्भयीकृतस्तेन लोकः, प्रससार शुभ्रं यशः ॥ इति पुण्योत्कर्षाद्वाक्प्रभावोद्भेदे कथा ॥४०॥

अतात्पर्यवाचि हास्यं ४१—

कार्यतात्पर्यमज्ञात्वा, ये वदन्ति विदां पुरः । ते हासपात्रं तेषां स्युर्यथा स भगिनीपतिः ॥४१॥



केलिवर्द्धने पुरे मलयकेतुर्नाम गृही निरक्षरशेखरः फल्गुभाषी, स चासन्ने वेलापुरे नगरे परिणीतः, कदाचित् पत्नीं ग्रहीतुं श्वशुरकुलमायासीत्, तत्र स्नानभोजनविलेपनवसनादिभिर्गौरवितः, तस्य च शालकाः पञ्च सन्ति महागीतज्ञाः, भगिनी तु तेषां सविशेषं नादस्वादज्ञा, अतिक्रान्ते दिनद्वये तैः शालकैर्मन्त्रितं–अयं भगिनीपतिर्वर्णान् वेत्ति न वेति परीक्षामहे, श्वः पञ्चमरागमालपिष्यामः, एवञ्च श्रुतं स्वस्रा, ततो ज्ञापितो भर्त्ता, तेन मर्मविदा गीतगानानन्तरं पञ्चम इति, द्वितीयदिने छट्ठ, जहसुस्ते, ततस्तत्पत्न्या लज्जमानया पुरो भूत्वा धान्यश्रीरागप्रथमाक्षरोपलक्षणार्थं स्थाली समुत्पाट्य दर्शिता, ततो जाल्मशक्रेण बभाषे–भोः! भोः! पूर्वमविमृश्योक्तं, नायं षष्ठो रागः, किन्तु तउलडउ, सर्वे हसन्ति, कुतस्त्वया विविदे ?, तेन प्रोचे–भवतामेव भगिनी समाचष्टे, पश्यत२ सङ्केतयन्ती दृश्यते, ज्ञाततद्भावैः सविशेषमुत्प्रहसितः–अहो नादविद्यातुम्बरुर्भगिनीपतिः ॥ इति हास्यत्वे कथा ॥

अतिलोभे शृंगदत्तः ४२—

अतिलोभो न कर्त्तव्यो, लोभं नैव परित्यजेत्। अतिलोभाच्छृङ्गदत्तो, वधूभिश्चिक्षिपेऽर्णवे ॥४२॥



रोहणाभिधं नगरं, तत्र श्रृङ्गदत्तः श्रेष्ठी, कार्पणिकोऽधमश्चतुर्णां पुत्राणां स्वामी, ३२ हिरण्यकोटयः, त्यागभोगरहितः। "दत्तेऽसौ न सुतान् स्थातुं, सदने धनलोलुपः। निःसत्त्वं न वधूनां च, प्रवेष्टुं नार्थिनस्तथा ॥१॥ अहर्निशं कदर्योऽपि, दत्ते यो दानपञ्चकम्। आदौ कपाटद्वितयं, ततो दत्ते भयार्गलम् ॥२॥ कपोले हस्तकं दत्ते, शिथिलीभूतकन्धरः। दुर्वाक्यं पञ्चमं दानं, स किं दाता न वर्ण्यते? ॥३॥" म्लेच्छगेहमिवास्पृश्यं चण्डालकूपवत्त्याज्यं तस्य मन्दिरमासीत्, इतश्च सर्वविद्याविशारदा योगिन्येका गगनाध्वना श्रेष्ठिनं द्वारे दृष्ट्वा मध्येऽगात्, वधूभिः प्रणम्य साऽप्रच्छि—किमस्माकं श्वशुरो मृतो यत्त्वं मध्यमुपागमः?, त्वयोक्तं—द्वारस्थिते तस्मिन् समेताऽस्मि, तर्ह्यस्मासु कृपा कार्या, करौ योजयित्वा ताभिरुक्तं—जीवलोकदर्शनेच्छाऽस्त्यस्माकं, तद्वच्मः, हृष्टा सती सा चतसृणां तासां साधारामाकाशगामिनीं विद्यां विततार, तस्यां गतायां ता नार्य्यः सश्रृङ्गारा काष्ठाधारेण सुवर्णद्वीपं ययुः, तत्रेन्द्रप्रमुखान् देवान् निरीक्ष्य रम्भानृत्यमपि निरैक्षंत,निशाशेषे ताः स्वस्थानं पुनराययुः। एवं तासां मन्त्रबलात् प्रयान्तीनां प्रतिदिनं मुख्यकर्मकृत्तच्चरित्रं विदाञ्चकार, सोऽप्यन्यदा दिने सन्ध्यायां तत्काष्ठमध्ये विवेश तदाश्चर्यविलोकनाय,तासु तत्र गतासु काष्ठमध्यान्निर्गत्य स्वर्णेष्टिकाद्वयं लात्वा दारुकोटरे तत्पूर्वमेव स्थितः, कृतकृत्यास्ता ववलिरे, सोऽप्येत्य हृष्टात्मा सुष्वाप चरमयामिन्यां, अर्थोन्मादेन गर्वितः श्रेष्ठिन्याऽप्याहूतो नोत्तरं स ददौ, ततः श्रेष्ठिन्या व्यचिन्ति—असावर्थप्राप्त्या समदः? किं वा केनापि रोषितः? उत केनचित् सङ्केतितः?, इति विमृश्य तत्समीपे गत्वा मायावचांसि न्यगदत्, सर्वं कारणं पप्रच्छ, तन्मायावचनैर्भिन्नो मत्तवन्मर्मतुल्यानि वधूकृत्यान्यचीकथत् सः, निशायां शुकवत्तद्वाक्यात्काष्ठकोटरे प्रविश्य स्नुषावृत्तान्तमालुलोके स मलीमसः,

स्वर्णेष्टिकाभिः काष्ठस्य कोटरं भृत्वा ताभिः सह चचाल, तद्भारं वोढुमक्षमाः परस्परमूचुः—मा खेदन्तु, निजं नगरं नेदीयः, एतन्मुच्यतां, कल्ये गृहीष्याम इति ता व्याजह्रुः, इति निशम्य भृङ्गदत्तो मृत्युभीतोऽवदत्—मा मुञ्चत स्नुषाः! काष्ठं, श्वशुरोऽन्तः स्थितोऽस्मि, ततो विशिष्य तच्चरित्रं जानानास्तत्काष्ठं सर्पकुम्भवत् समुद्रे तत्यजुः। सिद्धकार्याः स्वगेहे त्यागभोगाद्यैर्वासराः पुण्यभासुरा अनैषुस्ताः इत्यतिलोभकथा ॥४२॥

## वाणिज्यादधिकं भाग्यं ४३—

**वाणिज्यपौरुषधियां, भाग्यमेवाधिकं भवेत्। चतुर्णां सुहृदामत्र, दृष्टान्तः श्रवणप्रियः ॥४३॥**

वैजयन्तं नाम नगरं, तत्र विद्याधरो नृपः, तत्पट्टराज्ञी मृगावती, तत्कुक्षिभूः प्रद्युम्नः, स च सचिवाऽऽरक्षकश्रेष्ठिपुत्रैः सह चतुर्दश विद्या अधीते स्म, तेऽधीयानाः परस्परं निविडां प्रीतिं बबन्धुः, दशभिर्वर्षैर्विज्ञातशास्त्रार्थास्ते यौवनमासेदुः। अन्यदा नृपपुत्रस्तानवादीत्—भोः! ममैका बुद्धिर्निशम्यतां—"षोडशाब्दः सुतोऽश्नाति, यो रमां जनकार्जिताम्। स स्वेन जननीं स्वीयां, किं न कामयते जडः? ॥१॥ जायाकटाक्षभल्लीभिर्ये विद्धा यौवनोदये। त्यज्यन्ते धर्ममोक्षार्थैर्जीवितैरिव ते नराः ॥२॥ तदन्यदेशगमनं, कृत्वा विद्याप्रभावतः। आनीयते धनं भूरि, जीवत्सु पितृषु स्वयम् ॥३॥" एवं विचिन्त्य स्वजनान् वञ्चयित्वा नगरान्निर्जग्मुस्ते। "प्रद्युम्नः पथि तानूचे, ब्रूत विश्वेऽस्ति किं शुभम्?। वाणिज्यं पौरुषं बुद्धिं, ते शशंसुः कुलक्रमात् ॥४॥" प्रद्युम्नस्तु भाग्यमेवाधिकं मन्यते, उक्तवाक्यपरीक्षार्थं चतुर्णां भोजनमेकैकेन देयमिति (निर्णयं चक्रुः) प्रथमेऽह्नि श्रेष्ठिनन्दनः कस्मिंश्चित् पुरे कस्यापि श्रेष्ठिनो विपणौ निषण्णो, निजकलाभिस्तं रञ्जयामास, स्ववेश्मनि मित्रसहितो भोजितो, द्रम्माणां ५०० पञ्चशती वितीर्णा,

द्वितीयेऽह्वयारक्षः कस्मिन् ग्रामे शत्रुधाटयुपद्रवभयातुरं लोकं स्वबलेन रक्षयामास, मत्प्रसादेन सुखं तिष्ठन्तु लोका इति चाब्रवीत्, ग्रामीणैरुपकारिणो मित्रावृतस्य तस्य गौरवात् सहस्रपञ्चकं दत्तं, सर्वं भोजनादि संवृत्तं, तृतीयेऽह्नि सचिवसुतो नगरीमध्यं प्रविवेश, तत्र राजसभायां सचिवान् विडम्बयन्तं भूमिपतिमपश्यत्, तेन पुरीलोकाः पृष्टाः–कोलाहलो महान् किमिति प्रवर्त्तते ?, ते तच्चरित्रं कथयामासुः–मूळामात्यकरणाय बुद्धिकाष्ठमदान्नृपः, किं तत् ?, योजनायामकासारगर्भे स्तूपोऽस्ति, तस्मिन् तटस्थितेन येन पाशः क्षिप्यते स एव सचिवोत्तमः क्रियते, तच्छ्रुत्वा सदा प्रयान्ति ते,उत्तरं दातुमसमर्था अत्रागत्य कोलाहलं कुर्वन्ति,अथ तेनोक्तं–अपरः कश्चिचेत्करोति नृपादिष्टं तदा पृच्छ्यतामसौ राजा मन्त्रिमण्डलं च–अभाणीद्भूपतिः पृष्टो, यः स्यादेवंविधो नरः। कुवंशजोऽपि हीनोऽपि, स मे राज्यधुरन्धरः ॥१॥ सोऽपि भूपालं प्रणम्य तत्र गत्वा कीलिकादिप्रयोगेण स्तम्भं पाशेन बबन्ध, राजा सन्तुष्टो मन्त्रिपदवीमदात्, जग्राह, बहुमूल्यानि रत्नानि तदाऽस्मै ददौ, भोजनवस्त्रताम्बूलादि सर्वं जातं, ततश्चत्वारश्चेलुः, व्यजिज्ञपन् भूपपुत्रं चतुर्थेऽह्नि ते–भवद्भाग्यमस्मभ्यं भोजनं प्रदत्तां, तच्छ्रुत्वा तान् पुराद् दूरे विमुच्य नगरद्वारासन्नदेवसद्मनि गत्वाऽशेरत सः। "अनाथास्तत्पुरे पूर्वं, चत्वारो राजमन्त्रिणः। पट्टहस्तियुता नित्यं, भ्रमन्तः सन्ति सर्वतः ॥१॥ यस्मै कस्मै वनगजो, राज्यं दास्यति रागवान्। स नरो राज्यभोक्ताऽस्तु, लोकानां परिपालकः ॥२॥ वासरे सप्तमे कुम्भी, तद्देवसदनं गतः। कुम्भनीरेण प्रद्युम्नमभ्यषिञ्चद् यथाविधि ॥३॥" सचिवाद्यास्तं प्रणेमुः, जीयान्नृपोऽयमिति बन्दिनः पेठुः, नीत्वा पुरान्तर्जयाशिषा सिंहासने तं निवेशयामासुस्ते, प्रद्युम्नोऽप्यपराह्णे तान् सुहृदो दुष्टमानुषैः ससंभ्रममानाय्य जजल्पाऽलीककोपनः–"अरे ! भवच्चतुर्थेन, विनाशो मत्पुरे कृतः। निरागसो भवन्तोऽपि, तेन स्युरपराधिनः ॥१॥ मनोवाक्कायवन्नाथ !, संपृक्ताः सत्रयो वयम्। न कोऽपि करणा-

रिर्नंस्ते प्राहुर्भयमीरवः ॥२॥ रे व्यंसकाः! व्यलीकोक्तीस्त्यक्त्वा ब्रूत यथातथम्। नो वा शिरांसि छेत्स्यामि, सर्वेषामपराधिनाम् ॥३॥" भूपोक्त्या दीनाननास्ते बुद्ध्याद्यैः सगर्वा अपि धिया मूढाः संवृत्ताः, इत्थं बहुविधालापैस्तैः तं तदा न विदाञ्चक्रुः,क्षणेनैकेन भद्रासनात् समुत्थाय प्रद्युम्नस्तान् सुहृद आश्लिष्यत्, वयस्यानां नगराणि ददौ। "एवं भाग्यकथां श्रुत्वा, कुरुध्वं धर्ममद्भुतम्। येन सर्वाणि वस्तूनि, देदीप्यन्ते प्रदीपवत् ॥१॥ ॥ इति भाग्योपरिकथा ॥४३॥

### देवीयक्षवंचको वणिक् ४४—

त्रिदशा अपि वञ्च्यन्ते, दाम्भिकैः किं पुनर्नराः? । देवी यक्षश्च वणिजा, लीलया वञ्चितावुभौ ॥४४॥

देवपुरे कुलानन्दः श्रेष्ठी, मदनकलिका श्रेष्ठिनी, पुत्रो नास्ति, अतस्तन्नगरकृताधिष्ठानायाः सप्रभावाया देव्याश्चामुण्डायाः कृतमुपयाचितं श्रेष्ठिन्या—यदि मे त्वत्प्रसादात् पुत्रो भावी तदा लक्षत्रयमयीं पूजां तुभ्यं ढौकयिष्यामीति, जातः क्रमेण पुत्रः, भर्त्रे कथितमुपयाचितं तत्, तेनापि युक्तमिदमिति भणता लक्षेण २ निष्पन्नं पुष्पत्रयं हैमं सरत्नं घटितं, सपरिजनेन गत्वा पूजापूर्वं तत्पुष्पत्रयं देव्या भालेऽनु भुजयोश्च किल पूजायै न्यस्तं, श्रेष्ठिना स्वस्य पत्न्याः शिशोश्च शेषापदे गृहीतं, यथास्थानं च जग्मे शठमौलिमूलिना। देवी विलक्षा सती सहियडनाम्नो मित्रस्य देवस्याग्रे मनोदुःखं निवेदयितुं गता, न्यवेदयच्च—यथा देव! तेन कुलानन्दनाम्ना वणिजाऽहमेवं पुष्पाणामर्पणेन युक्तिपूर्वं ग्रहणेन च वञ्चिता किं करोमीति?। सहियडोऽपि सदुःखं जगौ—त्वं समर्घं छुटिताऽसि, शृणु यथाऽहमनेन कदर्थितोऽसि, पूर्वमस्य वाहनमन्तर्जलधि प्रवासितं, गतं,कोऽपि नाम्नाऽपि न श्रूयते,ततोऽसौ मामेत्य महिषं ते दास्यामि बोहित्थसमागमादिति प्रत्यपीपदद्, आनीतं च तन्मया स्वशक्त्या, आययुर्वर्द्धापनिकाः, उत्सवोऽस्य

गृहे, यावत्प्राप्तं क्षेमेण वहित्रं, विक्रीतं, वस्तुलाभोऽप्येवं, मया याचितोऽसौ स्वप्ने,असावपि तरुणं महिषमानीय तद्गलरज्जुं मम गले बबन्ध, वादित्राणि भेरीतुन्दिलादीनि युगपद्वादयामास, त्रस्तः कासारनन्दनश्चिरमरण्यवास्तव्यचरत्वात्, मां स्वेन सह रज्जुना घर्षयन् आचकर्ष यमवाहनः, ममाङ्गे चन्द्रिकास्ताः किलाद्यापि नो शान्तिमायान्ति, निःशूके च नाहमपि प्रभवामि, तस्मात्त्वं मा स्म रुदः, महद्भाग्यं ते, नाद्यापि किमपि विनष्टं, याहि स्वास्पदं,किं नाश्रौषीः, यतः–"कोऽर्थान् प्राप्य न गर्वितो ? विषयिणः कस्यापदोऽस्तं गताः ?, स्त्रीभिः कस्य न खण्डितं भुवि मनः ? को नाम राज्ञां प्रियः ?। कः कालस्य न गोचरान्तरगतः ? कोऽर्थी गतो गौरवं ?, को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् ?॥१॥" इत्यादिना प्रबोधिता गता देवी। इति वञ्चकश्रेष्ठिकथा ॥४४॥

अविचारकनृपः ४५–विचारयति कस्तत्त्वमविचारपरे नृपे। राजशालोऽपि राजोक्त्या,शूलायामधिरोपितः ॥४५॥

अविचारे राजश्याल-शूला ४५

श्रेष्ठिनो गृहे चौर एकः खात्रं पातयति, तस्योपरि भित्तिर्निपतिता,प्रातश्चौरमात्रा राज्ञोऽग्रे वार्त्ता कथिता,राज्ञा श्रेष्ठी आहूतः–हे श्रेष्ठिन्! तव भित्त्या चौरो मारितः, श्रेष्ठिना निवेदितं–सूत्रधारेण विरूपा भित्तिर्विरचिता,एतावता सूत्रधारोऽप्यानीतः,राज्ञोक्तः–भवता भित्तिरियं केन हेतुना विरूपा चक्रे, सूत्रधारेणोक्तं–राजन्! तस्मिन्नवसरे मम दृष्टिपथे श्रेष्ठिवधूः समेता,मम मनस्तत्र गतं, ततो वधूरानीता, राज्ञा पृष्टा–त्वं सूत्रधारस्य भित्तिं कर्त्तुकामस्य बहिः किमर्थं निःसृता ?, तया प्रोचे–क्षपणकस्य चरिकारापणार्थं,ततः क्षपणकोऽप्यानीतो, राज्ञा पृष्टः–त्वं किमर्थं तत्रायातः ?, तस्योत्तरं नागच्छति,राज्ञा विचार(आदेश)श्चक्रे–भोः पुरुषाः! एनं शूलायां ददत, ते तत्र गृहीत्वा तं गताः, अग्रे शूलिका ह्रस्वा स दीर्घः, व्यावृत्त्य ते नृपं विज्ञपयाञ्चक्रुः--यत् स्वामिन्! शूला ह्रस्वा स दीर्घः, किं कुर्मः ?, राज्ञा विचारः कृतः–यः शूलाप्रमाणो भवति स एव नगरमध्ये विलोक्य शूलायां दीयतां, ते तदाज्ञप्ता नगरमध्ये

परिभ्रमन्तो राजश्यालं तत्प्रमाणं पश्यन्ति, तं गृहीत्वा शूलायामारोपयन्, स राज्ञोऽत्यन्तं वल्लभः, भोजनावसरे तं विना न भुनक्ति, तत्सर्वं मन्त्रिभिरुक्तं, राजा स्वमनसि खेदं कृतवानिति सम्बन्धः॥ इति इत्यविचारकथा ॥ ४५ ॥

व्यवहारज्ञप्राधान्यं ४६—

विद्याभिरनवद्याभिरपि कार्यं न सिध्यति। व्यवहारज्ञता नो चेत्, चत्वारोऽत्र निदर्शनम् ॥४६॥



अष्टापदपुरे कुशलशेखरो राजा, सुबुद्धिः सचिवः, चन्द्रः पुरोधाः, कमलगुप्तः श्रेष्टी, चतुर्णामप्येषां प्राज्ञाश्चत्वारः पुत्राः सन्ति, ते पृथक्पृथक् पण्डितैर्भूमिगृहेऽध्याप्यमाना एकमनसो विद्यायां दक्षत्वमापुः, प्रथमं राजपुत्रः पञ्चाङ्गलक्षणविचक्षणः मन्त्रिसूनुरष्टाङ्गायुर्वेदविदुरः पुरोहितसुतः षड्दर्शनतर्ककर्कशप्रज्ञः श्रेष्ठिसूनुर्बीजग्रन्थफलग्रन्थादिभेदभिन्नज्योतिषनिस्तुषधिषणः, पठितोत्तीर्णाः परीक्षाशुद्धाः पण्डितजनपूजनग्रहिलाः सुखेन तिष्ठन्ति, इतश्च राज्ञा पर्षदि अभिदधे—विद्या गरीयसी लोके, नानाशास्त्रपु(रस्कृता। दिनं सर्वं वहन् भागं निर्विद्योऽस्ति खरस्तुषान्)॥१॥ अथ मन्त्री गम्भीरं मधुरं तथ्यं मितं प्रोवाच—स्वामिन्! सत्यमीदृगेव, विद्या गरीयसी लोके, परं व्यवहारं विना न किञ्चित्, यतः—"करोति व्यवहारज्ञो, लीलया यत् प्रयोजनम्। न तत्क्लेशसहस्रेण, क्वचिद्विद्याजडो जनः ॥१॥" पुनः—काव्यं करोतु परिजल्पतु संस्कृतं वा, सर्वाः कलाः समधिगच्छतु वाच्यमानाः। लोकस्थितिं यदि न वेत्ति यथाऽनुरूपां, सर्वस्य मूर्खनिकरस्य स चक्रवर्त्ती॥२॥ अन्यच्च—देव! पठनाद्व्यवहारज्ञत्वं, यदि न प्रत्येति स्वामी तर्ह्यभिनवपठिताश्चत्वारोऽमी कुमाराः क्वापि कार्ये नियुज्यन्तां,तदाकर्ण्य विशांपतिराहूय तान् चत्वारो गदति स्म—भो वत्साः! इतः प्रत्यासन्ने नागरपुरे द्विसहस्रप्रमाणं हेम गृहीत्वा व्रजत, तेऽप्याहुः—आदेशः प्रमाणमिति, अनडुहि भोजनोपकरणानि शम्बलं

च निक्षिप्य चत्वारस्ते प्रस्थिताः, गतास्तं नगरं, स्थिताश्चतुष्पथे, ज्योतिषी बलीवर्दरक्षार्थं स्थितः, तार्किको घृतमानेतुं वर्त्तुलकमादाय घृतहट्टं गतः, वैद्यस्तु शाकाहरणाय पत्रशाकहट्टिकां पर्यटितः, लाक्षणिकस्तु भक्तनिष्पत्तये स्थाल्यामधिश्रयण्यादीनि कर्त्तुमुपचक्रमे, यस्तत्र ज्योतिषी तस्मिन् यूथभ्रष्टमृग इवेतस्ततो विलोकयति पश्यतोहरेण च्छोटितोऽनड्वान्, (ज्ञातं)क्षणार्द्धेन, किन्तु खटिकामाकृष्य लग्नं गणयितुं प्रवृत्तः, लभ्यो वा न वेति तावद्गत एव वृषभः, स्थितो दीनाननो दैवज्ञः १, तार्किकस्तु घृतं वर्त्तुलकस्थं पश्यन् पात्राधारं सर्पिः ? सर्पिराधारं पात्रं ? इत्याधाराधेयसम्बन्धनिर्णयकौतुकी पात्रं यावन्नामयति तावद् घृतमखिलमगलत्२, वैद्यस्तु वातलमिदं पित्तलमिदं श्लेष्मलमिदमिति विवेकात् तानि२ व्यञ्जनानि परिहाय निम्बपत्रभारिकां त्रिदोषघ्नीमानैषीत्, वैयाकरणस्तु पच्यमाने ओदने कलकलायमानायां स्थाल्यां तमव्यक्तं शब्दं श्रुत्वा परामृक्षत्–हन्त रूढयौगिकमिश्रभेदात् त्रिधा शब्दाः, तत्र रूढा आखण्डलादयः, यौगिकास्तु नीलकण्ठभूधनादयो, मिश्राः पुनः परावृत्त्यसहा गीर्वाणसन्निभाः, अयं तु कलकलशब्दः स्थालीजोऽपशब्द इति रुषा स्थालीमेव खण्डशो बभंज, यावच्चत्वारो वनस्था इव, इदं सर्वं प्रच्छन्नैर्नृपपुरुषैरीक्षित्वा नृपाय निवेदितं, चत्वारोऽपि विगुप्य स्वं स्वं गृहमैयुः, ध्वनितमनसा राज्ञा मन्त्री सत्कृतः, ते चत्वारो व्यवहारं ग्राहिताः, सर्वव्यापारपरायणतां निन्यिरे ॥ इति अव्यवहारज्ञविद्वत्कथा ॥४६॥

भाग्यबलीयस्त्वम् ॥४७॥

आकस्मिको महान् लाभो, नृणां भाग्योदये भवेत्। खादामि खादामि गिरा, विप्रेणोपार्जिताः श्रियः ॥४७॥

गोर्व्वरपुरे हलसेनो नाम ब्राह्मणः, आढ्यूनो निर्भाग्यो जडबुद्धिः कुवाग् दीनः कुरूपो दरिदेन्द्रियश्च, तस्य कृपणा चण्डी

बहुमग्नः कमिला कृत्तिका नाम भार्या, सा राध्नोति चन्द्रबिम्बाभिधां रब्बां सन्ध्यायां, आसन्ध्यं भिक्षितकणेभ्य एव तन्निष्पत्तेः, नित्यं रब्बाभोजनान्निर्विण्णो विप्रो, न शक्नोति पुरस्तस्याः वक्तुं, अन्येद्युः परिवेषितायां रब्बायां द्विजो जगाद–अहं न खादिष्याम्यमूं, ततः सा कौणपीव राक्षसीव कुपिता काष्ठमयीं दर्वीं तद्घातायोद्यमयामास, तद्भयादसौ नष्टो, गच्छति, साऽपि दर्वीहस्ता, महतीं वेलां यावत् पृष्ठे दधाव, पश्चान्निवृत्त्य गृहमाजगाम, ब्राह्मणस्तु ध्यानात्तामन्वायान्तीमेव भीतो विदन् प्रविष्टस्तन्नगरकोट्टपरिखायाः पृथुलाया गभीराया मध्यं,अस्तमितो रविः,संपन्नं मुष्टिग्राह्यमन्धतामसं,आगच्छति निद्रा, सुप्तस्तत्रैव पतित्वा हलसेनः, परिमलिता निशीथिनी, परिशिष्यते घटीचतुष्टयं, तदा च लुण्टाकाः केऽपि रात्रौ तत्पुरे चौरीं कृत्वा तत्रैव परिखायामागताः, ते च भृशं बुभुक्षिताः सर्वे, चिरकाललङ्घनत्वात्, तेषु पुनरेकस्य चौरस्य शम्बले नालिकेरमस्ति, तत्स्फोटयितुं पाषाणं विलोकयन्तस्तस्य दृष्टौ पतितं विप्रस्य शिरः, तमोवशात्तदेव पाषाणं कल्पयित्वा तदुपरि तेनास्फालितं नालिकेरं, तेन घातेन जागरितो विप्रश्चिन्तयति–ध्रुवं सैव मम भार्या रब्बाया अखादनेन रुष्टा दर्वीहस्ता मामामात्, मामेवं दर्व्या जघानेति, ततः सहसा प्रललाप तारस्वरं यथा–खादामि २, विप्रेण रब्बां खादामि कथं मां मारयसि हे पत्नीति धिया गदितं, चौरैस्तु ज्ञातं राक्षसोऽयं कश्चित्,लोप्त्रं तद् तदवस्थं मुक्त्वा प्राणभयात्तस्कराः पलायिषन्त,क्षणार्द्धेन प्रादुरास विद्रुमपुञ्जमञ्जुलः प्रातः सन्ध्यारागः, द्विजो यावत् पश्यति तावन्नास्ति सा दुष्टकुटुम्बिनी, केवलं वस्तूनां पोट्टलिकाः स्फुरन्ति पुरतः, यावच्छोटं २ पश्यति तावद्रजतमहारजतप्रवालमुक्ताफलहीरवीरकर्पूरादीनि वस्तूनि महेभ्यगृहार्हाणि समालुलोके, तथैव बद्ध्वा समादाय स्वगृहमाजगाम, आलाप्येतया संमुखोपविष्टया व्याघ्र्येव दारुणया जायया–रे! क्व गतोऽभूः?, किमर्थं मम सद्मागतोऽसि? केनाऽऽहूतो?, गच्छ शीघ्रमित्यादि, भूमिदेवोऽप्य-

गादीत्–भद्रे! गतास्ते दिवसा येष्वहं तव दासवन्निर्भर्त्सनीयोऽभूवं, साम्प्रतं श्रिया धनदमदहरः कृतो दैवेन, तथाहि–पश्येदमीदृशं कनकादीति प्रत्येकमदीदृशत्, तां श्रियं दृष्ट्वा हृष्टा तुष्टा जीव आदिश इत्यादिवादिनी तमेव विप्रं दैवतवदाराराध ॥ इति सहसाऽर्थलाभे कथा ॥४७॥



गृहिणीक्लेशोद्वेगः ४८—

कलहिण्या गृहिण्या भो!, के के नोद्वेजिता जनाः। साऽत्रागतेति श्रुत्वैव, त्यक्त्वा पात्रं गतोऽमरः ॥४८॥

केतकपुरे फोगशिवो नाम ब्राह्मण आजन्माऽपठितो दरिद्रः,तस्य भार्या कलहशीला काणा कुरूपा कुटिला कृपणा कलङ्किनी वाचाटा निर्दया सक्रोधा अशौचा मर्म्मभाषिणी,भर्त्तुः स्नानान्नपानादिचिन्तां न करोति,उदम्भरिरेव केवलं,भिक्षून् आक्षिपति बालांस्ताडयति, देवगुरूणां नामापि न जानाति, तद्गृहासन्नद्रुमे झोटीङ्गव्यन्तर एकः कृतावतारोऽस्ति, तस्य द्रुममूले सा महेला फेलामुत्सृजति, कोकूयते च कलहेषु, अतो निर्विण्णो व्यन्तरस्त्यक्त्वा तं तरुं देशान्तरं गतः। फोगशिवोऽपि भार्यादुर्विनयदारिद्र्ययोर्ग्रीष्मसमयदावाग्न्योरिव योगमसहिष्णुर्नशित्वा देशान्तरमधावत्, ग्रामाद्ग्रामान्तराणि पर्यटन् महानगरस्यैकस्य सविधे वाटिकायां पथश्रान्त उपविवेश सान्द्रद्रुमतले, स तु व्यन्तरस्तत्रास्ते, तेन सम्यग् निरूप्योपलक्ष्य भाषितश्छायारूपेण वपुषा–भद्र! फोगशिव! त्वं मां व्यन्तरं जानीहि, फोगशिवः प्राह–को व्यन्तरस्त्वं? कुतस्त्यो वा?, व्यन्तरो बभाण–त्वद्गृहासन्नद्रुमव्यन्तरोऽहं, त्वद्भार्याक्रूरकलिफेल्युच्छिष्टिभ्यां खिन्नो नष्टोऽस्य पुरस्यारामे स्थितः, कालं क्षिपामि, यदा ग्रासेच्छा स्यात्तदा यमपि तमपि नरं वा नारीं वा गृह्णामि, भुक्तिं लभे, त्वं कथमायातोऽसि कथय, स प्रवक्ति–यथा त्वं तथाऽहं, तत एकयैव पातकिन्या भीतो भ्रमामि, व्यन्तरः

सकृपं साह—कथं भोक्ष्यसि ?, द्विजः प्रोवाच—यथा त्वं भोजयिष्यसि तथा भोक्ष्ये, व्यन्तरोऽगादीत्—उत्तिष्ठ, अन्तर्नगरं श्रेष्ठिनः शालिभद्रस्य सुतं ग्रहीष्यामि, तत्र त्वं मन्त्रवादायोपतिष्ठेयाः, द्रम्मपञ्चशतीं याचेथाः, पुनर्मा लुभः, त्वन्मन्त्रवादमिथ्याडम्बराद्धि तमहं त्यक्ष्यामि, चेत्तदा सुष्ठु स्यात्। एकदा तेनैव व्यन्तरेणान्यः कोऽपि प्रधानबालको जगृहे, द्विजो दध्यौ—ध्रुवं स एव व्यन्तरोऽत्रापि विलग्नो भविष्यति, एवं च संभाव्य गतस्तत्र, प्रारब्धो मन्त्रवादो जवनिकान्तरे, व्यन्तरः स्फुटं जगदे, एकदाऽऽतिथ्यं दत्तं ते, पुनर्लुब्धो मामुच्चाटयितुमागतोऽसि ?, हनिष्यामि त्वामिति मुष्टिमुद्यम्योत्तस्थौ, द्विजः शठः प्रजगाद—नाहं त्वां लोभादागां, किन्तु ज्ञापयितुं, सा द्विजी दुष्टाऽऽगतेति, श्रुत्वेदं किमायातैव सा ?, हहेति भयान्नष्ट्वा देशान्तरं गतः, ब्राह्मणः पात्रोज्जीवनद्रविणं प्राप ॥
॥ इति कलहकारिपत्नीकथा ॥४८॥

## अनुदिनं फलदं कपालं ४९—

कपाल तारतम् ४९

केचित् फलन्त्यनुदिनं, कार्यसारकपालवत्। वाङ्मात्रसारास्त्वपरे, वावदूककपालवत् ॥४९॥

हारपुरे नगरे कश्चिद्राजपुत्रो वसति, द्यूतव्यसनी भक्षको निर्द्धनः, द्रविणे व्यसनबाहुल्यादपूर्यमाणेऽसौ लकुटं स्कन्धे कृत्वा चचाल, यत्र तत्र गत्वा धनमर्जयिष्यामीतिबुद्ध्या, क्रमादटवीमेकां पर्यटन् उद्वसं ग्राममेकमाससाद, तत्समीपे चिराद्देवताप्रकोपेन मृतानां मनुष्याणां भूयसीः करोटीः पतिताः प्रेक्ष्य क्रीडया लगुडेन प्रत्येकं भङ्क्तुमारेभे, कियतीष्वपि भग्नासु महर्द्धिकदेवताऽधिष्ठिता सुलक्षणैका करोटिरखण्डा यावत्किल तेन भङ्क्ष्यते तावदवादीत्—भो! भो! मा मां भाङ्क्षीः, तुभ्यं पञ्च पञ्च शतानि दीनाराणां प्रतिदिनं ध्रुवं दास्यामि, एवं श्रुत्वाऽसौ जलधरधाराप्रहतकदम्बकुसुमस्थूलपुलककोरकितगात्रयष्टिस्तुष्टमनास्तां करोटिं जग्राह,

॥४१॥

सिद्धं साध्यमिति ब्रुवन् क्वचन सरसि जलेन प्रक्षाल्य वनकुसुमैः प्रपूज्य प्रणम्य वाससा संवेष्ट्य हारपुरं प्रति पुनः संचचारासौ, तद्भोगमनोरथप्रथमानमानसः प्राप्तस्तत्र पुरे, तस्मात् कपालात् प्रतिवासरं दीनाराणां पञ्चशतीं प्राप्नोति, ततो मकरध्वजसंजीवनौषध्याः पत्रलेखाया वेश्यायाः सदनेऽवात्सीत्, तत्र भुनक्ति विविधान् भोगान्, तत्कपालं दिव्यकरण्डिकायां स्थापयित्वा वेश्याजनदृष्टि-परिहारेण नित्यमर्चयति, 'अत्र मम देवताऽवसरः, केनापि न स्प्रष्टव्य' इत्यादरेणाऽऽदिशति च, गताः कियन्तोऽपि मासाः, एकदा अक्कया कुट्टिन्या पत्रलेखा भाष्यते स्म–वत्से ! नरेन्द्रसेवाक्रयविक्रयधातुवादादिभिर्विनाऽप्यसौ धनमेवं व्यययति, कुतोऽर्जयति ?, सविस्मयं मे हृदयं, किमस्य चिन्तामणिस्तुष्टः ? किं वा देवता काऽपि ?, पारम्पर्यं प्रश्नतो निर्णीय मां ज्ञापयेः, साऽपि भृकुटीभङ्गतरङ्गितनयनं प्रत्युवाच–तव किमनया चिन्तया ?, धनेन कार्यं, न तु तत्प्राप्तिचर्चया, इति रोषादभिदधाना जगाम गज-गामिनी पत्रलेखा भामिनी, पुनः पुनस्तया प्रेर्यमाणा रहः कदाचिदेनं पप्रच्छ–कुतस्ते व्ययभरसहधनप्राप्तिर्विना प्रयत्नमिति ?, सोऽपि च विश्वासादकथ्यमपि तत् कथञ्चित्तथ्यमेव कथयति स्म, यथा कपालमेकं दीनारपञ्चशतीं ददाति प्रतिप्रातः, तत्तु ममात्रैव देव-तावसरकरण्डिकायामस्ति, पत्रलेखाऽपि तां वार्त्तामक्काऽग्रे व्यजिज्ञपत्, साऽपि जरन्मार्जारीव परद्रोहपण्डिता कपालमेकं यतः कुतश्चि-दानाय्य तत्र क्षिप्त्वा तत्त्वाधिकं कपालं समादायान्यत्र गुप्ते स्थाने मुमोच, स्वयं तु द्वितीये दिने कपालाद् याच्यमानं धनं न प्राप्नोति, असौ विलक्षोऽस्थात्, दध्यौ च–वञ्चितोऽस्मीति दुरात्मिकया, यतः–"सम्प्राप्यैतानि वेश्यासु, नरस्य हरते रतिम्। प्रतिष्ठां सुकृतं वित्तं, कुलं शीलं बलं यशः ॥१॥ उपभुक्तखदिरबीटकरक्ताधरदन्तरङ्गभङ्गभयात्। पितरि मृतेऽपि हि वेश्या, रोदिति हा तात! ताते! ति ॥२॥" पुनः सचिन्तस्तमेव मनसि ग्रामं कृत्वा चचाल, प्राप्तश्च तत्र, ददर्श च तत्रैव ताः करोटीः, भङ्क्तुं प्रवृत्तो,

लब्धास्वादो हि तत्र सः, भग्नेषु केषुचित् कपालेषु निर्भिङ्क्ष्वि(बिभीत्सि)तेन एकेन प्रोचे–मा मां चूरय, पूरयामि तवेप्सितं, तेनापि तच्छ्रुत्वा सत्यमसत्यं वा वक्तु, भणितं–दीनारपञ्चशतीं देहि, कपालेनाभाणि–गृहाण सहस्रं भोः !, राजपुत्र इतस्ततो गवेषयन् दीनारानपश्यन्नाह स–कुतस्ते ?, कपालमाललाप–अहं वाक्सारेण दैवतेनाधिष्ठितं कुलक्षणं वाग्मात्रशूरं कपालं, यावत्कोऽपि किमपि याचते तद्द्विगुणं ददामीति वच्मि, न तु ददे, अनेनापि मम कार्यं सेत्स्यतीति निर्णीय राजपुत्रस्तदादाय हारपुरं जगाम, इष्टादीनां मित्राणां पार्श्वाद् दीनारसहस्राण्येकद्धान्युद्धारेण गृहीत्वा पुनस्तदेव पत्रलेखासद्माऽगात्, पूर्वस्थित्या देवताऽवसरकरण्डिकास्थं तन्नवं वाक्सारं कपालं सर्वजनसमक्षं क्षेमकप्रक्रिययाऽऽनर्च, हस्तौ संयोज्य दीनारपञ्चशतीमयाचीत्, कपालेनोक्तं–सहस्रं गृहाण, पूर्वं तत्रैव स्वयं न्यस्तं दीनारसहस्रं हस्तलाघवेन ललौ, तद् दृष्ट्वा तत्रस्थाः स्त्रियः सर्वाश्चमचक्रुः–अहो ! पूर्वस्मादपि सविशेषं सप्रभावं कपालमेतत्, धन्योऽयमेतत्प्रभुः, वृद्धया वृत्तान्तं ज्ञात्वा पुनरप्यूचे पत्रलेखा–वत्से ! अस्येदृशं वञ्चयित्वा नवीनं गृहाण, प्राक्तनमत्र करण्डिकायां मुञ्च, पत्रलेखाऽप्यूचे–अवसरे करिष्यामि, मा उत्सुकीभूः। एकदा राजपुत्रेऽन्तर्नगरं भ्रमणाय गते प्राच्यं तत्र मुक्त्वा नवीनं गृहीत्वा कृतकृत्या तस्थौ सा लोभिनी, राजपुत्रस्तु यामद्वयं पुरि भ्रमित्वा पुनस्तद्गेहमागाद्, यावद्गत्वा गवेषयति तावत्तदेवाग्रेतनं तत्राद्राक्षीत्, दृष्ट्वा च दिष्ट्या तदेवेदमग्रेतनं कपालं दृश्यते, नवीनं हृतं, हृदय ! रे नृत्य २, उक्ता चैका गाथा–“वेलामहल्लकल्लोलपिल्लियं जइवि गिरिनईपत्तं। अणुसरइ मग्गलग्गं पुणोवि रयणायरे रयणं ॥१॥” इति हर्षादचिन्तयत् सः। तया यौवनमत्तया मदिराक्ष्या तां च रजनीं सुखमवात्सीत्, जाते च प्रभाते तत्तात्त्विकं कपालं लात्वा तत्रैव नगरे मित्रस्यैकस्याऽऽवासमध्युवास, उदिते च जगच्चक्षुषि स्नातः सद्वस्त्रः सद्विलेपनः तत्कपालं प्रपूज्य दीनारपञ्चशतीं द्विगुणप्राप्त्याशयाऽयाचीत्, तत्तु वक्ति स–गृहाण सहस्रं, वक्ति, न तु

किञ्चिद्दत्ते कुट्टिन्याः, हक्कात् कपालेनोचे–अहं वावदूकं कपालं, तद्द्रव्यसारं, कुट्टिनी पश्चात्तापेन दग्धा, पुनः कदाचित्तं वित्तं वीरं भ्रमन्तं दृष्ट्वा चाटुगर्भमाह्वयदसौ, स पुनराचख्यौ–ज्ञातं ते तत्त्वं, कुट्टिन्यगादीत्–मया मायया जगज्जग्रसे, त्वं तु मत्तोऽप्यधिको येनैवं वञ्चिताऽस्मि, ततो भटः प्रस्फुटमुज्जगार–किं न श्रुतं त्वया–"रक्खसा ण भिक्खसा चिट्ठंति" विलक्षं हसित्वा गताऽक्का, वीरस्तु भोगान् भुक्त्वा विरक्तश्चिरात्, उक्तश्च–"मुञ्चन्ति विषयग्रामं, स्वयमेव मनीषिणः। अमुञ्चन्तोऽपि मुच्यन्ते, विषयैर्बालिशाः पुनः ॥१॥" इति ध्यायन् योगविधिना सिद्धिमारुरोहेति तात्पर्यार्थः ॥ इति कपालद्वयकथा ॥ ४९ ॥

विरोधबलीयस्त्वं ५०—

केनापि सार्द्धं मेधावी, विरोधं विदधीत न। यतः शुकशकुन्तेन, तथा वेश्या विडम्बिता ॥५०॥



रत्नपुरे परमरमणीयो रत्नसाराभिधः श्रेष्ठी, तस्य केदारकः सूनुः, पठितविद्यो व्यवसायी, कृतपाणिग्रहणः सुखं विचरति, तस्य च श्रेष्ठिनः पुराणस्मृतिकथाऽऽख्यानाऽऽख्यायको विचक्षणः कलाकलापो नाम शुकः, कालेन कियताऽपि स श्रेष्ठी जराजर्जरो मुमूर्षुः सुतं साञ्जसमाललाप–वत्स! वयं दीर्घप्रयाणाभिमुखाः, त्वं नवयौवनोदयः, यौवने च विषयविषमविषघूर्णमानदृष्टयो न किञ्चित्पश्यन्ति पुमांसः, सद्गुरूपदेशामृतसिच्यमानात्मानस्तु पुरुषा न बाध्यन्ते तेन विषेण, ततः संगृहाण सदुपदेशामृतरसं, स चायं सदुपदेशः–अज्ञातेषु न विश्वसनीयं १, नारीषु मन्त्रो न प्रकटनीयः २, मूलानुपालनेन धनं व्ययनीयं ३, विरोधो न प्रोन्मीलनीयः ४, गुरवो न खेदनीयाः ५, आवश्यके कर्मणि न प्रमादनीयं ६, न प्रमादः करणीयः ७, सूक्तमुक्तं रिपोरपि न दूषणीयं ८, कस्यापि कथा न छेदनीया ९, चाटुकारेषु न प्रत्ययनीयं १०, वेश्याः पराङ्गनाश्च वर्ज्याः ११, धनं भार्याऽऽधीनं न विधापनीयं १२,

कष्टेऽपि पुरुषव्रतं न त्यजनीय१३मिति। केदारकोऽपि तथेति पितुर्गिरं प्रपेदे, श्रेष्ठिना शुकः समीपमानीय प्रोक्तः–शुकराज ! त्वयाऽयं मत्पुत्रः कुव्यापारे वर्त्तमानो निषेध्यः, पुत्रः पुनः प्रोचे–त्वयाऽप्यस्य शुकस्य वचनमनास्थया न श्रोतव्यं,किन्तु तत्त्वधिया, पुत्रोऽपि तदाददे, मृतः श्रेष्ठी, गतानि वर्षाणि द्वित्राणि, अथ केदारो नगरान्तश्चरन् कामपताकाऽऽख्यां प्रौढवेश्यां दृष्ट्वा तदासक्तो जातः, तत्रैव तिष्ठति प्रायः, यदा तु गृहमेति तदा शुक उपालभते–त्वं क्व स्थित इयत्कालं ?, मा स्म विस्मार्षीस्तानि पितुर्व्याहृतानि, केदारकस्तूष्णीमास्ते, लब्धे च प्रसरे वेश्यायाः किङ्करी केदारकस्य गृहमेति, वसनकनकादि याचते, स्वैरं लभते, शुकस्तु तस्याः शृण्वत्या एव लालपीति–अहो श्रेष्ठिन् ! कथं गृहं मोषयसि ?, धिक् त्वामित्यादि, किङ्कर्यपि स्वामिन्यै व्यज्ञपयत्, तन्मन्त्रो जातः, शुकोऽयमानीय हन्यतां, य एवमस्माभिर्भक्ष्यं श्रेष्ठिनं तथा२विरिरंजिषति, एकदा श्रेष्ठिनि स्वगृहस्थे भुञ्जाने शुकेऽपि दाडिमी-फलशर्करादिलवशालिकणस्वादव्यग्रे कर्मकरी समेत्य यत्तत्कार्यं प्रोच्य अहो ! कीदृक् शुको रमणीय इति स्तुतिमिव कृत्वा हस्तेन गृहीत्वा गतैव,स्वामिन्यग्रे तं मुमोच,साऽपि तमाह–रे निर्दय ! श्रेष्ठिना क्रियमाणामस्मद्वृत्तिं छिनत्सि,तस्मादनुभव चापल्यस्य फलमिति गदित्वा पक्षावुदच्छिनत्, कृतो मांसपिण्डप्रायः, यावल्लोहं तीक्ष्णमादाय किल तं छेत्स्यसि,लोहं च ग्रहीतुं गता, तावदसौ शनैः २ कृतरिङ्खणो रसवतीसदनैकदेशेऽस्थात्, तस्याङ्गं छेत्तुं वेश्यया तु लोहमादायाऽऽजग्मुष्या न दृष्टः शुकः, उन्नीतं–शकुनिकया सरस-मांसलोभेन गृहीतः, किं तेनेति गवेषणे निरभियोगा तस्थौ। शुकेन्द्रोऽपि तस्यास्तत्परिवारस्य च दृष्टिं परिहरन् ध्वान्ते धान्यकणा-नुपजीवन् तद्वसे च वसन् क्रमादुद्गतपक्षः संवृत्तः, पुष्टाङ्गः पूर्ववत् ,ततस्तादृग्वैरनिर्यातनार्थी निशि उड्डीय तत्र गोविन्दे भवने प्राप्तः यत्र सा गणिका भक्तमन्या नित्यं२ एति, प्रभूतपुष्पपूजितस्य हरेरङ्गैकदेशे पुष्पान्तर्हितस्तस्थौ, सार्द्धप्रहरमात्रे गतेऽहनि समियाय सा

साधारणस्त्री, ननाम च महाभक्त्या गोपीपतिं, अत्रान्तरे कालज्ञः शुकः प्रोल्ललाप प्रौढस्वरं–भद्रे! तव भक्त्या तुष्टोऽस्मि, विष्णुरहं, त्वां वैकुण्ठभवनं नाम प्रसिद्धं स्वभवनं विमानेन नेष्यामि,माऽत्र भ्रान्तिं धार्षीः, एवं शुकोक्तमपि शुकादर्शनात् सा मुकुन्दगदितमिति प्रतीयाय, ततः संजातपुलका प्राह–भगवन्! महाप्रसादोऽयं मयि कृतः, किमन्यद् गवेष्यते?, कथय कदा तत्र नेष्यसि?, किं चाहं दानपुण्यादिकं करोमीत्युक्ते पुनः शुकः प्रोचे–पुत्रवति! आसन्नायामेवास्यां दशम्यां सर्वस्वं दत्त्वा गृहं च पात्रत्राकृत्वा परिवारमपि विसृज्य मुण्डितमुण्डा कज्जलकरम्बितमुखी दण्डीखण्डनिवसना सपौरजानपदा मद्गृहाङ्गणमापतेः,मध्याह्ने शुक एकः समीपस्थं रसालमारूढो दर्शिष्यते, तेनाभिज्ञानेन श्रद्धातव्यं यथा किङ्किणीरणरणायमानं सकृष्णं विमानमभ्येष्यतीति, एवमुक्ते प्रत्येति स्म सा, गच्छति स्म सदनं, चकार सर्वं तदुपदिष्टं, धूर्त्तैर्लोभिष्टो बाध्यते, आगता दशमी, कृता च सा सामग्री, तया मिलितो महाजनः, आजगाम पूर्वोक्तविधिना समाचरणपरा पण्यस्त्री, प्रसृता देशेऽपि सा वार्त्ता, यावत् संववृते द्विपहरी, अत्रान्तरे समियाय स शुको माकन्दशाखायां, ददर्श च तं लोकः, उवाच च–लिङ्गदर्शनाल्लिङ्गी अनुमीयते, यावदतिक्रान्ता त्रिपहरी, न चागच्छति विमानं,उत्पश्यो लोकः, सा च,एवं सति शुकः समागत्य बभाण–भो लोकाः! रे राक्षसि! क्व कृष्णः? क्व विमानं? क्व चास्यास्तवेदृशी पात्रता?, केवलमेतद्विजानीहि,यथा–"कृते प्रतिकृतिं कुर्याद्धिंसिते प्रतिहिंसितम्। त्वया लुञ्चापितौ पक्षौ,मया मुण्डापितं शिरः॥१॥" लोकैः पृष्टं–किमेतत्?, शुकेनोक्ता सा कथा प्रपञ्च्य २, जहास लोकः, सा तु मम्लौ, गताः सर्वेऽपि स्वस्थानम्॥ इति पराभिभवे शुककथा ॥५०॥ 

प्राणनाशनोऽर्थः ५१–अर्थः प्राणापहाराय,कोऽप्यायाति ध्रुवं नृणाम्। लब्ध्वाऽपि हैमपुरुषं,चत्वारो निधनं गताः॥

हेमपुरे राजपुत्रो मन्त्रिपुत्रः पुरोहितपुत्रः श्रेष्ठिपुत्र इति चत्वारः समसुखसुखिताः समदुःखदुःखिताः सहपांशुक्रीडिताः सवयसः सुहृदः, ते देशान्तरदर्शनकुतूहले पितॄन् आपृच्छ्य चेलुः, भूयांसमध्वानमुल्लङ्घ्य सायमटव्यामेकस्यां सैकते द्रुतले स्थिताः, एकैकेन यामो जागरितव्य इति निरचायि, प्रथमप्रहरे श्रेष्ठिपुत्रो जागर्त्ति, शेषास्त्रयः शिश्यिरे, द्रुमशिखरे शब्द उदपादि—अर्थोऽस्मि, परमनर्थेन वेष्टितो, यदीच्छसि तदुपदिष्टेः, वणिजाऽनर्थभीरुणाऽभिदधे—मा स्मागाः, एवं द्वितीये यामे पुरोधस्सुतः, तृतीये मन्त्रिनन्दनः, ताभ्यामपि तं शब्दं श्रुत्वा निषेध एवादद्रे, तुरीये त्वेक एव राजसूनुर्जागर्त्ति, शेषास्तु निद्रान्ति, पुनः स एव शब्दः—अर्थोऽस्मि, पुनरनर्थवेष्टित इति, राजपुत्रः—साहसी, श्रियमनुभवन्ति धीराः, न भीरवः किमपि ?, यदिह शस्त्रहते कर्णे स्वर्णालङ्कृतिः अञ्जनरेखाङ्कितं चक्षुरिति विचिन्त्य स्वच्छन्दमागच्छेत्यूचे, पतितः पुरतो हैमस्तुङ्गविशालाङ्गः पुरुषः, जाते प्रभाते पूर्वाचलचूलामाश्रयति भगवति गभस्तिमालिनि रात्रिवृत्तमन्योऽन्यं भाषमाणाः सुहृदः पुरश्चेलुः, प्रापुर्ग्राममेकं, भोजनकाल इति द्वौ मध्येऽन्नाहरणाय जग्मतुः, आवामेवास्य हेम्नः स्वामिनौ अस्य वा ( भवाव ) इति धिया सविषमन्नं लात्वा उपमित्रमागतौ, बाह्याभ्यामपि स्वार्थं तथैव विमृष्टपूर्विभ्यां तौ अन्नाहर्त्तारौ तीक्ष्णासिना जघ्नाते, हन्तारौ पुनरन्नभोजने सति क्षणादेव क्षयं गताविव्यर्थः ॥ इत्यर्थस्याप्यनर्थमूलत्वकथा ॥५१॥

**रहस्याकथनं ५२—रहस्यं नैव वक्तव्यं, कस्यचिन्मतिशालिना। अनुक्ते स्यान्महास्नेहः, पतिपत्न्योर्यथा तयोः ॥**

काञ्चनपुरे संकलनामा श्रेष्ठी चिद्रूपो ज्ञानवान्, तत्पत्नी सलक्षणा नाम, तत्पुत्री निजरूपोपहसितसुरसुन्दरी मदनमञ्जरी नाम, सा च यौवनस्था परिणिन्ये श्रीपुरवास्तव्यवसन्तध्वजश्रेष्ठिसुतेन मकरध्वजेन, कदाचिदागता श्वशुरकुलात् पितृगृहं,

तत्र लुब्धा परपुरुषेषु नेच्छति पतिगृहगमनं, अन्यदा तदानयनाय तत्पतिः काञ्चनपुरमाजगाम, स्थितो दिनान् पञ्चषान्, भोजनाच्छादनादिभिः सुखी, अनिच्छन्त्यपि सा प्रेषिता ताभ्यां मातापितृभ्यां, अतिक्रान्ते प्रयाणत्रये समागत एकः कूपः, तत्र च्छोटिता वाहिनी, मुक्तौ चरणाय बलिवर्दौ, प्राप्तः श्रेष्ठी कूपान्तिकं, अथ तेन रज्ज्वा बद्ध्वा क्षिप्ता करपत्रिका जलाहरणार्थं, तत्रान्तरे परपुरुषलुब्धत्वात् पुनः स्वगृहं यियासन्ती भर्त्तारं पृष्ठे स्थिता प्रेर्य कूपाभ्यन्तरेऽपीपतत्, तरणनिपुणतया च तन्मध्यवर्त्तिनं निरुपद्रवं प्रदेशं स समाश्रित्य स्थितः, एवं पतिद्रोहं कृत्वा पादचारेण गता सा पितुर्गेहं, पृष्टा च मातापितृभ्यां–किमित्येकाकिन्येव त्वमायाता?, तयोक्तं–मदीयः पतिश्चौरैर्गृहीतः, ततोऽहं पलाय्य महाकृच्छ्रेण समायाता स्वगृहं। इतश्च सा वाहिनी सबलीवर्दा निःस्वामिकत्वात् लुण्टाकैर्गृहीता, अतिक्रान्तेषु कियत्स्वपि यामेषु पथिकाः केऽपि पानीयानयनाय तं कूपमीयुः, तैः करुणारसपरीतैः समाकृष्य मुक्तो बहिर्मकरध्वजः। अथ सोऽपि श्रीपुरे स्वमन्दिरमसरत्, पृष्टः पितृभ्यां–वत्स! किमेकाकी समेतोऽसि?, सोऽप्याह–मार्गे चौरोपद्रवाद्वाहिन्यादिकं गतं, वधूर्वः पलाय्य क्वापि गता, न वेद्मि, अहं त्वेकाकी भवतां समीपं प्राप्तं, ततो वसति सुखं मकरध्वजः, अतिक्रान्ते वर्षद्वये पुनरपि तां भार्यामानेतुं जगाम मकरध्वजः, नमस्कृतौ श्वश्रूश्वशुरौ, पृष्टः स ताभ्यां–व्रजतोर्युवामन्तराले तदा तव किं संवृत्तं?, तेनाभिदधे–तस्करोपद्रवो जातः, अत्रावसरे मदनमञ्जर्या चिन्तितं–भव्यमुत्तरं सूत्रितं, मम हृदयमनुप्रविश्य वाऽयमूचिवान्, नास्त्यतः परो गभीरहृदयः, नाहं विगोपिता, अद्यप्रभृत्यहमस्य दासीव सेवां करिष्यामि, मनसाऽप्यहितं न चिन्तयिष्यामि। अथ सा पित्रोरनुज्ञया स्वेन पत्या सह गता श्वशुरसदनं, परमेण प्रेम्णाऽऽराधयति सहचरं, तथाहि–भुक्ते सति स्वयं भुङ्क्ते, शयिते शेते, अजागरिते पत्यौ शय्यां मुञ्चति, वाचं न खंडयति, त्वं जीव, मामादिश, इत्यादि वदति, छन्दमनुवर्त्तते, अभ्युत्थानमुपागते

गृहपतौ तद्भाषणे नम्रता, तत्पादार्पितदृष्टिरासनविधिश्चारूपचर्या स्वयम्। सुप्ते तत्र शयीत तत्प्रथमतो मुञ्चेच्च शय्यामिति, प्राच्यैः पुत्रि! निवेदिताः कुलवधूशुद्धान्तधर्मा अमी ॥१॥" ततः क्रमेण जातानि भूयांस्यपत्यानि, प्रससार कुलं, वितस्तार दानविनयोत्थं यशः, मकरध्वजो निजहट्टे निषण्णस्तिष्ठति, अन्येद्युर्गोरूपाणि श्रेष्ठिनः क्षेत्रान्तः प्रविश्य विविधानि धान्यानि भक्षयन्ति स्म, निवार्यमाणान्यपि तत्तनयैर्न निवर्त्तन्ते, ते निर्विण्णाः स्वपितरमेवमूचिरे—तात! गोरूपस्वामिनां प्रत्येकमुपालम्भो दीयते, यथा प्रसङ्गो निवर्त्तते, अथ श्रेष्ठी जगाद—हं हो वत्साः! उक्तादनुक्तं वरं, तैरुक्तं—एवमस्तु। एकदा कलहायमानाः केऽपि स्वजनास्तत्समीपमगुः, अवोचंश्च—वयमिदं २ राजकुले वक्ष्यामः, मकरध्वजेनोक्तं—उक्तादनुक्तं वरं। एवं बहुषु वादस्थानेषु तदेवाह, एकदा पुत्रैः पृष्टं—तात! कोऽस्य वाक्यस्य भावार्थः?, प्रसद्य ब्रूत, यदा यदा कोऽपि किञ्चिद्वादपदं वदति तदा तदा यूयमेवमेव वदथ—उक्तादनुक्तं वरं, ध्रुवमस्तीह किञ्चिन्निर्गूढं बीजं, ततस्तातः प्राह—वत्साः! उक्तादनुक्तमेव वरं, पुनस्ते प्राहुः—तात! पुनस्तदेव निगद्यते, ततोऽद्यापि न तन्मर्म कथयति, ततस्ते लङ्घितुं प्रवृत्ताः, गतं दिनद्वयं, पुनर्बोधितास्ते—रे वत्साः! कथिते सति महान् वः परितापो भावी, मा पृच्छत, पुनर्विलग्नास्ते—ब्रूत ब्रूतेति, ततस्तातेन रहस्यैतां कथां कूपक्षेपपुनःपत्नीरञ्जनसन्तानवृद्ध्यादिकां ज्ञापिताः, ततो ज्ञातवृत्तान्ताः शीतीभूतहृदया बुभुजिरे, अतिक्रान्ता दिनाः केऽपि, तेषां पुत्राणां मध्यादेकेन माता विज्ञप्ता—मातः! किं कदाचित् त्वया तातः कूपे क्षिप्तोऽभूत्?, अथ तयाऽनन्यगोचरतथाविधरहस्यभेदमिदेलिमप्रायहृदा भाषितोऽसौ पुत्रः—वत्स! केनेदं तवोक्तं?, सोऽप्यगम्भीरतया तां कथामाचख्यौ यथा एवं २ पुत्राणामत्यादरात्तातेनोक्तमिति, ततः स्थिता सा मुषितेव मृतेव जडीभूतेव, सुप्ता मध्ये गत्वा, अत्यन्तलज्जया हृदयं विदीर्णं, गतो याम एकः, भोजनादिक्षणे यावद्विलोक्यते सा तावत्पक्वेर्वारुवद्विदीर्णहृदया

मृता दृश्यते, तत्रागत्य स्वयमालोक्य श्रेष्ठी चिन्तयामास-यथाऽसौ मन्निवेदितरहस्यवशान्मृता तपस्विनी, अथ विषषाद श्रेष्ठी-हा! हतोऽस्मि, जीवन्नपि क्वेदं पुनः कलत्ररत्नं संपत्स्यते?, क्व चेदं पातकं तीर्थे निस्तरीतव्यं?, कस्य वा गुरोः पुरो दुष्कृतमिदं प्रकाश्यं? किमूर्द्ध्वं मुखं लात्वा क्वापि गच्छामि?, किं कूपे पतामि?, किमसिना स्वं छिनद्मि?, किं गिरिशिखरमारुह्यात्मानं पातयामी? ति विमृशन् मुमूर्च्छ शीतोपचारलब्धचैतन्यस्तारं २ विलपितुं प्रवृत्तः, मिलिताः पुत्राः, निषेद्धुं यावदग्रे भवन्ति तावज्जगाद मकरध्वजो-रे मूर्खाः! युष्माकमेवेयं जननीहत्या, भवद्भिरत्याग्रहं कृत्वा रहस्यभेदं कारयद्भिः पापैः पातितोऽहमनर्थके, पातके स्वात्मा च बोलितः, जीवयत एनां यदि शक्तिरस्ति, सलज्जेयं वराकी या मर्मभेदे कृते लज्जया म्रियते, निर्लज्जस्त्वहं योऽद्याप्यश्रूणि मुञ्चामि, मायावी न तु म्रिये, इत्यादि भाषमाणस्तीर्थं गतः, पुत्रास्तु मातुरौर्ध्वदेहादिकं कृत्वा शनैः शनैः शोकं तत्यजुः धर्ममाचर्य स्वर्ययुः॥ ॥ इति रहस्यप्रकाशने दम्पतीस्नेहकथा ॥५२॥

त्वराफलं ५३—अत्वरा सर्वकार्येषु, त्वरा सर्वविनाशिनी। त्वरमाणेन मूर्खेण, मयूरो वायसीकृतः॥५३॥

काऽप्याभीरी निर्द्धना बालार्भा मृतभर्तृका नगरं संत्यज्य बहिर्ग्रामे निजमुदरं पूरयति, स च शिशुः प्रवर्द्धमानो बाल्यं विहाय यौवनोन्मुखो जातः, परं पाठितोऽपि नापाठीत् स ग्रामीणशिरोमणिः, अन्यदा ज्ञानविज्ञानहीनं वीक्ष्य माता खेदं दधौ, अश्रूणि मुञ्चति, तेन पृष्टा साऽचकथत्-त्वं कथं भविष्यसि निरक्षरो जीवनोपायवर्जितः?, तेनोक्तं-मत्पितुः को जीवनोपाय आसीत्?, स्वामिसेवनं विनयमूलं, स च मातुर्जुहारादिकां शिक्षां गृहीत्वा सशरं धनुरादाय मार्गे व्रजन् लुब्धान् मण्डितवागुरान् दृष्ट्वा स्वयमपह्नुत्य "काका मामा" इत्युच्चशब्दं समुच्चरन् स मुग्धकः पूच्चकार, मृगा नेशुः, तैः स हि ताडितः शिक्षितश्च, तेन मात्रा वचन-

मश्रावि, तेषां—सर्वत्र विनयः विधेयः, ततोऽग्रे गच्छता रजकान् दृष्ट्वा स पाश्चात्यैरुक्तां शिक्षामाचरन् नीचैर्गच्छन् तैस्ताडितः यचौरस्त्वं, स्वभाव उक्ते मुक्तः शिक्षितश्चात्र क्षेत्रे ऊषः पततु, अग्रे कर्षकान् क्षेत्रं वपतो विलोक्य तेन तदेवोक्तं, इत्युक्ते कुट्टितस्तैश्च शिक्षितः, अग्रे व्रजन् शवं दृष्टवान्, भवतामिदं शतगुणं सहस्रगुणं भवतु, तैश्च व्यापादितः शिक्षितश्च, अग्रे विवाहोत्सवं प्रेक्ष्य सदा वियोगोऽस्तु भवतां, तैश्च कुट्टित्वा मुक्तः, शिक्षा च प्रदत्ता, पुरो निगडितान् दृष्ट्वा इत्युक्तवान्—सदा ईदृगुत्सवा भवन्तु, तैश्च कुट्टितः शिक्षितश्च, अग्रे मित्रद्वयं प्रेक्ष्य भवतो मोक्षो भवत्विति वचनमुक्तवान्, स्वभाव उक्ते मुक्तः, ततो ग्रामे ठक्कुरस्य समीपे जगाम, तं सिषेवे, अन्यदा दुर्भिक्षेऽम्ला खट्टा रब्बा रद्धा, भार्यया स प्रेषितः पतिसमीपे, तेन सभामध्ये यथास्थितं तस्य पुरस्तात् न्यवेदि, समायातेन पत्या उपलब्धा स्वभार्या—यन्मूर्खेणानेन लज्जाकरं वचनमभाणि, अन्यदा प्रदीपने संजाते गृहे ज्वलति सति कर्णे समागत्य शनैरेव कथितं, तेन शिक्षितः, करिष्याम्येवमित्युक्ते दयया स गृहे स्थापितः, अन्यदा स्नाने कृते स्वामिनि वस्त्रेषु धूपोद्ग्रहणापरे भस्म क्षिप्तवान् स्थालीक्षालनपानीयं च, ततो विषण्णस्तं निरकाशयत्, ततः कस्यचिद्व्यवहारिणो गृहेऽगात्, तेन प्रवहणं भृत्वा समुद्रे प्रेषितः, अभाग्योदयवशात् प्रवहणोऽभाङ्क्षीत्, फलहकस्य खण्डं गृहीत्वा सप्तभिर्दिनैः क्षुत्क्षामकुक्षिः स तीरमियाय, तत्र फलमूलकन्दाद्याहारं करोति, तत्र देवीगृहं वर्त्तते, तत्रास्ते, तत्पार्श्वे सन्ध्यासमये स्वर्णमयूरो नृत्यं करोति, प्रत्यहं सेवां कुर्वतस्तस्य देवी प्रसन्ना जाता, तवामुष्य बर्हिणो नित्यमेकैकं पक्ष वितरिष्यामि, इत्थं तत्प्रभावतः पक्षान् गृह्णाति, राशिः कृतः, अन्यदा तेन चिन्तितं—इत्थं मम किञ्चिद्भविष्यति, किन्तु मयूरस्य समग्रपक्षच्छेदं करोमीति विचिन्त्य यावत्तथा कर्त्तुमुद्यतस्तावद्देवीप्रभावादभाग्योदयवशात् मयूरो वायसीभूतः, पुनस्तस्य सैवाऽवस्था समजनि॥ इति मूर्खकथा ॥८३॥

भवितव्यताध्रौव्यं ५४-देवराजो दीपदिनं, यमः कालो विधिस्तथा। मन्दिरे चित्रगुप्तस्य, शुकस्य मरणं ध्रुवम् ॥

एकस्यामटव्यामेक ऋषिः, तत्र शुकस्तं पर्युपासते, अन्यदा शुको वृक्षशाखामारुरोह, ऋषिस्तस्मिन्नवसरे मस्तकं धुनोति, शुकेनागत्य पृष्टः-किमिति मस्तकं धुनासि?, तेनोक्तं-रे शुक! तव मरणं द्वितीयदिने भावि, पश्चात् स भीतः, प्रभो! मां त्रायस्व, तेनोक्तं-नाहं क्षमः, परं भवता इन्द्रस्य समीपे गम्यतां, स त्राययिष्यति, तद्वचः श्रुत्वा तत्र जगाम, इन्द्रस्याग्रे निजाभिप्रायं निवेदयामास, इन्द्रेणोक्तं-नाहमपि त्रातुं क्षमः, परं तत्कृपया सहभूय यमसदनं गतः, इन्द्रेणोक्तं-यम! एनं शुकं मुञ्च, सोऽपि निवेदयति-नाहमपि त्रातुं क्षमः, बत इन्द्रो यमः शुकश्च कालस्य सदनं ते प्रापुः, तत्राभिप्रायं निवेद्य पूर्ववत्तं सहायीकृत्य सर्वेऽपि विधेः सदनं प्रापुः, विधेः पुरस्तादपि पूर्ववन्निवेद्याधिकारिणश्चित्रगुप्तस्य मन्दिरमीयुः, सर्वे ते तं विज्ञपयाञ्चक्रुः, तेनापि पुस्तकं प्रकटीकृतं, तदादेशात्पुस्तकमध्याद् यावच्छ्लोकस्य तृतीयं पदं न्यवाचि तावता शुको मार्जारिकया गृहीतः, चतुर्थं पदं वाचयति तावत्तथैव जातं, सविस्मयाः सर्वे निजं स्थानं प्रापुरिति ॥ इति भाविनि निरुपायतासम्बन्धः ॥५४॥

द्रोहचिन्तकस्यानिष्टं ५५--

आत्मनः कुशलाकाङ्क्षी, परद्रोहं न चिन्तयेत्। स्थविरायाः कृतो द्रोहो, बध्वा एवोपनीयते ॥५५॥

कृते प्रतिकृतं कुर्याद्धिंसिते प्रतिहिंसितम्। न तत्र दोषं पश्यामि, वधूश्वश्रूकयोरिव ॥१॥

चन्द्रपुरे वीरश्रेष्ठी, तस्य भार्या वीरमती, माता तु जाया नाम विपन्नभर्तृका, पुत्रस्य रीढापात्रं बभूव, उक्तश्च— 

"आस्तन्यपानाज्जननी पशूनामादारलाभाच्च नराधमानाम्। आगेहकर्मावधि मध्यमानामाजीवितात्तीर्थमिवोत्तमानाम् ॥१॥ जाता-

पत्या पतिं द्वेष्टि, कृतदारस्तु मातरम्। कृतार्थः स्वामिनं द्वेष्टि, जितरोगश्चिकित्सकान् ॥२॥" इत्यादि, वधूः स्वाच्छन्द्येच्छतया श्वश्रूं जिघांसति, अत एकदा पर्वणि उपतिष्ठमाने श्वश्र्वा वधूरभाणि–वत्से! हट्टं गत्वा मत्पुत्रं काष्ठगोधूमान् याचस्व पक्वान्नकृते, सा तत्र गता, भर्त्तारमाह–तव माता जरारोगातुरा काष्ठानि याचते, सोऽपि तच्छ्रुत्वा गृहे समेत्य मातरमभाषत–मातः! किं?, (अचिन्ति) तया–मां हन्तुकामौ द्वावप्यमू, तस्मादेतदुक्तमेव समर्थयति धिया, अहं वत्स! काष्ठानि देहीति बभाषे, कृता पुत्रवधूभ्यां नगराद् बहिः काष्ठसामग्री, स्वजनलोको मिलितः, नगरगोपुरादेव विसृज्य बहिर्गतौ, जरतीं काष्ठान्तरालेऽचिक्षिपत्, अग्निस्तु विस्मृतः, अतो भर्त्ता भार्यामूचे–भद्रे! अग्निमानेतुमन्तर्नगरं यामि, त्वमत्रैव तिष्ठ, सा प्राह–विकालवेलायां निर्जनेऽहमेकाकिनी बिभेमि, संभूय गन्तव्यं, मिलितौ गतौ, वृद्धया चिन्तितं, मृतैस्तु शीतोदकं मिष्टान्नं निजेष्टसङ्गतिरन्यदपि न किञ्चिल्लभ्यते, विमृश्य निरसार्षीत्, आसन्नन्यग्रोधतरुशिखरमारुह्यास्थात्, अग्निमानीय काष्ठानि किञ्चिद्दग्ध्वा तौ जग्मतुर्वधूवरौ, निश्चिन्तं सुषुपतुश्च, तस्यामेव निशि प्रहरद्वयोद्देशे श्रीमच्छ्रेष्ठिगृहं लुण्टित्वा तस्करास्तत्रागुः, विभक्तुमुपाविक्षन्, अरणीपातिताग्निप्रकाशेन, अत्रान्तरे सा प्रत्युत्पन्नमतिका वृद्धा स्थानमुत्कलकेशा खादामि खादामीति वदन्ती उपरि झम्पामदात्, काऽपि राक्षसीति धिया चौरा नेशुः, तां समृद्धिं लब्ध्वा सा तुष्टा, वस्त्राभरणैरात्मानं भूषयित्वा याममात्रेऽह्नि स्वगृहमुपस्थिता, अभ्युत्थितौ तौ शठौ, चमत्कृतौ च कथयतां–कुतः पूज्या मृताऽप्यागात्?, साऽऽह–वत्सौ! सत्त्वेन मृताऽहं स्वर्गता, स्वःपतिना सत्कृता एवमेव हेमादिदानैः, तथा च सति अहमात्मानं युवयोर्दर्शयितुमागां, यदि तरुणी काष्ठान्यत्ति तदा महेन्द्रस्तां बहु सन्मानयति इति, श्रुत्वा इदं लुब्धा वधूराग्रहं कृत्वा काष्ठानि ससाध, द्वितीयेऽह्नि भर्त्ता पन्थानमीक्षते–कदा समेति सा? इति, माता बभाण–वत्स! नैवं गतैः पुनरागम्यते,

वैरं तु निर्यातितं मया, स्वकथां तां तथाऽऽख्यत्, पुत्रस्तूष्णीकोऽभूत्, क्षणान्तरे चाभाणीत् पुत्रः—मातः ! सत्यं यच्चिन्त्यते परस्य तदेति गृहस्य ॥ इति श्वश्रूवधूकथा ॥५५॥

लघुरपि बोधकृत् ५६—लघवोऽपि प्रबोधाय, महतां स्पर्द्धया क्वचित् । पितृरीढापरस्तातो, यथा पुत्रेण बोधितः ॥

हरिपुरे जलस्थलव्यवहारसहस्रबाहुर्नरवरपरिषन्नलिनीमरालः शङ्खो नाम श्रेष्ठी, तस्य चत्वारो नन्दनाः कुमुदस्तिलकोऽशोको वीरश्च, कुमुदस्य सूनुः कुन्तलः, क्रमेण जातविश्वासः शङ्खः पुत्रेभ्यो निधिस्थानान्यदीदिशत्, राजान्तिके न्यवीविशत्, व्यवहारधुरामारुहत् पुत्रपौत्रस्कन्धेषु, स्वयं तु निर्व्यापारो निर्द्रव्यस्तस्थौ, पुत्रविश्वासात्, आपदर्थे धनं न संचिकाय, क्रमेण जरसाऽऽक्रान्तः, पत्नी दिवं गता, पुत्रास्तस्य शुश्रूषां न कुर्वन्ति, वधूट्यो नामापि न गृह्णन्ति, केवलं स्फारभृङ्गारास्ताम्बूलतुन्दिलकपोला विष्वग् भ्रमन्ति, वृद्धस्तु जरापिशाचीग्रस्तो गृहस्य पाश्चात्यदेशे पतितः क्षुत्क्षाम आर्त्तशतानि ध्यायन् झषन् रङ्कवद् रुलति, एकदा शीतार्त्तो जरन् प्रातः कुमुदं ज्यायांसं पुत्रं शीतत्राणसहां द्विपटीं ययाचे, "वृद्धस्य मृतभार्यस्य, पुत्राधीनधनस्य च । स्नुषावचनदग्धस्य, जीवितान् मरणं वरम् ॥१॥" कुमुदः कुन्तलमादिक्षत्—अमुकां यवनीं ददीथाः, कुन्तलो जरते तज्जीर्णयवनिकाऽर्द्धमदात्, जरंस्तद्वस्त्रखण्डं कुमुदायादर्शयत्, कुमुदः कुन्तलं सरोषमभाषिष्ट—अरे ! एकं तावज्जीर्णा यवनिका, तस्या अपि खण्डं त्वया दत्तमस्मै, किमेतत् ?, किमस्मै सम्पूर्णेयं न व्यतारि ?, कुन्तलोऽपि कृताञ्जलिराह—तात ! बृहत्तातवद्भवतामपि जराऽऽगमस्तावदासन्न एव, यवनिकार्द्धं भवद्योग्यं स्थापितमास्ते, एवं वचः श्रुत्वा लज्जितः कुमुदः प्रोवाच—वत्स ! सुष्ठु बोधितः, प्रभुत्वविभवमदिरामदघूर्णमानानां पततामस्माकं हस्तावलम्बनं जातोऽसि, एवं प्रश्लाघ्य कुमुदः पितृभक्तिं विधातुं प्रारभत, तदनुव्रजनेन

कुटुम्बलोकोऽपि तथैव ॥ इति कुन्तलाख्यश्रेष्ठिपुत्रबुद्धिसौष्ठवकथा ॥५६॥

वृद्धत्वविडम्बना ५७–तारुण्ये द्रविणं दद्याद्विद्यमाने पराक्रमे। आसन्ने मरणे वृद्धा, वधूकाभिर्विडम्ब्यते ॥५७॥ वृद्धत्वे न दानं

कस्मिन्नपि नगरे श्रीपतिः श्रेष्ठी, भार्या श्रीमती, तस्याश्चत्वारः पुत्राः, क्रमेण चत्वारोऽपि परिणीताः, अत्यन्तभक्ता वध्वः, अन्यदा श्वश्वा चिन्तितम्–एकस्या हेमशृङ्खलिका द्वितीयस्या अङ्गूथलकः तृतीयस्या हेमसङ्कलकः चतुर्थ्यास्त्रीणि शतानि दीनाराः यदाऽहमन्त्यसमये गवेषयामि तदा समर्पणीयं यथा धर्मं करोमि, ताभिरूचे–ओमिति, तद्भक्ताः सत्यो निजं निजं कार्यं कुर्वन्ति, अन्यदा जराव्याप्ता शरीरेऽशक्ता बभूव, ताः शुश्रूषयन्ति, जिह्वा स्तब्धा, धर्मार्थं निजद्रव्यं याचते–एकस्याः पुरस्ताद् याचने सांगरी, द्वि० आंगुऊथलउ, तृ० सांकडऊ, चउथी डीद्रूमा इति तासां क्रमेण प्रत्युत्तरमिति, यथाऽऽगता तथा गतेति सर्वं निष्फलमिति विचिन्त्य तारुण्ये धने सति दानं प्रवर्त्तनीयम् ॥ इति वृद्धस्य दानानैश्वर्ये वृद्धाकथा ॥५७॥

## कुमारामात्यबुद्धिः ५८—

अनेकेष्वपराधेषु, सत्सु मन्त्री व्यमुञ्चयत्। बुद्ध्या न्यायं पुरस्कृत्य, कुमारामात्यभाग्यभृत् ॥५८।

अमात्य-बुद्धौ दयया मुक्तिः

कोऽप्यकृतपुण्यो यद्यत्करोति तत्सर्वमापदे भवति, ततोऽन्यदा मित्रं बलीवर्दौ याचित्वा हलं वाहयति, अन्यदा भाविकालवेलायां तावानीय वाटके क्षिप्तौ, स च वयस्यो भोजनं कुर्वन्नास्ते, ततः स तस्य पार्श्वे न गतः, केवलं तेनापि तौ दृष्ट्वा अवलोकिताविति स्वगृहं गतः, तौ च बलीवर्दौ वाटकान्निःसृत्यान्यत्र गतौ, ततोऽपहृतौ तस्करैः, स च बलीवर्दस्वामी अकृतपुण्यं तं वराकं बलीवर्दौ याचते, स च दातुं न शक्नोति, ततो नीयते राजकुलं, पथि च गच्छतस्तस्य कोऽप्यश्वारूढः पुरुषः संमुखमागच्छति,

स चाश्वेन पातितः, अश्वः पलायमानो वर्त्तते, ततस्तेनोक्तम्—आहन्यतामेष दण्डेनाश्व इति, तेन चाकृतपुण्येन सोऽश्वो मर्मण्याहतः, ततो मृतः, ततस्तेनापि पुरुषेण स वराको गृहीतः, ते च नगरमायातास्तावत् करणमुत्थितमितिकृत्वा ते सर्वे नगरप्रदेशे एव उषिताः, तत्र बहवो नटाः सुप्ताः वर्त्तन्ते, स चाकृतपुण्योऽचिन्तयत्—यथा नास्मादापत्समुद्रान्मे निस्तारोऽस्तीति वृक्षे गलपाशेनाऽऽत्मानं बद्ध्वा म्रिये, तेन तथैव कर्त्तुमारब्धं, परं जीर्णवस्त्रखण्डेन गलपाशो बद्धः, तद्वस्त्रखण्डमतिजीर्णमिति कारणात् त्रुटितं, ततः स वराकोऽधस्तात्सुप्तनटमहत्तरस्योपरि पपात, सोऽपि नटमहत्तरस्तद्भाराक्रान्तगलप्रदेशः पञ्चत्वमुपागमत्, ततो नटैरपि स प्रतिगृहीतः, गताः सर्वेऽपि, प्रातः सर्वेऽपि राजकुलं गताः, कथितः सर्वैरपि स्वस्वव्यतिकरः, ततः कुमारामात्येनैव स वराकः पृष्टः, सोऽपि दीनवदनोऽवादीत् यथायथं सर्वं, तत् श्रुत्वा हीनपुण्यस्योपर्यमात्यस्य जातादया, ततो दयार्द्रान्तःकरणो बलीवर्दस्वामिनमाहूयावादीत्—एष बलीवर्दौ तुभ्यं दास्यति, तव पुनरक्षिणी उत्पाटयिष्यति, एष हि तदैवानृणी अभूत् यदा त्वया चक्षुर्भ्यां बलीवर्दौ अवलोकितौ इति, यदि पुनस्त्वया चक्षुर्भ्यां नावलोकितौ स्यातां तदा एषोऽपि स्वगृहं न यायात्, नहि यो यस्मै समर्पणायाऽऽगतः स तस्यानिवेद्य समर्पणीयमेवमेव मुक्त्वा याति स्वसदनं। तदा द्वितीयोऽश्वस्वामी शब्दितः—एषोऽश्वं तुभ्यं दास्यति, तव पुनरेष जिह्वां छेत्स्यति, यदा हि त्वदीयजिह्वयोक्तं—एनमश्वं दण्डेन ताडयतेति तदाऽनेन दण्डेनाऽऽहतोऽश्वो, नान्यथा, एष दण्डेनाहत्य दण्ड्यते, न तव पुनर्जिह्वेति कोऽयं नीतिपथः ? । तथा नटान् प्रत्याह—अस्य पार्श्वे न किमप्यास्ते ततः किं दापयामः ?, एतावत्पुनः कारयामः—एषोऽधस्तात् स्थास्यति, त्वदीयः पुनः कोऽपि प्रधानपुरुषो यथैष वृक्षे गलपाशेनात्मानं बद्ध्वा मुक्तवान् तथाऽऽत्मानं ॥५९॥
मुञ्चत्विति ततः सर्वैरपि स मुक्तः ॥ कुमारामात्यस्य बुद्धिः ॥५८॥

क्षुल्लक १ गजतोलन २ सपत्नीपुत्र ३ निधिपति ४ भिक्षुखोरक ५ नैमित्तिका ६ ऽमात्या ७ बुद्धौ सप्त दृष्टान्ताः ॥

सट्ठिं कागसहस्सा वसंति गंगानईय तीरंमि। जइ ऊणा चुण्णगया, अहिअयरा पाहुणा आया ॥१॥१॥

वसन्तपुरे नगरे राजा बुद्ध्यतिशयसंपन्नं मन्त्रिणमन्वेषमाणश्चतुष्पथे गजमालानबद्धं कारयित्वा घोषणामचीकरत्–योऽमुं हस्तिनं तोलयति तस्मै राजा महतीं वृत्तिं प्रयच्छति, तच्छ्रुत्वा महासरसि नावि तमारोप्य उपलादिभिर्निर्णयश्चक्रे तेन २॥

कोऽपि वणिक्, तस्य द्वे पत्न्यौ, एकस्याः पुत्रोऽस्ति, अपरा वन्ध्या, साऽपि तं पुत्रं सम्यक् पालयति, ततः स पुत्रो विशेषं न जानाति–यथेयं मे जननी इयं नेति, सोऽपि वणिग् सभार्यापुत्रो देशान्तरं गतो, गतमात्र एव परासुरभूत्, ततो राजकुले विवादेन पुत्रपरीक्षा ३॥

द्वे मित्रे, क्वापि प्रदेशे ताभ्यां निधानमुपलेभाते, एको मायावी, द्वितीयस्तु सरलः, मायाविना निधानं गृहीत्वाऽङ्गाराः क्षिप्ताः, द्वितीयदिने तस्मै दर्शितं, तेनाप्याकारसंवरणं कृत्वा गृहे तत्प्रतिमां निवेश्य सुशिक्षितमर्कटीद्वयप्रयोगेण महोत्सवे पुत्रसम्पाते बुद्ध्या च स्वनिधिविभागो गृहीतः ४॥

तुज्झ पिया मह पिउणो धारेइ अणूणगं सयसहस्सं। जइ सुयपुव्वं दिज्जउ अह न सुयं खोरयं देसु ॥१॥५॥

क्वचित्पुरे कोऽपि सिद्धपुत्रः, तस्य द्वौ शिष्यौ निमित्तशास्त्रमधीयानौ, एकेन गुरोर्विनयपूर्वकं पठितं, तस्य शास्त्रार्थं चिन्तयतः प्रज्ञाप्रकर्षः समभूत्, द्वितीयस्य तद्गुणशून्यस्य न कोऽपि गुणः, तौ अन्यदा गुरुनिर्देशात् क्वचित्प्रत्यासन्ने ग्रामे गन्तुं प्रवृत्तौ, पथि च कानिचिन्महान्ति पदानि तावद् अदर्शतां, तत्र परस्परं हस्तिहस्तिनीसंवादाद् एकेनोक्तं–हस्तिनी (सा च) वामचक्षुषा काणा, तदु-

परि राज्ञी आसन्नप्रसवा, पुत्रं प्रसविष्यति, अग्रे ग्रामं गतौ,न्यग्रोधतरोरधो विश्रामाय स्थितौ, दृष्टौ च कयाचित् शिरोन्यस्तजलभृतघटया वृद्धस्त्रिया, परिभाविता च तयोराकृतिः, चिन्तयामास-नूनमेतौ विद्वांसौ, पृच्छामि निजपुत्रागमनं, पृष्टं तया, प्रश्नसमकालमेव शिरसो निपत्य भूमौ घटः शतखण्डो भग्नः, एकेनोक्तं-मृतस्ते पुत्रः, अपरेणोक्तं-गृहे समायातोऽस्ति, गता वृद्धा, स्वगृहे पुत्रं तं विलोक्य समागत्य पूजयामास, गुरुसमीपे गतौ सर्वं निजाभिप्रायं वक्त इति ६॥

सप्तमोऽमात्यदृष्टान्तोऽत्रैव लिखितोऽस्ति ७॥ इति बुद्धौ कथासप्तकम् ॥५९॥

**अगुणिनि न गुणशंसा ६०-अगुणज्ञेषु गुणवान्, दर्शयन्नात्मनो गुणान्। कुग्रामपामरैर्व्यासः, परितुष्टः कदर्थ्यते ॥** अगुणो गुणा दोषाः

गूर्जरदेशे उत्तमनगरे कश्चिद् व्यासः, श्रुतिवेदपुराणसूक्तावलीविदुरः सुस्वरो वक्ता प्रौढवयाः कविर्वादी सर्वशास्त्रेषु चतुरः, तेनानेके राजानो रञ्जिताः, अन्यदा वक्तृत्वमदादेवं विचिन्तितवान्- मरुलोकाः स्थूलबुद्धयः श्रूयन्ते दुर्बोधाः, तानप्यहं बोधयिष्यामि, इत्याशया तद्देशगमनसामग्रीमसूत्रयत्, मित्रैरवाचि-व्यासपादाः! कं देशमभिजिगमिषवः?, स आह-मरून् यियासामः, स मित्रैर्वार्यमाणोऽपि वातकीव जगाम तत्र देशं, कञ्चिन्महान्तं ग्रामं ददर्श, तत्र प्रविवेश, गृहे क्वचिदपि, तत्र वृद्धामेकां कृषीवलजातीयामाशीर्वादयामास, उच्चैरुच्चैस्तास्ताः कथा अचकथत्, तदनूत्थाय गतः, किङ्करेणैकेन सह निजद्रव्यव्ययेन बुभुजे, दिनान् पञ्चसप्तान् उपजरति गत्वा जगर्ज, यदा यदा व्यासो गाढस्वरेण वक्ति तदा तदा जरत्यश्रूणि मुञ्चति, व्यासो जहर्ष, तुष्टेयं दास्यति च स्वमिति। एकदा सा वृद्धा निजान् स्थूलस्कन्धान् पुत्रानूचे-वत्साः! एको विप्रोऽन्यदेशीयो रोगार्त्तः समागात्, रोगस्तस्य सोऽस्ति योऽस्मद्वत्सतर्या आसीत्, येन तारं तारं पूत्करोति, तं च दृष्ट्वा अहो भृशं दूयेऽहं, तेऽप्याहुः-अस्माभिः स आरटन्

शुश्रुवे, चिकित्सो बराकोऽयमुदारडम्भदानेनेति, ज्यायसी गदति स–सुष्ठु मन्त्रितं, द्वितीयदिने कथार्थं निषण्णं व्यासं चत्वारः संभूय जरतीसुताः प्रबद्धपरिकराः पातयित्वोपर्युपविश्य सग्रहं कृत्वा डम्भयन्ति, व्यासो बुम्बयति, तैरूचे–मर्मणि डम्भोऽद्यापि न लगति, लग्ने हि सुखेन नेत्रे निमील्य तिष्ठेत्, व्यासोऽपि दक्षतया मीलितनेत्रोऽस्थात्, पुनस्तैराचचक्षे–अत्र बाढं चम्प्यतां, तप्तलोहो मर्मणि लगन्नस्ति, एवं स्वच्छन्दं कदर्थयित्वा मुक्तः, डम्भव्रणे रूढे सति स्वागारमागात्, लोकैराख्यायि–किं तत्र गत्वाऽर्जितं ?, तेनापि साट्टहासं दर्शितो डम्भः, इदं पदकमिति, इत्यस्थाने गुणो न प्रकाश्यः, यत उक्तम्–"गुणा गुणज्ञेषु गुणीभवन्ति, ते निर्गुणं प्राप्य भवन्ति दोषाः। सुस्वादतोयप्रभवा हि नद्यः, समुद्रमासाद्य भवन्त्यपेयाः ॥१॥" इति व्यासकथा ॥५९॥

पराधीनं दानं

## पराधीनं दानं ६०––

न यच्छन्ति यथाशक्त्या, ये वित्तं स्वभुजार्जितम्। तेषां परवशो तस्मिन्, भवेत् सङ्कलवद् यथा (ननु) ॥६०॥

हेमरथं नगरं, सङ्कलश्रेष्ठी कनककोटिप्रभुः, न ददाति, न भुङ्क्ते, परिजनस्य मध्याह्ने एकवारं नीरसं भोजनं दत्ते भुङ्क्ते च। अन्यदा देशान्तरादायातेन विप्रेण प्रार्थितः, निर्वापमेकं याचते, नहि नहीत्येवं वदति, विप्रेणोक्तम्–दत्तं न वित्तं करुणानिमित्तं, लोभप्रवृत्तं कृतमेव चित्तम्। यैः सव्ययोत्साहरसाच्च नित्यं, शोचन्ति ते पातकमात्मवृत्तम् ॥१॥ न ददाति न भक्षति दैवहतः, परिसिञ्चति सिञ्चति मोहरतः। परकारणि वर्द्धति कन्न यथा, कृपणस्य गृहे धनवृद्धि तथा ॥२॥ इत्यादिसूक्तपरिपाट्याऽङ्गीकारितो निर्वापदानं, प्रातर्दास्यामीति प्रातरायातः, सङ्कलः प्रभणति–स्मर मद्वचनस्य, प्रातर्दास्यामीति, एवं वाक्छलेन वाहितो, वर्षमेकं गतं–"तेल पली जउ पाइली बांभणु लहिस्यइ कालि" इति वचनच्छलं, पश्चात् चुकोप विप्रः, अथ यक्षं तीव्रेण तपसाऽऽराध,

स प्रत्यक्षीभूय तमभाषत—याचस्व, यदि प्रसन्नस्तदाऽभिमतं रूपं कर्त्तुं मे शक्तिर्भूयादिति, तथेति प्रतिपन्नं,स तस्य छिद्राण्यन्वेषयति, अन्येद्युः सङ्कलो ग्रामान्तरं गतः, विप्रोऽपि तद्रूपवेषधारी तत्सदनमयासीत्, प्रविशति स्वच्छन्दः, आलापितः कुटुम्बेन—किमिति ग्रामान्तरं न गताः ?, शकुनाभावाद्व्यावृत्ताः, ततो भाण्डागारिकेण केनापि सह पुनर्ग्रामान्तरं यास्यामीति दुकूलमुक्ताफलहारकर्पूर-कनकादीनि दत्तः स्वच्छन्दं, तुष्टं कुलं सकलं, यो ददाति स देवता, दिनत्रयं व्ययितं, अत्रान्तरे ग्रामात् सङ्कलः समाययौ,स्वसद्मनि प्रवेशं न लभते, तारतारस्वरेण पूत्करोति, विवदमानौ राजद्वारे गतौ, स्वरवेषलिपिगत्यादिभिरुभावपि तद्रूपौ, एवं गतेषु कतिपयदिनेषु मन्त्र्यूचे—यः सत्यः सङ्कलः सः अनेन कलशनालद्वारेण निर्यातु, सत्यसङ्कलस्य न तथा शक्तिः, कपटसङ्कलस्तु यक्षवर-माहात्म्यात् सूक्ष्मरूपीभूय निरयासीत् ,प्रतिष्ठितं लोकैरयमेव सत्यो, न मन्त्रिणा,क्षणाज्ज्ञातो विप्रः,राज्ञोऽग्रे सर्वं वृत्तं बभाण "दातव्यं भोक्तव्यं सति विभवे सञ्चयो न कर्त्तव्यः। यदि सञ्चयं करिष्यसि सङ्कल ! पुनरागमिष्यामि ॥१॥" इति सङ्कलकथा ॥६०॥

**दोषाख्यायी जटी ६१**—आपृच्छ्यमानः स्वं दोषं,कश्चिदाख्याति मन्दधीः। अन्नं कारुगृहे भुक्तं, स्वयमेव जगौ जटी ॥ स्वदोषाख्यायी

कहउ भरडा ! जं जं कियउं, ढिंपकगृहे भुक्तम् ॥ इति जटिकथा ६१॥

**मर्मवदनानर्थः ६२**—परस्परं च मर्म्माणि, ये वदन्ति नराधमाः। त एव निधनं यान्ति, वल्मीकोदरसर्पवत् ॥

कुत्रचिन्नगरे जितशत्रू राजा, तस्य पुत्री श्रीमती, सा सकला नरेन्द्रपर्षदि समायाता, स्वसभां गर्वेण सर्वेषां पुरस्तात् पप्रच्छ नृपः—भो ! भवन्तः कस्य प्रसादाल्लक्ष्मीमुपभुङ्ग्ध्वे ?, तैर्दर्दुरवत्सर्वैरभाणि—भवत्प्रसादात्, तया तूक्तं—राजन् ! मा वोचः, सर्वः कोऽपि कर्मणः प्रसादाल्लक्ष्मीं सुखं दुःखं चोपभुङ्क्ते, तदाकर्ण्य रुष्टः कोपान्धेन कुष्ठी परिणायितः,हाहापूर्वं नागरिकेषु वदत्सु मर्मोक्तौ हानिः

सा तं मूर्ध्नि निधाय निर्जगाम, कुत्र नगराभ्यर्णमीयुषी तं बहिः संस्थाप्य भिक्षार्थं नगरं गता, यावद्भैक्षं भोज्यमादायाऽऽगच्छति तावत्तत्र किं विलोकयति–एको वल्मीकः सर्पो द्वितीयस्तद्वदननिर्गतः सर्पः, परस्परं तौ विवदतः, मर्म्माणि प्रकाशयतः, प्रच्छन्नीभूय सर्वं श्रुतवती, एकस्तद्वदनस्थो जल्पति–रे वल्मीक इत्थं निधानमधस्ताद्विधाय त्वं वर्त्तसे, आत्मक्षयं पश्यसि ?, कश्चनापि पुमान् तप्ततैलेन तव बिलं सिञ्चति तदा निश्चितं तव विनाशः, द्वितीयेनोक्तं–त्वमात्मक्षयं न पश्यसि, कश्चित् षण्मासं यावत्काञ्जिकदानं तव कारयति तदा तव विनाशः, तत्सर्वं तया शुश्रुवे, आगत्य तैलकाञ्जिकप्रदानेन तयोः नाशं कृतवती, नरेन्द्रसेवां विधाय तत्स्थानं खानयित्वा तन्निधानं प्रकटयामास, स्वकर्मवशात् स सुखीबभूव, तौ मर्म्मभाषिणौ निधनं गतौ ॥ इति मर्म्मभाषणे सर्प्पद्वयकथा ॥६२॥

भाग्ये स्वल्पयत्नः फलदः ६३— भाग्यमहत्ता

स्वल्पेनापि प्रयासेन, स्फुरद्भाग्योदयो ध्रुवम्। लाभं राजप्रसादं चाऽऽप्नोति धीरकवद् यथा ॥६३॥

श्रीपुरे नगरे धीरकनामा सुभटोऽकिञ्चित्करः, तस्य भार्या सुरूपा सुलोचना यूनां मनोहारिणी स्वभावेनान्यायरता, अन्यदा तया चिन्तितम्–अनेनाकिञ्चित्करेण किं साध्यं ?, केनाप्युपायेन गृहान्निष्कासयामीत्युपायं विचिन्त्य भर्त्तारं रहस्युक्तवती–प्रियतम ! देशान्तरं विना पुरुषस्य सम्पदः कथं स्युः ?, तस्मात्त्वमपि देशान्तरे भूरिद्रव्यमर्जयित्वा समागच्छ, यथा सुखेन कालातिक्रमो विधीयते, तेनोक्तम्–एवमस्त्विति, स्त्रीजितत्वात्, विषभावितान् मोदकान् शम्बलकमादाय निर्गतः, पथि गच्छतस्तस्य सप्त चौरा मिमिलुः, तं दीनं ते लुण्टितवन्तः, स शून्यचित्त इतस्ततो बम्भ्रमीति, क्षुधार्त्तैस्तैर्म्मोदका बुभुजिरे, तद्भक्षणात्ते विनेशुः क्षणेनैकेन,

तेनापि परिभ्रमता निश्चेष्टान् तान् विलोक्य सर्वं स्वं जगृहे, क्रमेण नगरे समायातः, तत्र तस्य जयजयारवः समजनि, राज्ञः प्रसादपात्रं बभूव। अन्यदा तेन राज्ञः पुरस्तादुक्तं—महत्कार्यं विना ममादेशो न दातव्यः, नृपेणाङ्गीकृतं, अन्यदा नृपपर्षदि महाजनेनाऽऽगत्य विज्ञप्तं—देव! त्वत्परिसरे सिंहः सर्वजनानामुपद्रवं करोति, राज्ञा महाजनः सत्कृत्य विसृष्टः,सुभटा बहवः प्रेषिताः,परं तं जेतुं न कोऽपि समर्थः, अन्यदा तु राज्ञा बीटकप्रदानपूर्वं प्रेषितः, सोऽपि तत्र गतः, सिंहं दृष्ट्वा तरुशिखरमधिरूढः, सिंहोऽप्यागत्य पुच्छच्छटाक्षेपं करोति, स तु तदा स्थितः कम्पते, अत्यन्तभयाद्धस्तात्करालः कुंतो दैववशात्तन्मुखे पपात, स सिंहः पराशुर्जज्ञे, सोऽपि तरुशिखरादुत्तीर्य्य स्वनगरमाजगाम, राज्ञोऽग्रे सर्वं वृत्तान्तं गलगर्जिपूर्वकमभाणीत्, स नृपस्ततस्तस्मै द्विगुणं प्रसादं ददौ, सर्वत्र कीर्त्तिपात्रं बभूव, अल्पप्रयासेनापि भाग्योदयात् सर्वं समीचीनं जातमिति सम्बन्धः॥६३॥

## हिताश्रवणे दुःखम् ६४—



हितं वचो न यः सम्यक्, शृणोति स्वकदाग्रहात्। स पश्चाद्दुःखभागी स्याद् धस्तामलकवद्यथा॥६४॥

कश्चित्केलिकुतूहली देशान्तरं परिभ्रमन् समुद्रतीरमियाय, तत्तीरे एकं नरं सुरूपं सुभगं हस्तौ मर्दयन्तं वीक्ष्य प्रोक्तवान्-भोः पुरुष! त्वमित्थं कथं कुरुषे?, स्वाभिप्रायं न वक्षि, तस्यात्यन्ताग्रहेण तेनोक्तं—प्रवहणं चट, तद्वचनात्प्रवहणाधिरूढः समुद्रजलकल्लोलैः प्रेर्य्यमाणः प्रयाति, अन्तरा अभाङ्क्षीत्तस्य प्रवहणः, फलहकमेकमादाय तरति समुद्रं, क्रमेण तथा व्रजन् पर्वतमेकमुन्नतशृङ्गं ददर्श, फलहकं विमुच्य गिरिशिखरमध्यारुरोह, तत्र जिनभवनं वीक्ष्य शान्तश्रमोऽभूत्, तन्नमस्कृत्य सन्निहितमपूर्वं मन्दिरमवलोकयामास, तत्र हिण्डोलहट्टे सुष्वाप, ततस्तन्निवासिनी देवी समाजगाम, तया तु जयजयारवपूर्वं प्रार्थितः—त्वमत्रैव तिष्ठ,

मया सार्द्धं भोगान् भुङ्क्ष्व, तेन प्रपन्नं, सुखेन कालं निर्गमयति। अन्यदा तु सा देवी वासवादेशात् स्वर्लोकं गता, तस्य शिक्षां ददौ—यद्भवताऽपवरकत्रयी एषा नोद्घाटनीयेति, मद्वचो नान्यथा कार्यं, तेनोक्तं—एवमस्तु, तस्या गमनानन्तरं क्षणेनैकेन प्रथमाऽपवरिकां स उद्घाटयामास, तत्र मदकलां करिणीमवलोकयामास, तत्पृष्ठाधिरूढो देवताप्रभावात्स्वर्लोकं गतः,तत्र सर्वं नृत्यादिकं विलोक्य तस्यां व्यावृत्यमानायां प्रथमत एव स्वस्थानमियाय, तयाऽऽगतया भूयः शिक्षा प्रदत्ता,तेनोक्तं—नेत्थं करिष्ये, अन्यदा चमरेन्द्रादेशात् पातालभवनं गता, सोऽपि तथैव तत्कटके द्वितीयामपवरिकामुद्घाट्य घोटिकामारुह्य तत्र गतः, तत्रापि सर्वं तथैव विलोक्य पूर्वमेवाऽऽयातः, भूयोऽप्यागत्य शिक्षां ददौ, तृतीयाऽप्येषाऽपवरिका सर्वथा नोद्घाट्या त्वया श्रेयोऽभिलषता, तेनोक्तं—ओमिति, अन्यदा त्विन्द्रादेशात् सा रुचकद्वीपं गता,सोऽपि तथैव लब्धास्वादस्तृतीयामपवरिकां यावदुद्घाटयति तावत् काणया विरूपया रासभ्या पादेन तथा हतो यथा समुद्रतीरे प्राप्तः, तत्र सोऽपि पूर्वपुरुषवत्केवलं हस्तौ तथा कुर्वन् महद्दुःखमनुभवन्नस्थादिति सम्बन्धः आगताव-
॥ हितवचनलोपकथा ॥६४॥ स्थावेदनं

आगतावस्थावेदनं ६५—

**या याऽवस्था समभ्येति, तां तां च सहते नरः। करीरपुष्पदूनोऽपि, तिलयन्त्रेऽवहत् पुरा॥६५॥**

बलभीनगरस्वामी रिपुमर्दनो वाहक्रीडया बहिर्निर्ययौ, क्षुद्रमेकं नरं करीरस्थं विपिने नृपोऽपश्यत्—रे रे करीरारूढ! त्वं किं करोषीति भूभुजा व्याहृतोऽसाविति जगौ—देव! बिडौजसं हसन्नासि, लोभं विनाऽकृत्ये कश्चिन्न प्रवर्त्तते, अहिल्यागमनं लोभेनैव वासवश्चक्रे—"विमुच्य क्वापि हृन्नेत्रं, यत्त्वया विहितं हरे!। तेन ते तत्क्षणाल्लाभः, सहस्रं चक्षुषामभूत् ॥१॥ स्त्रीसंयोगेन

मर्त्यानां, वर्द्धते स्पर्शनेन्द्रियम्। चक्षुरिन्द्रियवृद्धिस्ते, तदिन्द्रत्वस्य कारणम् ॥२॥" तन्नवोक्त्या नरेशः सुप्रसन्नस्तस्मै राज्यमुद्रां करीर-नामसहितामदात्, राजप्रसादादृद्धिं स प्राप, राजमानं रमा प्राप्तिर्विवेको लोकगौरवम्। सौख्यं सन्ततिवृद्धिश्च, तस्यामून्यभवन् समम् ॥३॥ सर्वावसरवेलायां नागतस्त्वं कुतोऽद्य ?, प्रभुणा पृष्टः सन् मन्त्री वाचमभाषत—देव! निशायां तल्पे सुप्तः पुष्पवृन्तेनाहं पीडितः, तच्चिकित्सां कुर्वतो मम वेला लग्ना, तद्वाक्यश्रवणाद्राजा चुकोप मनसि—किमसौ पूर्वावस्थां नावैति, न जानाति तदाऽस्य ऐश्वर्य-रोगघ्नं दारिद्र्यमेवागदमित्यालोच्य सर्वमादाय मन्त्रिणः पूर्वचेष्टां क्षणादेव ददौ, राजगृहीतसर्वस्वोऽप्येकवारं सेवार्थं नृपाङ्गणे प्रयाति सः, कतिपयदिनैः स हायनोपमान् वासरान् लङ्घयामास, अन्यदा भोजनोपायं जिज्ञासुश्चक्रिणो गृहे वृषभं यन्त्रे वहन्तं तिलपिण्डा-दिकमैक्षत, ततोऽसौ वृषभस्थाने संयुक्त्वा भारमुद्वहन् चक्रिणा दत्ततिलपिण्डो गृहं ययौ, इत्थं प्राभातिकीं सेवां नृपतेर्विधाय विज्ञात-भोजनोपायस्तैलयन्त्रं निषेवते, अन्यदा मृगयाया वलमानेन नृपेणाऽदर्शि च, एकदा प्रातः सेवासमायातमूर्ध्वीकृताङ्गुलिकामिषाद्य-श्रोत्तारणसञ्ज्ञयां तं पप्रच्छ, स विहस्याङ्गुलीयुग्मसङ्केतमकरोत्, तदा सभासीना मन्त्रिणश्चुक्षुभुः, ततः स्थूलामात्यस्तं गच्छन्तमन्वगात्, कारणं करशाखायाः पृच्छति स्म, स व्याहरत्—मह्यमेकाङ्गुलीव्याजेन मन्त्रिपदवीं द्वितीयां श्रीगरणपदवीं च, अतस्त्वद्दासोऽसीति ब्रुवन् तुरगाद्यर्थदानमदात्, एवं सर्वेऽप्यधिकारिणश्च प्रातसः(प्रतारिताः)ध्रियमाणश्रीकरीकः करीरस्तुरगशतवेष्टितो नरेश्वर-मनमत्, राज्ञा पृष्टः—किमेतदिति, स स्वबुद्धिवैभवमवदत्, तद्बुद्ध्या चमत्कृतो नृपः पुनर्मन्त्रिपदवीं महत्तमां दत्तवान् ॥ इति करीरमन्त्रिकथा ॥ ६८ ॥ जा जा पडइ अवत्थडी, सा सा सहइ शरीरु। फूलिहिं डींटिहिं दूहवियउ, घाणइ वहइ करीरु ॥१॥ अस्य चरित्रस्य सूचिका गाथा ॥६८॥

अनुपकारे हास्यम् ६६—योऽधिगत्य पदं किञ्चिन्नोपकारपरायणः। स श्रीदत्त इवात्यन्तं, स्वजनैरपहस्यते ॥६६॥

हस्तिनागपुरं पुरं, तत्र दामोदरः श्रेष्ठी, स कदाचित्कर्म्मदोषेण दारिद्र्यं प्राप, सोऽन्यदा निजजायां जगौ–प्रिये! मद्भ्रातृतनयः श्रीदत्तश्चम्पायां राज्ञः सचिवाग्रणीर्वर्त्तते तं गत्वा द्रव्यं याचे, तया चन्द्रभास्करदृष्टान्तेन प्रतिबोधितोऽपि तत्र जगाम, तत्र तदैश्वर्यललितं दृष्ट्वा दिनपञ्चकं स्थित्वा प्रियावाक्यं श्लाघमानो मानस्वे तत्सदनात् प्रच्छन्नं निरगात्, क्रमेण गृहमाजगाम सः, भार्यया पृष्टः श्रीदत्तविहितामवज्ञां नाख्यत्, यतः–आत्मवित्तं गृहच्छिद्रं, गृहे दुश्चरितानि च। वञ्चनं चापमानं च, मतिमान्न प्रकाशयेत् ॥१॥" इति। इत्थं कालं गमयन् भाग्याद्धनैः स वितस्तार, जलवर्त्मनि यानि वाहनानि पूरितान्यासन् शुश्रुविरे तानि द्वादशवत्सरैः समेतानि, कार्मीव स कमलां महाभोगैर्विललास गृहिणीमिव। इतः–चम्पाधिपेन धनलिप्सुना सर्वं गृहीत्वा कारायां चिक्षिपे श्रीदत्तः, ततस्तेन व्यचिन्ति–"शिशूनि कशिशूनि स्युर्मातरो न कुमातरः। पुरा पराभूतमपि, पितृव्यमधुना भजे ॥१॥" भिक्षान्नं पथि भुञ्जानो दीनास्यः पादयानेन गजपुरमगमज्जवात्, पुराद् दूरे स्वयं स्थित्वा पितृव्यायाकथापयत्–श्रीदत्तोऽत्र समेतोऽस्ति दिगम्बरमुद्राभागिति, तच्छ्रुत्वा प्रमोदभाक् सर्वजनसमेतो वासांसि गृहीत्वा तत्संमुखं ययौ, पाणिभ्यामभ्यङ्गं विधाय संमुखमुपसृत्य स दामोदरं नेमे, उवाच च–मद्भाग्यैस्त्वं समेतः,–अद्य वर्द्धापनं तेऽस्तु, यदेवं रिपुरूपिणा। मुक्तो नियोगरोगेण, दिष्ट्या दृष्टोऽसि लोचनैः ॥१॥ राजमानं धनं चैव, चलं श्रीवृक्षपत्रवत्। तद्गर्वेण नरा मूढाः, स्वजनानवजानते ॥२॥ स्वप्नवद् यौवनानि स्युः, प्राणाः सत्वरगत्वराः। तद्गर्वेण नरा मूढाः, स्वजनानवजानते ॥३॥ ईश्वरे सुप्रसन्नेऽपि, तिरस्कार्या न बान्धवाः। गर्वाद्विभीषणद्वेषी, लङ्केशोऽत्र निदर्शनम् ॥४॥ इति निर्भर्त्स्य बहुधा, तं श्रेष्ठी लोकसाक्षिकम्। अनयत् तुरगारूढं, पुरान्तर्वस्त्रभूषितम् ॥५॥ स्नेहादुत्सङ्गमारो-

प्य, पृष्ट्वा च व्यसनं जगौ। करिष्ये सुन्दरं सर्वं, वत्स! मा खेदमुद्वह ॥६॥ पुनः शिक्षावचनान्यदात्–वत्स! नियोगत्वं न श्रुतं भवता, यतः—कम्बाघातैर्वपुषि निहतैरुच्छलच्छोणितौघं, कारागारे निबिडनिगडैर्बन्धनं लङ्घनं च। एवं ज्ञात्वा विरम सुमते! मा कुरु त्वं नियोगं, कर्णोपान्ते मलिनवदना लेखिनी पूत्करोति ॥१॥ अधिकार ऋणं गर्भं, चतुर्थं श्वानमैथुनम्। आगमे सुखमिच्छन्ति, निर्गमे दुःखभाजनम् ॥२॥ प्राप्य चलानधिकारान् शत्रुषु मित्रेषु बन्धुवर्गेषु। नापकृतं नोपकृतं न सत्कृतं किं कृतं तेन? ॥३॥ इत्थं शिक्षयित्वा गरीयसा गौरवेण लक्षसङ्ख्यं द्रव्यं दत्त्वा पक्वमृन्मयभाण्डवत्तद्व्यसनं बिभेद। इत्थं श्रीदत्तचरितमाकर्ण्य गुरुबोधवत्। प्रवर्त्तयध्वं नियतमुपकाराय मानवाः! ॥४॥ इत्युपकारकथा ॥६६॥

## बुद्धिविभवाद् गौरवम् ६७—

बुद्धिमाहात्म्यं

**गौरवं विभवाज्जाने, विभवो बुद्धिसम्भवः। तदत्ययाद्धनः श्रेष्ठी, खेदमासेदिवान् पुरा ॥६७॥**

वाणारस्यां धनाभिधः श्रेष्ठी, तस्य पुत्रो मदनः, सुहृद्भिरावृतो विपणौ गतः, अग्रे पण्यहीनं चित्रितं हट्टं विलोक्य तद्वृत्तान्तं जिज्ञासुस्तत्रस्थं नरमेकं पृष्टवान्, बुद्धिहट्टोऽयम्, शतपञ्चद्रम्ममूल्यामेकां बुद्धिं प्रयच्छ मे। यत्र द्वौ कलहायेते, न स्थेयं तत्र मे मतिः ॥१॥ तदुक्तशिक्षामादाय द्रविणं प्रदाय निजाऽऽपणमुपेतः, ज्ञाततद्वृत्तान्तो जनको बुद्धिपुंसस्तद्द्रव्यं लात्वा समायातः, अन्यदा तत्पुत्रो राजमान्यौ क्षत्रियौ विवदन्तौ वीक्ष्य तस्थिवान्, तौ गतौ राज्ञः समीपे, नृपपृष्टौ मदनं साक्षिकमभ्यधातां, न्यायचिकीर्नृपस्तमाजुहाव, ततो धनो बुद्धिदं शरणं ययौ, कोटिद्रव्यं गृहीत्वा बुद्धिमदात्तस्मै, स्वपुत्रं ग्रथिलं कृत्वा नृपौकसि त्वं प्रहिणु, तद्बुद्धिमाहात्म्यात् पुत्रो व्यसनसागरान्निस्तीर्णः, ततो धनोऽपि तत्सङ्गतिं व्यधात् ॥६७॥

औचित्यमहिमा ६८—एकत्रौचित्यवचनमन्यतो ग्रन्थकोटयः। पश्यौचित्यगिरा लेभे, बन्धमोक्षं स माधवः ॥६८॥



वासन्त्यां नगर्यां तत्र माधवो नाम दुर्गतो वाडवः—तन्मुखं यः प्रगे पश्येत्, स मध्याह्लादनन्तरम्। प्राप्नोति भोजनं तस्मात्, स जातो दुर्भगोऽधिकम् ॥१॥ नृपस्तदयशः शुश्राव जनेभ्यः—प्रातर्लोकं वृथा कुर्वे, तं सदोषं करोमि वा। प्रधानैर्वार्यमाणोऽपि, तमाह्वास्त प्रगे द्विजम् ॥२॥ मुकुरादपि प्रथमं तन्मुखं विलोकितवान्, भोजनवेलायां नृपो यावत्कवलं जग्राह तावन्निषादी पट्टहस्तिनं परासुं कथयामास, तच्छोकसङ्कुलो भूपः प्रधानैर्बलात् सायं भोजितः, प्रातर्माधवाख्यानं स्मारितो नृपो द्विजाधमं शूलिकारोपे आदिष्टवान्, आरक्षकैर्नीयमानोऽपि शूलिकां प्रति तदानीमौचित्यं वचनमुक्तवान्—एकाकी नास्म्यहं, तदाख्यातगिराऽऽश्चर्यपूरितो नृपो रहस्यं पृष्टवान्—मत्तो गुणाधिको राजा, जातश्चेति स चिन्तयन्। ब्रवीमि नाहमेकाकी, मरणे समुपस्थिते ॥१॥ मन्मुखादपि त्वद्वक्त्रं, सामान्यं नास्ति मे मतिः। मन्मुखाद्भोजनाप्राप्तिर्मरणं त्वन्मुखाद्भवेत् ॥२॥ इत्यौचित्यगिरा बाढं, रञ्जितः कौतुकप्रियः। प्रसादपूर्वं तं विप्रमह्रश्चन्मनुजेश्वरः ॥३॥ इत्यौचित्यवक्तव्यकथा ॥६८॥

न्यासापहारेऽनर्थः ६९—न्यासापलापमुख्यं यः,कूटं निर्माति दुर्मतिः। वसुदत्तादिवत् स स्यान्नानाऽनर्थनिकेतनम्॥



श्रीपोतनपुरे शतायुधो राजा, सोमदेवस्तत्र श्रेष्ठी, तत्सुतो धनवसुः, स च द्यूतादिव्यसनासक्तो नित्यं, स श्रेष्ठी पुत्रस्याविश्वासे पञ्चरत्नीं महार्घां स्वमित्राय वसुदत्ताय दत्त्वा प्रच्छन्नं स्वयं वाणिज्याय देशान्तरं गतवान्, वसुदत्तस्तां करण्डिकामुद्घाट्य रत्नपञ्चकमादाय लोभात्पुनस्तथैव चक्रे, स देशान्तराद्द्रव्यमुपार्ज्य समागच्छन्नन्तरा धाट्योपद्रुतः, सर्वं निर्गमय्य स्वगृहमागतः, पञ्चरत्नीं मार्गयामास, तेन करण्डिका दत्ता, तां रिक्तामालोक्य पुनर्मार्गयति—मम रत्नानि देहि नामाङ्कितानि, स न

मन्यते स, कस्त्वं? कीदृंशि रत्नानि?, अलीकं मा ब्रूहि, मुषितोऽस्मीति वदन् शून्यमनाः, अन्यदा नृपः सभागतान्नरानपृच्छत्-किमसौ श्रेष्ठी विमना दृश्यते?, केनाप्युक्तं-यदेतेन सर्वं निर्गमितं, शून्यचित्तो जातः, ततो भूपेनाऽऽकार्य पृष्टः, सर्वस्तेन मित्रव्यतिकर उक्तः, अन्यदा सभागतान् वणिजानुक्तवान् नृपः-यन्मम जात्यरत्नानि गवेष्यन्ते, यूयमत्रैव तिष्ठत, निजाङ्गजेभ्यस्तै रत्नानि आनिन्यिरे, रत्नपञ्चकं दृष्ट्वा स्थापितं च, तस्मै दर्शितं, तेनाप्युक्तं-अमूनि मम रत्नानि, सत्यवागिति नृपो दध्यौ, प्रातः सर्वानाकार्य रत्नानि दर्शितवान् सभायां, तेनोचे-यन्मम रत्नान्यमूनि, वसुदत्तो वक्ति-मम रत्नानि, एवं परस्परं द्वयोर्विवादः, वसुदत्तेन जीर्णः श्रेष्ठी निर्दन्तो निर्द्धनो लुब्धः साक्षी समानिन्ये, तव रत्नमेकं दास्यामि, लोभात् साक्षिर्दत्ता, पश्चान्नृपेण तस्य रसनाच्छेदश्चक्रे, वसुदत्तोऽपि सर्वं गृहीत्वा देशान्निरकाशि, सोमदेवो रत्नपञ्चकं गृहीत्वा स्वगृहे गतः। कस्मिंश्चिन्नगरे गत्वा विनष्टो वसुदत्तः, पुत्रेण वसुसञ्ज्ञेन संस्कारादिकं विदधे, तत्र चिच्चकं विदधे, संवत्सरो लिखितः। अन्यदा नृपेणानायितो वसुर्मानवप्रेषणेन, लभ्यं लात्वाऽऽगमिष्यामीति निवेद्य विसृष्टो गतः, तस्यागमनादिवृत्तान्तं ज्ञात्वा मन्त्रीश्वरः पत्रमालेख्य धूपेन पत्रं पुराणं कृत्वा-वसुदत्तः पोतनतः निःस्वः समायातः, तेन कोशाद्दीनाराणां सहस्राणि दशाऽलात् तव कोशतः, स विनष्टः, तत्पुत्रो वसुर्जिगमिषुः, देव! मार्ग्यतां, तमाहूय, पत्रं दर्शयित्वा देहि मम द्रव्यं, पितृऋणं पुत्रेण बोढव्यं, तेन मित्रस्योक्तं, तेनाश्वासितः, चिच्चके संवत्सरं पत्रादर्वाकृतनं वीक्ष्य हृष्टो, वसवे कथयामास, उभावपि मिलित्वा नृपसभायां गतौ, देव! कारिमं पत्रं, पितृचच्चकादर्वाक्तनं पत्रमिति [ज्ञात्वा] नृपेण(पः)सत्यं ज्ञात्वा मन्त्रिणं सर्वस्वमादाय निर्वासयाञ्चकार, कूटलेख्यकं परिहरन् वसुर्नृपेण सत्कृत्य स्वपुरं प्रेषितः, गृहे गत्वा धर्मं प्रतिपाल्य सत्यवादी स सुगतिं ययौ इति सम्बन्धः॥ इति मृषायां वसुदत्तकथा ॥६९॥

वर्षाधर्ममहत्त्वम् ७०-मनो हि दारुवद्वक्रं, नानाभिग्रहयन्त्रतः। तपस्तापेन शनकैरभङ्गात् समतां नयेत् ॥७०॥
सर्वदा स्वमनो रोद्धव्यं, सर्वारम्भैर्विवेकिभिः। जीवाकुलासु वर्षासु, विशेषाच्छुभमिच्छुभिः ॥१॥
न्याय्यार्थोपार्जने मासान्निर्गमय्याष्ट धार्म्मिकैः। सिक्तो वर्षासु धर्मः स्यात्, सिद्धस्येवेष्टपूर्त्तये ॥२॥

वैभारगिरिपर्वते सिद्धो नाम तस्करः, सोऽन्यदा तरङ्गिण्यां नगर्यां चौर्याय गतः, एकस्य वणिजो गृहे प्रविष्टः, पुत्रः पितरं प्रति जल्पन् शृणोति-अपुण्यात् तात! मे सम्पत्, सम्पन्ना नोद्यमादपि। पतितोऽस्मि गृहद्वन्द्वे, मर्त्यजन्मफलं न मे ॥१॥ यथाऽत्र गुरवः सन्ति, धर्मो येभ्यो निशम्यते। तदादिश विधेयं मे, येनात्मा निर्म्मलो भवेत् ॥२॥ पितोवाच—व्यवसायो गृहस्थानां, भवेज्जीवनहेतवे। महाऽऽरम्भं तथाऽपि त्वं, वर्षासु मा कृथाः सुत! ॥३॥ चौरेणाप्येतच्छुतम्। किञ्च वत्स! यथाशक्त्या, कुरुष्वाभिग्रहानिह। देवपूजादिसत्कृत्ये, मुच्यसे कल्मषात्ततः ॥१॥ वणिक्पुत्रोऽभिग्रहान् पितुः पार्श्वे गृह्णाति, अहमप्येतानभिग्रहान् वृद्धपार्श्वे ग्रहीष्यामि, चौरेणोक्तं-तत्रोपदेशा मयाऽपि गृहीताः, ततस्तस्य मनसः स्थैर्यहेतवे पञ्चपरमेष्ठिनमस्कारमयः सिद्धमन्त्रो ददे, पत्रे लिखित्वा सिद्धचौरः स्वगृहं ययौ। पापकार्यं मया कार्यं, न वर्षासु स्थिरात्मना। नित्यमेकासनस्थेन, गुण्या पञ्चनमस्क्रिया ॥१॥ अभिग्रहग्रहणं, अभिग्रहस्थे तस्मिन् कुटुंबं क्रुध्यति, तत्पत्नी तत्पञ्चनमस्कृतिपत्रं गृहीत्वा कूपोपरि चलिता, अत्रान्तरे काचिद्ग्रामपतेर्भार्या गुर्व्विणी सपत्नीदत्तविषेण मृता श्मशाने संस्कारार्थमानीता, अत्रान्तरे काऽपि व्यन्तरी स्त्रीरूपं कृत्वा तान् प्रोवाच-मा रुदत, पश्यत आयाति या स्त्री तत्करेऽयं महामन्त्रोऽस्ति, तन्मन्त्रपत्रमेतस्या उदरे क्षणादामोचयत यथैषा निर्विषा भवति, स्वपद्भ्यां गृहं याति, काले पुत्रं प्रसविष्यति, तत्पत्रं तदुदरे धृतं, उत्तस्थौ सा क्षणमात्रेण, जीविता, सिद्धभार्ययाऽपि चिन्तितं-

महामन्त्रोऽयं, यत्प्रभावान्मृताऽप्यसौ जीविता, तदयं ग्राह्यो, न त्याज्य इति तं मन्त्रपदं ललौ, ततो ग्रामपतिना सिद्धभार्यायै काञ्चनं दत्तं, भर्त्तुरग्रे तया कथितं, ततो नित्यं तन्मन्त्रमाराधयति, सिद्धेन नियमाः पालिताः, वर्षानन्तरं तत्र केवली समागतः, सिद्धोऽपि तत्र गतः, केवलिनोक्तम्–महात्मन्! सिद्ध! यच्चक्रे, विशुद्धो नियमस्त्वया। लभसे तेन निर्वाणं, सम्पदां पदमात्मनः ॥१॥ इति ज्ञानिगिरा तस्य, कर्णे प्रविष्टमात्रया। निर्वास्य घातिकर्म्माणि, केवलज्ञानमाहितम् ॥२॥ एत्य देवतया लिङ्गं अर्पितं केवलिनः, ततः उपविष्टः स्वर्णसिंहासने स केवली, ततो ज्ञानी स्वयं चाख्यत् प्रतिबोधाय देहिनाम्। सिद्धोऽयं नियमान् सम्यक्, प्रपाल्य निर्म्मलोऽभवत् ॥३॥ असद्धान्चि श्रुतायां च, भाव्यस्य केवलं ततः। वयमत्रागताः स्वेन, जातामस्यापि केवलम् ॥४॥ इति, इत्थं विचिन्त्य पञ्चाक्षनिग्रहान्नियमो हृदि। योऽपि सोऽपि ग्रहीतव्यः, पुण्यानुबन्धकृन्नृभिः ॥५॥ इत्यभिग्रहविषये सिद्धचौरकथा ॥७०॥

**निर्बुद्धेर्नाशः ७१–यस्य बुद्धिः स्वयं नास्ति, हितं वा न शृणोति यः। स एव निधनं याति, यथा मन्थरकोलिकः ॥** 

राजगृहे नगरे मन्थरनामा कोलिकः, कार्यव्यग्रत्वाद्गृहान्न निर्गच्छति, तज्जाया तु स्वैरिणी, तयैकदा वेम भग्नं दृष्टं, तेन वैभाराद्रौ गतः तदर्थं, सरलतलं सच्छायं शाड्वलं वृक्षमवलोक्य तच्छेदनाय परशुमवाहयत्, ततस्तदधिष्ठाता व्यन्तरस्तं प्रत्याह–भोः! ममास्पदभूतमेनं तरुं मा च्छेदीः, अहं सन्तुष्टो, वरं मार्गय, तेनोक्तं–भार्यां परिपृच्छयाऽऽगच्छामि, आगच्छतस्तस्यान्तरा नापितमित्रं मिमेल, तच्छिक्षां श्रुत्वा भार्यां च परिपृच्छय तत्समीपे गत्वाऽऽत्मनो द्विरूपं प्रार्थयामास, तथाभूतं महताऽऽडम्बरेणागच्छन्तं नागरिकलोकस्तं हतवानिति सम्बन्धः ॥७१॥ 

**कार्ये बुद्धेः फलम् ७२–उत्पन्नेषु च कार्येषु, बुद्धिर्यस्य न हीयते। स एव तरते दुर्गं, जलान्ते वानरो यथा ॥७२॥** 

गङ्गानदीसत्कशोणद्रहोपकण्ठे महावनं, तत्र वानरो वानरीयुग् वसति स, पानियस्योपरि वटशाखायामारूढो वानरोऽन्यदा जलान्निर्गच्छन्तं कच्छपं वाचालितवान्–कस्त्वं ?, तेनोक्तं–अहं कच्छपः, तेनाप्युक्तं–त्वं कः ?, अहं वानरः, परस्परालापेन तयोः प्रीतिरवर्द्धत, अन्यदा वानरेण सहकारफलमानीय तस्मै प्रदत्तं, अत्तमतीव स्वादु, हृष्टोऽभूत् कच्छपः, एवं प्रत्यहमागत्य वार्त्तां करोति कच्छपः, अन्यदा तेन बहून्याम्रफलानि दत्तानि, निजभार्यायै त्वमर्प्पयेः, तेन तानि फलान्यर्पितानि, तया पृष्टः–केनार्पितानि ? मम मित्रेण वानरेण, सा लोभं गता, कच्छपं प्रत्याह–प्रियतम ! एतत्फलास्वादपरिपुष्टं तद्धृदयमानीय मह्यमर्प्पय यदास्वाद्य सुहितीभवामि, तेनोक्तं–वराकिके ! मित्रस्योपरि कथं विरूपं चिन्त्यते ?, मूर्ख ! मया वल्लभया चेत्कार्यं तदा तद्धृदयमानीयार्प्पय, तयेत्युदितो विच्छायः सन् तत्रायातो, वानरेण पृष्टः–मित्र ! अद्य किं विषण्णोऽसि ?, तदा तेन कौटिल्यशालिनोक्तं–मित्र ! मम भार्ययेत्युक्तमस्ति य एवं प्रत्यहमुपकरोति तस्मै प्रत्युपकारोऽस्माभिरपि कर्त्तुमुचित इत्यस्मद्गृहमेत्याऽऽतिथ्यं गृहाण, तेनोक्तं–स्थलचारी अहं, जलचारी न, तेनोक्तं–मत्पृष्ठारूढः समागच्छ, तथैव कृतं तेन, यावन्मध्यभागे समायातस्तावता कच्छपेन विमृष्टं–किमस्य द्रोहं करोमि ?, भेदं कथयामि, तेन कच्छपेन तत्सर्वं स्वरूपं भार्योक्तं कथितं, तच्छ्रुत्वा तस्य प्रत्युत्पन्नमतेस्तत्क्षणं बुद्धिरुत्पन्ना, साधूक्तं त्वया, परमत्र मम हृदयं न, हृदयविहीनं मां गृहीत्वा किं करिष्यसि ?, कथं हृदयं न ?, तेनोक्तं–न श्रुतं त्वया लोकोपाख्यानकं "वटि चित्तु ऊंबरि हियउं" हृदयेन चेत्तव कार्यं तदा मां तत्र नय यथाऽहं हृदयं प्रयच्छामि, तव कार्यं सम्पूर्णीभवति, मम जीवितव्यं च, अन्यथा द्वयोरपि न कार्यसिद्धिः, ततो जलचरेणानीय तत्रैव मुक्तः, स स्वयमुपरितनशाखायामारूढः, कच्छपस्तद्धृदयं पुनः पुनर्याचते, क्षणेनैकेन वितरिष्यामीत्युक्तोऽपि यावन्न तिष्ठति तावता वानरेण श्लोक उक्तः, शृणु–सर्वस्योप-

कृतिर्दैव !, निर्विचारं विधीयते ! स्तोकाऽपि न पुनः कर्त्तुं, युज्यते नीचसङ्गतिः ॥१॥ न स्थातव्यं न गन्तव्यं, क्षणमप्यसता सह। पयोऽपि शौण्डिनीहस्ते, वारुणीं मन्यते जनः ॥२॥ इति श्रुत्वा जगाम कच्छपः स्वस्थानं, उक्तं स्वभार्यायै: स्वस्वरूपं, वानरः सुखी तिष्ठति ॥ सम्पूर्णोऽयं सम्बन्धः ॥७२॥



## कर्मायत्तं फलम्—७३

एकेनापि नात्रकेण विदुरो मातुलो मन्दभाग्यः प्रत्यहं सेवां करोति विष्णोर्बहुद्रव्याभिलाषी, तत्सेवासन्तुष्टः षोडश गदीयाणकान् विष्णुः प्रत्यहं ददाति तस्मै, तावता तस्य कुटुम्बनिर्वाहो भवति, परं कोशे किमपि न निपतति, एकदा तेन विष्णोः पुरस्ताद्विज्ञप्तिः कृता–त्वं रङ्कमपि राजानं करोषि, राजानमपि रङ्कं करोषि, अहं तव सम्बन्धी, प्रत्यहं सेवां करोमि, ममाल्पं किं वितरसि !, तेनोक्तं–तव भाग्यदशा न, स रुष्टाऽन्यत्र राजायतने गतः, तत्रापि मानप्रसादं लभते, परं न किमप्युद्धरति, एवमपरस्थानेषु बम्भ्रम्य भूयस्तत्रैव समायातः, अग्निना दग्धानामग्निरेव शरणमिति विमृश्य भूयः कृष्णं प्रार्थयामास, यत्र यत्राहं गच्छामि तत्र तत्र त्वदीया माया मम पृष्ठिं न मुञ्चति, किं बहुनोक्तेन ?, तथा कुरु यथाऽहं सुखीभवामि, तेनोक्तं–त्वं कथिते प्रतीतिं न करोषि, आगच्छाधुना मया सार्द्धं यथा तव प्रत्ययमुत्पादयामि, इत्युदित्वाऽऽत्मना सह तं गृहीत्वा कन्यकुब्जपुरपरिसरे गतः, तत्र तस्य चतुर्वेदिनो ब्राह्मणस्य रूपं कारयित्वा आत्मनो बटुरूपं विधायोभावपि ३६ लक्षकन्यकुब्जदेशस्वामिनोऽम्बुवीचिनृपस्य द्वारदेशं प्राप्तौ, प्रतीहारेण संसारितौ, राज्ञः समीपं गतौ, चतुर्वेदाशीर्वादप्रदानेन राजा रञ्जितः, राज्ञा दानाधिकारी आहूतः–भोः ! चिष्टिकां घटान्निष्काश्य एतौ मम समीपे समानय, तेन तथा कृत्वा राज्ञः समीपे समानीतौ, वाचयत स्वचिष्टिकां, पूर्वं चतुर्वेदिना

वाचिता-षोडश गदीयानकाः, द्वितीयेन वाचिता-कोटाकोटिगदीयाणकाः,राज्ञोक्तं-चिष्टिकान्यायेन दीयतां, चतुर्वेदिनोक्तं-महाराज ! पात्रापात्रविचारणां कुरु, तेनोक्तं-नाहं करोमि, कर्म्मप्राधान्यत्वेन दानं, स तन्न गृह्णाति, ततः कृष्णः प्रकटीभूय तं प्रत्याह, शृणु-न विद्या धनलाभाय, न मौग्ध्यमसमृद्धये। आत्मानमम्बुवीचिश्च, मां दृष्ट्वा तु सुखीभव ॥१॥ एतावता तस्य प्रतीतिर्जाता, उक्तमत्र-नमस्यामो देवान्नतु हतविधेस्तेऽपि वशगा, विधिर्वन्द्यः सोऽपि प्रतिनियतकर्म्मैकफलदः। फलं कर्म्मायत्तं यदि किममरैः ? किं च विधिना ?, नमः सत्कर्म्मभ्यो विधिरपि न येभ्यः प्रभवति ॥२॥ कर्म्मैव मूलकारणमिति कर्म्मोपरिकथा ॥७३॥

निंदापापं ७४-परनिन्दा महापापं, परपापान्यहो ! यतः। अकृत्यान्यपि लिम्पन्ति, तत्कारां जरतीं यथा ॥७४॥ परनिन्दा-पापं

कार्प्पटिक एकः क्षुधातुरः श्रेष्ठिनं प्रार्थयति, श्रेष्ठिना तक्रं पायितं, तन्मध्यस्थाहिगरलेन स विपेदे, वृद्धा वदति-श्रेष्ठिना कार्प्पटिको हतः, श्रेष्ठी हत्याकारको, निन्दां कुर्व्वती सा वृद्धा सर्वत्र परिभ्रमति, सा हत्या वृद्धाशरीरे सङ्क्रान्ता, निन्दाफलं वृद्धया प्राप्तम् ॥७४॥

कूटसाक्ष्यपापं ७५-कूटसाक्ष्यात्परं पापं, न भूतं भविष्यति। रुरोद वायसो दृष्ट्वा, चरितं ग्रामवासिनाम् ॥७५॥ कूटसाक्ष्य-पापं

काको हंसेन सह मैत्रीं चक्रे, क्रमेण हंसीं कामयते, उपायचतुरः काको महाजनपार्श्वे गतः, भवद्भिर्मम पक्षपातः कर्त्तव्यो, नो चेत्सर्व्वेषामपि घटान् भङ्क्ष्यामीति, भीतैस्तैस्तस्य पक्षपातः कृतः, हंसिनी काकेन लब्धा, ततः काको रुदति, हंसो हंसिनी च, लोकैरुक्तं-भोः ! किं रुद्यते ?, हंसो वक्ति-हंसिनीकृते रोदामि हंसिन्याह-हंसकृते,काको वक्ति-महाजनकृते च, लोको वराकः कथं भविष्यति यत्र कूटसाक्षिरेवं दीयते ॥ इति कूटसाक्षिकथा ॥७५॥

अग्रशिखश्लोकार्थः ७६-अनेन तव पुत्रस्य, प्रसुप्तस्य वनान्तरे। शिखामाक्रम्य हस्तेन, खड्गेन प्रहतं शिरः॥७६॥

अत्र दृष्टान्तो यथा-वणिग्राजपुत्रौ देशान्तरे चलितौ, स्वस्वकार्यं कृत्वा देशान्तराद्व्यावृत्तावन्तराऽटव्यां तस्थतुः, राजपुत्रो लोभात्तद्व्यापादनायोत्थितो, गले पादं दत्तवान्, तस्मिन्नवसरे तेनाक्षरचतुष्टयी प्रोक्ता-मन्मातुः पुरतो निगदे, तेन व्यापादितः, तद्द्रव्यं गृहीत्वा क्षेमेण स्वपुरमाजगाम, तन्मातुः पुरस्तात्तान्यक्षराणि कथितानि, तयाऽक्षरचतुष्टयी नृपसभायां गत्वा गदिता, राज्ञा मनीषिणः पृष्टाः, ते उपायान्तरज्ञाः प्रेतालापाद्रहस्यं ज्ञात्वा सभायामेनं श्लोकं प्रकटीचक्रुः, सर्वस्वं गृहीत्वा राज्ञा स व्यापादितः, द्रव्यं तन्मातापितृभ्यो दत्तम्॥ इत्यविश्वासे कथा॥७६॥

विश्वासघाती ७७-विश्वासप्रतिपन्नानां,वञ्चने का विदग्धता?। अङ्कमारुह्य सुप्तानां, हतं किं नाम पौरुषम्॥७७॥

सेतुं गत्वा समुद्रस्य, महानद्याश्च सङ्गमे। ब्रह्महा मुच्यते पापी, मित्रद्रोही न मुच्यते॥१॥ मित्रद्रोही कृतघ्नश्च, ये च विश्वासघातकाः। ते नरा नरके यान्ति, यावच्चन्द्रदिवाकरौ॥२॥ राजंस्त्वं राजपुत्रस्य, यदि कल्याणमिच्छसि। देहि दानं च दीनेभ्यो, गृही दानेन शुद्ध्यति॥३॥ ग्रामे वससि कौमारि!, वनस्थं चरितं खलु। कपिव्याघ्रमनुष्याणां, कथं जानासि पुत्रिके!॥४॥ देवगुरुप्रसादेन, जिह्वाऽग्रे मे सरस्वती। तेनाहं नृप! जानामि, भानुमती(महिषी)तिलकं यथा॥५॥ अत्र दृष्टान्तः—

वसन्तपुरे वैरसिंहो राजा, तस्य महिषी भानुमती नाम्नी, शारदानन्दो नाम विप्रः सरस्वतीलब्धवरप्रसादः, मन्त्री मतिसागरः, पुत्रो वैजयन्तनामा, सुखेन राज्यं करोति, राजा राज्ञीलुब्धोऽत्यर्थं सभायामपि तत्सहितः समागत्योपविशति, मन्त्रिणोक्तं-देव! वयं लज्जामहे, तस्मात्पट्टे राज्ञीरूपं लिखाप्य सभायामुपविशत, तथाकृते चित्रकरपार्श्वाल्लिखाप्य रूपं शारदानन्दाय

दर्शितं, तेनोक्तं—देव! चित्रकरेण यथास्थितं रूपं कृतं, परं गुह्यस्थाने तिलकं विस्मारितं, तदानीं राज्ञो मनसि जातं—असौ पट्टराज्ञीं सेवते, अन्यथा कथं जानाति?, सरस्वतीप्रसादाद्वेत्ति,ततो राज्ञा मन्त्रिणोऽग्रे विज्ञप्तं—एनं विप्रं मारय, तेन मन्त्रिणा प्रतिपन्नं वचसा, परं मनसि विमृष्टं—यदेवं पात्रं पुनः क्व?, यस्मात्सहसाकृतमकार्यं महतेऽनर्थाय, यतः—सहसा विदधीत न क्रियामविवेकः परमापदां पदम्। वृणते हि विमृश्यकारिणं, गुणलुब्धाः स्वयमेव सम्पदः ॥१॥ इति विमृश्य तं स्वगृहमानीय गर्भापवरके कियत्कालं प्रच्छन्नं स्थापितः, अन्यदा राज्ञः पुत्रः शूकलाश्वप्रेरितोऽटवीं प्राप, अश्वो विपेदे, सिंहदर्शनान्नृपपुत्रस्तरुमधिरूढः, अग्रे वानरीदर्शनात् क्षुब्धः, तया विश्वासं ग्राहितः, तदङ्के सुष्वाप, सिंहस्तस्याः पार्श्वान्नृपपुत्रं मार्गयति स्म, सा नार्पयति कथमपि, राजपुत्रो जजागार, सा वानरी तदङ्के सुप्ता, सिंहेन प्रार्थिता, तेनाधः क्षिप्ता, सिंहेन गृहीता, तया चिन्तितं—यदनेन भव्यं न चक्रे, भोः केशरिन्! मां मुञ्च, तेनोक्तं—न मुञ्चामि, तर्हि पुच्छं गृहाण, तेन तथा कृते तं छलयित्वा तरावधिरूढा, राजपुत्रो भीतः, तयोक्तं—मा भैः, नाहं त्वत्सदृशी, न तवोपरि विरूपं चिन्तयामि, परं "विसे मेरा" इति परमार्थे ज्ञाते त्वया भोजनं करणीयं, गतः सिंहः, ग्रथिलीभूतो राजपुत्रो, बम्भ्रमीत्यटव्यां, ततस्तत्केटके सेना समायाता, तया राजपुत्रः स्वपुरमाशिश्राय, यावत्पश्यन्ति लोकास्तावद्विकलो राजपुत्रो "विश्वेमेरा" (विश्वासेन सुप्तो मया रक्षितः) इत्यक्षरचतुष्टयं विहाय नान्यद्वक्ति, सशोको लोकः, मातापित्रोरत्यर्थं दुःखं जातं, पटहो दापितः, य एनं नीरुजीकरोति तस्मै अर्द्धराज्यं ददामीति प्रतिपन्नं राज्ञा, न कोऽपि पस्पर्श पटहं, तदानीं गर्भापवरकस्थेन शारदानन्देन मन्त्रिणः पुरो निवेदितं—मन्त्रिन्! किमद्य पटहनिर्घोषः?, तेनोक्तं—एवं२ राज्ञः पुत्रो विकलो जातः, किमपि दूतभूतादि लग्नं, न कोऽपि परमार्थं वेत्ति, तेनायमुद्घोषः कृतोऽस्ति, तेनावाचि—मत्पार्श्वेऽस्ति भव्यकरणे शक्तिः, गत्वा त्वं निवेदय

भो मन्त्रिन् !, राज्ञोऽग्रे गतो मन्त्री, महाराज! मद्गृहे कनी वर्त्तते, तव पुत्रं सज्जीकरिष्यति, कन्यामुखेन परमार्थं ज्ञात्वा तदाऽऽचरत् सर्वमिति सम्बन्धः ॥७७॥

इन्द्रिय-
विवादः

इन्द्रियाणां गरीयस्त्वं ७८-स्पर्शनघ्राणचक्षुःश्रोत्ररसनाभेदानि परस्परं कलहायमानानि उपभूपं जग्मुरिन्द्रियाणि, भूपेन पृष्टानि, ततः स्पर्शनः प्राह-एतानि मदाधारेण तिष्ठन्ति, अहं चेन्न भवामि तदाऽमीषां का गतिः?, ततो घ्राणेन्द्रियेणोचे-यद्यहं सुगन्धदुर्गन्धादिस्वरूपनिर्णयं न करोमि तदा विषादिघ्राणादिना भवतां विनाशः संजायते, चक्षुराह-मां विना स्थपुटे निपततां कः को नामावलम्बनं स्यात्?, श्रोत्रमाह-द्वादशयोजनीं यावच्छब्दपरिज्ञानेऽहमेव समर्थो, न यूयम्, ततो रसना प्राह-अहं युवती, यूयं पुमांसः, का स्पर्द्धा भवद्भिः सह?, इत्युक्त्वा मौनमानाधाय स्थिता, न भुङ्क्ते, न पयः पिबति, कतिभिर्दिनैर्बुभुक्षाक्षामकुक्षीनि तानि तामाशिश्रियुः-अस्माकं त्वमेव गरीयसीति सम्बन्धः ॥७८॥

दानमाहा-
त्म्यम्

दानोपदेशः ७९-धवल्लकग्रामे सिद्ध-वीर-हरिचन्द्रनामानस्त्रयो बान्धवा द्वादशव्रतधारिणः परिग्रहप्रमाणनिरतास्तिष्ठन्ति, परोपकाररताः, अन्यदा सिद्धस्य सुप्तस्य निशीथे रणन्मञ्जरी ज्योतिषिदेवी समेयुषी, तेन पृष्टा, लक्ष्मीरित्युक्तवती, अहं तव पुण्याकृष्टा त्वत्सदने समेष्यामि, अत्रैव सरस्तीरे निधानचतुष्टयरूपा वसन्त्यस्मि, इत्याद्युक्त्वा जगाम, तेनापि बान्धवाभ्यां पुरस्ताज्जगदे तत्स्वरूपं, ताभ्यामुक्तं-किं प्रयोजनं?, यद्यागन्तुकामाऽस्ति सा तदा स्वयमेव समेष्यति, द्वितीयेऽह्नि निशीथे तया चत्वारि निधानानि तत्पल्यङ्कस्याधस्तान्मुक्तानि, प्रातर्यावत् प्रतिक्रमणानन्तरं सामायिकपारणावसरे विलोकयति तावन्निधानचतुष्टयं पश्यति स्म, बान्धवानुमत्या उपभूपं गत्वा तत्स्वरूपं जगाद, राज्ञा सोत्सवमानायितानि, निशायां तत्सदनमागच्छन्ति, एवं नवदिनी जाता, एतावता

भूपेन भाण्डागारिकः पृष्टः, देव! गमनागमनमेव केवलं, पश्चाद्राज्ञोक्तं-त्वमेव गृहाण, देहि उपभुङ्क्ष्व स्वैरं, तदा सिद्धेन प्रभुश्री-अभयदेवसूरिवचनेनैकादशाङ्गी लेखिता, वीरेण धवलिकियाच्छादिकैः श्रीशत्रुञ्जयादारभ्य गिरनारगिरिं यावद् ध्वजा वितीर्णाः, हरिचन्द्रेण उपदेशमालायाः ५४० वस्तुभिरुद्यापनं चक्रे, एवं द्रव्यं स कृतार्थं कृतवान्, गुरुभिरुपदिष्टम्-यदि भवति धनेन धनी, क्षितितलनिहितेन भोगरहितेन। तस्माद्वयमपि धनिनस्तिष्ठति नः काञ्चनो मेरुः ॥१॥ दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य। यो न ददाति न भुङ्क्ते, तस्य तृतीया गतिर्भवति ॥२॥ अधः क्षिपन्ति कृपणा, यतस्तत्र यियासवः। अन्ये तु गुरुतीर्थादौ, यदुच्चैः पदकाङ्क्षिणः ॥३॥ इत्याद्युपदिष्टं व्याख्यानावसरे, क्रमेण जिनधर्म्ममाराध्य त्रयोऽपि स्वर्गं गताः ॥इति दानोपदेशे सम्बन्धः॥

सप्तक्षेत्रीदानं ८०—वसन्तपुरे कश्चनापि श्रेष्ठी, तस्य भार्या प्रथमा धारिणी, तत्पुत्रः कमलः, अत्यन्तलक्ष्मीमाहात्म्यात्तेन द्वितीया परिणीता, तत्पुत्रो विमलः, सोऽतीव वल्लभः, कालेन यौवनभरं प्राप। अन्यदा सुखासनाधिरूढो मित्रमण्डलीपरिकलितस्ताम्बूलमास्वादयन् दानं वितरन् देशान्तरपुरुषाभ्यां दृष्टः, एकेन प्रशंसितः-धन्योऽसौ, इत्थं यौवने लक्ष्मीमुपभुङ्क्ते वितरति च स्वेच्छया विलसति, द्वितीयेनोक्तं-धिगस्य जीवितं, वप्तुरुपार्जितां लक्ष्मीं विलसति, स्वभुजोपार्जितां चेद्भुङ्क्ते तदा प्रशस्यते, यदुक्तम्-मातुः स्तन्यं रजःक्रीडा, मन्मनोल्लापभाषणम्। पितुर्लक्ष्म्युपभोगश्च, बाल्य एव मनोरमाः ॥१॥ पुनः प्राकृतेऽप्युक्तम्-बालत्तणंमि रेहइ नराणमेयं दुगं न तारुण्णे। माइथणदुद्धपाणं, पिउलच्छीए य परिभोगो ॥२॥ तत्तेनाश्रावि, गृहमेत्य पिता विज्ञप्तः-अहं देशान्तरं करोमि, तदत्यन्ताग्रहात्तद्वचः प्रमाणीकृतं, सार्थरचनां च कारयाञ्चक्रे, बहिः प्रस्थाने व्यवहारिभिः ५०० सह आवासितः, एतावता कमलेन मातुः पुरस्तान्न्यगादि-मातः! अहमपि देशान्तरे गत्वा धनं भूरि अर्जयित्वा समागच्छामि,

मात्रा जगदे-वत्स ! धनं विना न किमपि, तर्हि पितुः समीपादहमेव विमलवद्द्रव्यं ग्रहीष्यामि, वत्स ! तुभ्यं न दास्यति, एवं निषिद्धोऽपि पितुः पुरस्ताद् ययाचे धनं सः, तेनापि न किमपि प्रदत्तं, आगत्य मातुः पुरस्तादुक्तं, अत्यन्तं विषादमाप्ता, देशान्तरे तं विजिहीर्षुं ज्ञात्वा सम्बलकं दत्त्वा नमस्कारमन्त्रं चोक्त्वा प्रेषितः, विमलः सार्थे एकत्र प्रदेशेऽस्थात्, सार्थे प्रचलति कमलोऽपि पद्भ्यां प्रयाति, विमलः सुखासनाधिरूढो बन्दिवृन्दसंस्तूयमानो गच्छति, एकदा तद्दृष्टिपथमवततार, तद्दर्शनादेव सुखासनादुत्तीर्य तेन सहाधिरुरोह सुखासनं, एवमुभावपि गच्छतः, यावत्सार्थ उत्ततार, उभावप्येकत्र भाजने अश्नीतः, उभावपि तया रीत्या वेला-कूले प्राप्तौ, वाहनानि प्रगुणीकारयति विमलः, क्षणेनैकेन विमृश्य कमलो मुखं विलोकयति तावता विमलेनोचे-बान्धव ! रत्नानां ग्रन्थिर्विसस्मार भोजनावसरे मम, अतोऽहं तत्र गन्ता, तेनोक्तं-मा प्रयाहि, अहं गत्वा तमानयिष्यामीत्युक्त्वा पश्चाच्चचाल, तावता तेनाक्षिसङ्केतेन वाहनानि प्रेरितानि, तद्विलोक्य यावदागच्छति कमलस्तावन्न किमपि, पश्चाद्विलक्षो नमस्कारं स्मरन् गोर्दण्डकेन चचाल, अग्रे महत्पुरं शून्यं दृष्ट्वा मध्ये प्रविश्य राजसदनस्योपरि आरुरोह, तत्र सप्तमक्षणे (तले) उभयपार्श्वे रसाञ्जनकुम्पककलितां करभीं मनोज्ञां पश्यति स्म, एकस्य रसाञ्जनकुम्पकस्य शलाकयाऽक्षिणी अञ्जयति स्म, तत्क्षणात् सा कनी जाता, वाचालयति यावत्तावत्तया तूक्तं-अधुना राक्षसः समेष्यति, मां तथारूपां कुरु, त्वमधः क्षणं याहि, तस्मिन् गते त्वया समागन्तव्यं, एतावता राक्षसः समाजगाम, मनुष्यगन्धोऽद्य सुतरां वर्त्तते, तया तूक्तं-अहमेव मानुष्यस्मि, वार्त्तालापं कृत्वा तस्मिन् गतवति तत्पार्श्वमियाय सः, पुर-शून्यताकारणं पृच्छति स्म, वक्ति सा-अत्र पुरे मत्पिता राज्यं पालयति, अन्यदा राजपाटिकायां सैन्येन सह व्रजन् वराकं तपस्विनं संमुखमायान्तं विलोक्यापशकुनं मत्वा तं जघान नृपः, ततोऽन्यैरपि ताडितो यावद्भूमावचेतनः पपात, नृपोऽग्रे जगाम, तावता

जरत्येका समायाता तेन पथा, तृष्णातरलितेन तेन पयो ययाचे, तया नीरपानेन स्वस्थो विहितः, स मृत्वा राक्षसो बभूव, पूर्ववैरानुबन्धात् सर्वं पुरमुज्झासितं मामेकां विमुच्य, मद्विनाशाय यावदुत्तिष्ठते तावन्मत्कर्म्मवशात्तच्चेताः पश्चाद्वलति, तेनावधिना मद्भवो विविदे, ततो मां प्रति स स्निह्यति, परं त्वं मद्भणितं कुरु, यदा एष समागच्छति तदा "मामा" इत्युक्त्वाऽऽगत्य मिलनीयं, स भागिनेय इति वक्ष्यति, अहं तव वचो दृढयित्री, चिन्ता चित्ते न कार्या, व्रज त्वं मां तथारूपां कृत्वा, स समेष्यतीति, सर्वं कारणं ज्ञात्वा तेन तथा चक्रे, किन्तु तस्माद् याचिता कनी, सन्तुष्टेन तेन तस्मै परिणायिता पञ्चशतरत्नग्रन्थिसहिता, तया सह भोगान् बुभुजे, एवं तिष्ठति, एकदा तेनोक्तं–मां बान्धवेन संयोजय, त्वामहं संयोजयिष्यामि, परं तव क्लेशाय भविष्यति, क्वाऽऽस्तेऽधुना?, तेनोक्तं–समुद्रमध्येऽस्ति वाहनैः सह, मां तत्र मोचय, तेन तथा चक्रे, प्रातस्तेन भार्यायुग् बान्धव उपलक्षयाञ्चक्रे, जहर्ष सः, पश्चात्तेन तद्भार्यालुब्धेन कायचिन्ताचान्तमनाः स्वबान्धवो नीरधौ प्लावितः, बहु शुशोच सः, रत्नग्रन्थयो ५०० व्यवहारिणामर्पिताः, किमपि सङ्केतवचनं च तत्पुरस्तात् प्रोक्तवान्, तद्भाग्याकृष्टेन तेन राक्षसेन स स्वस्थाने नीतः, तैः सह क्षेमेण महता महोत्सवेन विमलः स्वपुरमाशिश्राय, पितुश्चरणावनंसीत्, सर्वमुपार्जितं पितुः पुरस्तात् ढोकयाञ्चक्रे, एषा कनी सन्तुष्टेन द्वीपेशेन प्रदत्ताऽस्ति, राज्ञः समक्षमहं परिणेष्यामि, अमी व्यवहारिणः साक्षिणः सन्ति, पिता तु प्रमुमोद, कमलमाता एकैव विषसाद पुराभ्यन्तरे, परो न कोऽपि, तदा कमलेन राक्षसः पृष्टः–कथं वर्त्तते स मद्द्रोही, तेनोक्तं–सप्तमेऽह्नि उपभूपं गत्वा व्यवहारिभ्यः साक्षि दापयित्वा कनीमुपयन्ता, मत्परिणीतां चेदुपयंस्यते स तदा मज्जीवितेन किं?, मां तत्र प्रेषय शीघ्रं २, यथा गत्वा किमप्युपायान्तरं चिन्तयामि त्वत्साहाय्यदानेन, त्वत्साहाय्यदानमेव मम त्राणमिति तन्मुखाच्छ्रुत्वा तस्मै ५०० ग्रन्थीन् अपरान् दत्त्वा स्वराक्षसवृन्देभ्य उत्पा-

टयित्वा षष्ठेऽह्नि पश्चिमरात्रौ सर्वशिक्षां दत्त्वा प्रेषयामास, क्षणेनैकेन स्वगृहे समाजग्मिवान्, तत्र रुदतीं स्वमातरं स्ववचनदानेन सन्तोष्य तान् ग्रन्थीन् गृहाभ्यन्तरे मोचयामास, बृहत्तराणि रत्नानि करे कृत्वा राज्ञः प्रतोलिकाद्वारे समायातः, द्वारमुद्घाटये-त्युक्ते यावद्द्वारं नोद्घाटयति स तावद्रत्नमेकं तस्मै उपरितनभागे चोल्लालयित्वा प्रदत्तवान्, तद्रत्नं बृहत्तरं करे कृत्वा राजा तेन जागरितः, रत्नमदर्शि राज्ञे, तद्दत्तादेशे उपराजं जगाम, रत्नानि प्राभृतीकृतानि, राज्ञा सन्तुष्टेन पृष्टः, सर्वं स्वस्वरूपमुक्तवान्, राज्ञा प्रच्छन्नः स्थापितः, प्रातर्विमलः सर्वैर्व्यवहारिभिः सह समायातः, व्यवहारिणस्तत्पक्षपातिनः कन्यकाऽर्थे विज्ञप्तिं चक्रुः, देव ! कन्या-स्वरूपं वयं सर्वे विद्मः, त्वदादेशेनासौ विमलः करग्रहीकरोतु, देशान्तरस्य स्वरूपं नाहं वेद्मि, कदाचनापि कश्चिदपर एवं ब्रूते–यदस्यैषा न भवति तदा किं ?, तैरुक्तं–सर्वं स्वं प्रयात्यस्माकं, विमलेनाप्यङ्गीकृतं तद्वचः, आनायिता कनी, स प्रकटीबभूव, सर्वे विषेदुः, परस्परं विवादोऽभूत्, तैस्तत्पक्षपातश्चक्रे, तस्मिन्नवसरे राज्ञाऽप्युक्तं–तवापि कश्चित्साक्षी वर्त्तते ?, तेनोक्तं मम जगत्कर्म्म-साक्षी सूर्य एव, नापरः कश्चित्, सर्वसंमत्याऽर्घप्रदानं तेन चक्रे सूर्यसंमुखं, तद्व्यन्तरसाहाय्यात् सूर्यः प्रोक्तवान्–कमलस्य भार्यैषा पञ्चशतरत्नग्रन्थयश्च, विमलः कपटनाटकसूत्रधारी, तच्छ्रुत्वा सर्वैरभ्युपगतं, सर्वस्वं गृहीत्वा भार्यां च स्वसदनमागात्, कमलः, स्वां लक्ष्मीं विलसति ददाति भुङ्क्ते सप्तक्षेत्रसात्करोति, तान्येवाह–रम्ये हर्म्ये (चैत्ये) तीर्थनाथस्य बिम्बे, श्लाघ्ये सङ्घे पुस्तके च प्रशस्ते । सप्तक्षेत्र्यां सत्तमं वित्तबीजं, भव्यैरुप्तं मोक्षलक्ष्मीं प्रसूते ॥१॥ इति दाने कथा ८०॥

यः सम्यक्त्वं विराधयति तद्विषये दृष्टान्तो यथा–सम्यक्त्वाराधना ८१–विलासपुरं नगरं गाथासुन्दरो नाम राजा, तस्य रत्नावली भार्या, तस्या द्वौ पुत्रौ, वसन्तसुन्दर–रत्नसुन्दरौ, अन्यदा निशीथसमये निविडकपाटं दत्तार्गलं वासभुव-

नमनुगतेन राज्ञा मध्यमवयसि प्रवर्त्तमाना गृहीतोज्ज्वलनेपथ्या प्रविष्टा दृष्टा चैका स्त्री, राज्ञा पृष्टा सा–भद्रे! का त्वं?, कस्य वा परिग्रहे?, केन वा कारणेन मनुष्यमात्रालङ्घनीयेऽस्मिन् वासभवनेऽलक्षिता चैव प्रविष्टा?, तयोक्तं–नरदेव! लक्ष्म्यहं, स्थिता प्रभूतं कालं तव गृहे, साम्प्रतं गन्तुकामया मया त्वया सह दर्शनं कृतं, राज्ञा भणितं–भद्रे! प्रार्थयामः किमपि?, लक्ष्म्या भणितं–भण, राज्ञा भणितं–षण्मासान् यावन्नाहं मोक्तव्यस्त्वया, परतस्ते यदृच्छा, प्रतिपन्नं लक्ष्म्या, प्रातः पट्टराज्ञी रत्नावली नृपेण भणिता–प्रिये! षण्मासान् यावद्देहि भुङ्क्ष्व स्वैरं च, पश्चाल्लक्ष्मीर्यास्यति, तच्छ्रुत्वा तथैव कर्त्तुमारब्धा रत्नावली, नृपोऽपि वापीकूपतडाग-देवकुलानि कारयति, दीनानाथेष्वशनवसनानि ददाति, सन्मानिताः पाखण्डिनः, कृतार्थीकृताः सुहृत्स्वजनवर्गाः, गुणग्राहिणो मागधजनाः कृताः, एकदिनावशेषा जाताः षण्मासाः, गतो रहसि, रत्नावली रजन्यां भणिता–प्रिये! यावदद्यापि लक्ष्मी न मुञ्चति तावदलक्षिताश्चैव देशान्तरं व्रजामः, यतः–ता सयणा ता मित्ता पहुत्तणं ताव आयरो ताव। कमलदलच्छी लच्छी जा पिच्छइ णिद्धदिट्ठीए ॥१॥ पुनरुक्तम्–जातिर्यातु रसातलं गुणगणस्तत्राप्यधो गच्छतां, शीलं शैलतटात् पतत्वभिजनः संदह्यतां वह्निना। शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं, येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे ॥२॥ अथ देव्या भणितं–यद्भवतां रोचते तत्क्रियतां, ततः प्रदोषेऽन्धकारे प्रवृत्ते प्रसुप्ते सकलपरिजनेऽङ्गरक्षिकाणां दृष्टिं वञ्चयित्वा ससुतां रत्नावलीं गृहीत्वा-ऽलक्षितो नृपः पश्चिमद्वारेण निर्गतः, चलितः पूर्वाभिमुखः, अतिवाह्य रजनीं दिवसं च प्राप्तो ग्राममेकं, कृतं भोजनं, तत्रैवोषितः, द्वितीयदिनेऽटवीमध्ये व्रजन् यामावशेषायां रजन्यां तस्करै रुद्धः, सम्बलकोचितानि पञ्च रत्नानि वस्त्रोपकरणानि च गृहीतानि,ततो गृहीतसर्वस्वोऽग्रे सुखालयग्रामे सरस्तीरसंस्थिते यक्षायतने भोजनसामग्रीविरहितोऽस्थात्, तावता चन्दनवणिग् यक्षनमस्कर-

णायाऽऽजगाम, वन्दितो यक्षः, दृष्टो राजा, पृष्टश्च, तेनोक्तं–अश्रुत एवास्माकं वृत्तान्तः सुन्दरः, यदि ते परोपकारबुद्धिस्तदा तथा कुरु यथैतौ बालकौ भुङ्क्तः, वणिजोक्तं–मद्गृहमागच्छ येन स्नानपानभोजनादिसामग्रीं सम्पादयामि, परगृहगमनेनालं, इह स्थितानामेवास्माकं यदुचितं तत्कुरु, तच्छ्रुत्वा गतो निजगृहं चन्दनः, स्नानभोजनादिसामग्रीं विधाय क्षिप्रमेवाऽऽगतः, भोजयित्वा सम्बलं वस्त्राणि च दत्त्वा गतः स्वगृहं चन्दनः, कृतखेदो नृपस्तद्दिनं तत्रैव स्थितः, द्वितीयदिने प्राप्तो नगरमेकं, आवासितो वटवृक्षतले, मनाक् चिन्ताचान्तो नृपः, श्लोकमेकं चिन्तयति, तद्यथा–क्व तरुरेष महावनमध्यगः!, क्व च वयं पृथिवीपतिसूनवः? । अघटमानविधानपटीयसो, दुरवबोधमहो! चरितं विधेः ॥१॥ अत्रान्तरे तत्र प्रयोजनागतसोमदेवसार्थवाहपुरुषै रत्नावली निरुपमा दृष्टा, गत्वा तैः सोमदेवस्याग्रे कथितं, संजातानुरागेण तेन तेषां पुरस्तादुक्तं–प्रयत्नः कर्त्तव्यः, प्रतिपन्नं तैः, समागता रजनी, गृहीतासिखेटो राजा जाग्रत् तस्थौ, सुताभ्यां सह देवी प्रसुप्ता, यामिन्यास्त्रयो यामा अतिवाहिताः, चतुर्थे प्रहरे देवी उत्थिता, राजा सुप्तः, देवी शरीरचिन्तार्थं स्तोकान्तरं गता, ततो गवेषयद्भिः सोमदेवसार्थवाहपुम्भिः हा आर्यपुत्र! इति प्रलपमानाऽपहृता, अर्पिता सोमस्य, तेन सन्मान्य ते विसृष्टाः, तत्क्षणादेव प्रयाणको दत्तः, तेनापि मधुरवचनैरालापिता सा–मम महिलात्वं प्रतिपद्यस्व, तया तूक्तं–ब्रह्मव्रतधारिण्यहं, कतिचिद्दिनानि विलम्बस्व, इतश्च गाथासुन्दरो नृपो रजनीविगमे प्रतिबुद्धो, न प्रेक्षते रत्नावलीं, इतस्ततो गवेषयित्वा तौ पुत्रौ गृहीत्वा प्रचचाल, गच्छतोऽग्रे जलाकुला नदी समायाता, एकपुत्रयुक् तरण्डं गृहीत्वा परतीरमियाय, द्वितीयसुतानयननिमित्तमागच्छन् सतरण्डोऽपहृतो नद्या रयेण, तृतीयदिवसे कथमपि पारं प्राप्तो, रत्नपुरनगरस्य रत्नसुन्दरोद्याने क्षुत्तृष्णाकरालितो नष्टचेतनो यावत्तिष्ठति, पुनः किञ्चिच्चेतनां वायुयोगेन प्राप्य चिन्तयति–यन्मनोरथशतैरगोचरं, न स्पृशन्ति

कवयो गिराऽपि यत्। स्वप्नवृत्तिरपि यत्र दुर्ल्लभा, हेलयैव विदधाति तद्विधिः ॥१॥ हा! क्व मे प्रिया?, क्व च तौ सर्वाङ्गसुन्दरौ मम पुत्रौ?, इति ध्यायन् पुनर्मुमूर्च्छ, तावत् सुनेपथ्या एका स्त्री समायाता, सिक्तस्तया शीतलजलशीकरैः, प्रवीजितो वस्त्राञ्चलेन, लब्धचेतनो भणितः—महाभाग! भुङ्क्ष्वेदं भोजनं, राज्ञा भणितं—का त्वं?, तया तूक्तं—लक्ष्मीः, राज्ञा भणितं—अलं ते भोजनेन, त्वमेव सकलानर्थपरम्पराकारणं इन्द्रजालिनीव विविधविडम्बनाकारणं च, हसित्वा लक्ष्मीर्भणति—लच्छी णिदाणदच्छी ण चञ्चला चञ्चलाणि कम्माणि। ताणि य अप्पा कप्पइ रूसह ता अप्पणो चेव ॥१॥ जह कोइ पामरो वाविऊण खित्तंमि कुद्दवे कडुए। फलकाले पुण मूढो सुगंधसालिं च मग्गेइ ॥२॥ देवो व दाणवो वा खयरो व नरो व रुट्ठतुट्ठो वा। कम्ममइक्कमिऊणं न देइ फलमहियमूणं वा ॥३॥ पत्थरेणाहओ कीवो, पत्थरं डक्कुमिच्छइ। मिगारी उ सरं पप्प, सरुप्पत्तिं विमग्गइ ॥४॥ तह पुव्विं किं न कयं? न वाहए जेणिमो समत्थोवि। इण्हिं किं कस्सवि कुप्पिमित्ति धीरा अणुप्पिच्छा ॥५॥ जे इह हुंति सुपुरिसा विवेइणो मुणियवत्थुपरमत्था। रूसंति ते सकम्माण न उण अन्नाण जीवाण ॥६॥ एतद् यथाऽवस्थितं वचः श्रुत्वा भुक्तं ताम्बूलं च दत्त्वाऽदृश्यीभूता लक्ष्मीः, नृपः पुनः सहकारच्छायायां सुप्तोऽहोरात्रं च,प्रातः प्रबुद्धः, कृतगोसर्गकृत्यस्तिष्ठति तत्र, तावता ग्रामानुग्रामेन विहरन्तश्चतुर्दशपूर्विणश्चतुर्ज्ञानोपगताः कनकरथाभिधानाः सूरयः समवसृतास्तत्र सुन्दरोद्याने, नागरिकलोको वन्दनार्थं सर्वः समायातः, नृपोऽपि तत्समीपमेत्य नत्वा निषण्णः, कृता धर्म्मोपदेशना गुरुणा—अहह! गृही क्व नु कुशली?, बद्ध्वा संसारसागरे क्षिप्तः। यद्यपि लभते पोतं तेनापि निमज्जति नितान्तम् ॥१॥ अथिरेण थिरो समलेण निम्मलो परवसेण साहीणो। देहेण जइ विढप्पइ धम्मो ता किं न पज्जत्तं? ॥२॥ अनया देशनया निस्तारितो लोकः, राज्ञा गृहीतं सम्यक्त्वं, रहसि पृच्छा कृता च—भगवन्!

अद्य रजन्याश्चरमे यामे सुप्तजागरतो मम केनापि पुरुषेण कनकमयसिंहासने निवेश्य सहकारमञ्जरी फलद्विकं च करतले दत्तं तस्य किं फलं ?, गुरुभिरुक्तं–अत्रैव राज्यप्राप्तिर्भार्यापुत्रमेलश्च, पुनः पृच्छा कृता–भगवन्! किं कारणं लक्ष्मीर्भूत्वा गता ?, केन कारणेन प्रचुरेऽन्तःपुरे विद्यमाने द्वौ तनयावुत्पन्नौ ?, सूरिणा भणितं, शृणु कारणं–पूर्वभवे सुसीमग्रामे सोमदत्तो नाम कुलपुत्रकस्त्वं, प्रकृत्या भद्रकः, अन्यदा भोजनवेलायां मासक्षपणपारणे गृहायातं मुनिं विलोक्योत्थितो, भोजनभाजनं गृहीत्वा श्रद्धयाऽर्द्धं मुनयेऽशनं दत्त्वा विततभावो भूयः सर्वं ददौ, अतो महाभाग! दानसमये विघटितभावत्वाल्लक्ष्मी सान्तराया संजाता। यद्द्वावेव पुत्रौ तत्र कारणमिदम्–अस्मिन्नेव भवे कुमारभावे प्रवर्त्तमानेन सवयस्येन क्रीडानिमित्तमागतेन त्वया जन्मान्तरावर्जितदौर्भाग्यदोषदूषिताया मरणमागताया वणिग्वधूभद्रायाः पुरत आत्मवधनिषेधं कुर्वन् गुणन्धरो नाम मुनिर्दृष्टः, अविनीतत्वेन अनाचारी एष इत्युपदिष्टः,अथासन्नस्थितया वनदेवतया तन्मुनिशरीरमनुप्रविश्य रे दुरात्मन्! तव कलत्रसङ्ग्रहो निष्फल इति प्रोक्तं,तत् श्रुत्वा मारणार्थं प्रधावितः, कुलदेवतयाऽधोमुखं पातितः, ततोऽनेकधा पादपतनेनोपशामितो मुनिः, तच्छ्रुत्वा देव्योक्तं–द्वावेव सुतौ भविष्यतस्तव, तत्रद कारण, तच्छ्रुत्वा सूरिं नमस्कृत्य स्तोकान्तरं गत्वा सरःपरिसरसंस्थिते वटवृक्षतले निषण्णः, अत्रान्तरे तन्नगरनृपो मृतः, पञ्चदिव्याभिमतस्तत्रैव नृपोऽभूत्, नीत्या राज्यं पालयति, अन्यस्मिन् दिने एषा गाथा चतुषु प्रतोलीषु लिखापिता–अन्नत्थ सुया अन्नत्थ गेहिणी परियणोवि अन्नत्थ। भूअबलिव्व कुडुंबं पक्खित्तं हयकयतेण ॥ १ ॥ भणिता द्वारपालाः–अपूर्वेण वाचयित्वा नगरमध्ये प्रवेशितव्यं, अन्यथा भवतां दण्डः करिष्यते, तथैव कुर्व्वन्ति सर्वे। अन्यदा दक्षिणापथप्रतिष्ठितसुप्रतिष्ठनगरात् सुमङ्गलश्रेष्ठी वसन्तसुन्दरराजपुत्रसहितोऽर्थोपार्जनहेतवे रत्नपुरमागतः, आवासितो नगरदक्षिणदिग्भागे, प्राभृतं गृहीत्वा

वसन्तसुन्दरेण साकं नृपदर्शनार्थं चलितः, प्राप्तः प्रतोल्यां, भणितो नियुक्तपुरुषैः—गाथां वाचय, वाचिता श्रेष्ठिना, पुत्रेण च बाष्पजलविलोचनेन, पृष्टः पित्रा सर्वं स्ववृत्तान्तमूचे, तत्सर्वं राज्ञोऽग्रे नियुक्तपुंभिर्भणितं, प्राप्तः सुमङ्गलः, ढौकितं प्राभृतं, गृहीतं राज्ञा, संभाषितः सादरं, निषण्णो दर्शितासने, वसन्तसुन्दरं विलोकयतो राज्ञो हृदयं विकसितं, पृष्टश्च श्रेष्ठी—तवैष पुत्रः प्रतिपन्नः ? उत औरसः ?, श्रेष्ठिना सत्यमुक्तं, ताम्बूलादिना सत्कृत्य श्रेष्ठी विसृष्टः, पुत्रः स्वसमीपे स्थापितः। एवमुत्तरपथाद्रत्नसुन्दरेण साकं मङ्गलालयः श्रेष्ठी तथैव तत्र पुरे समायातः, उत्तरदिग्भागे स्थितः, तथैव गाथां वाचयित्वा राज्ञः समीपमियाय, तथैव पुत्रं संस्थाप्य तं सत्कृत्य विससर्ज। अन्यदा सोमदेवसार्थाधिपोऽपि रत्नावलीयुग् रत्नपुरं प्रति समागच्छन्नन्तरा तमालाभिधानाटव्यां गृहीतसर्वस्वो बन्दिग्राहं गृहीतः सः, रत्नावली नंष्ट्वा ग्राममेत्य सार्थेन सह रत्नपुरं प्राप्ता, प्रतोलीद्वारे गाथावाचनपूर्वं मूर्च्छिता, राज्ञा स्वयमागत्य गजमध्यारोप्य स्वगृहमानीता, पुत्रौ दृष्टौ, आनन्दभरनिर्भरा सती राज्यस्वामिनी बभूव, सर्वैरेकत्र मिलितैः स्वस्वव्यतिकरो निवेदितः सविस्तरः, तौ श्रेष्ठिनौ सन्मान्य स्वस्वदेशे प्रेषितौ। अन्यदा चिन्तयति नृपः—सर्वं मिलितं यदि निष्कारणवत्सलश्चन्दनो वणिग् मिलति तदा चारु, इति चिन्तयित्वा सुप्तः कुसुमसुगन्धागतेन भुजगेन दष्टः, कृतोपचारोऽपि न सज्जीभूतः, ततः पटहवादनाच्चन्दनेनाऽऽगत्य राजा निर्विषीकृतः, उपलक्षितो राज्ञा, ग्रामपञ्चकं दत्तं, अन्तः २समागच्छति राजसभं, वर्द्धते गोष्ठीरसः परस्परं, अन्यदा दाहज्वरेण पीडितो नृपश्चन्दनेनागत्य जलयन्त्रं कृत्वोपशामितः, सुखमन्वभवत्, अन्यदा चिन्तितं राज्ञा—दैवी विचित्रा गतिः, यतः—अम्भोधिः स्थलतां स्थलं जलधितां धूलीलवः शैलतां, शैलो मृत्कणतां तृणं कुलिशतां वज्रं तृणक्लीबताम्। वह्निः शीतलतां हिमं दहनतामायाति यस्येच्छया, हेलादुर्ललिताद्भुतव्यसनिने दैवाय तस्मै नमः ॥१॥ अथान्यदा

प्रतिपन्नसम्यक्त्वेन राज्ञा चिन्तितं–शोभनो धर्म्मोऽमुष्य, धर्म्मार्थिना क्रियते, न दोषायेति, अनालोच्याप्रतिक्रम्य महारम्भपरिग्रहाकुलो मृत्वा रत्नप्रभायां नैरयिको जातः ॥ इति सम्बन्धः ॥८१॥

ऋद्धिमदामदफलं ८२–ऋद्धिमदे परिहारे चानुक्रमेण पवनपोत १ पवनकेतु २ वणिजोर्दृष्टान्तमाह–बाहुबलिनृपतेः पुरस्ताद् बहुलमतिर्मन्त्री निवेदयति–युष्मत्पुर्यां तक्षशिलायामनेकधनकनककोटीश्वरः पवनपोतो नाम पोतवणिक्,तस्य रूपादिगुणगणालङ्कृता प्राणेभ्यो वल्लभा धनश्रीः नाम प्रिया, निरपत्यदुःखेन कालं गमयति, यतः–अपत्यान्यङ्गशुश्रूषा, भोगः स्वजनगौरवम् । गृहकर्मनियोगश्च, स्त्रीवल्लेः फलपञ्चकम् ॥१॥ इति विमृश्य चिन्तातुरा सती सा सती अन्यस्मिन्नहनि निशायां वासभवनपल्यङ्कादुत्थायोद्यानं प्रति प्रस्थिता, भवितव्यतानियोगेन विबुद्धः पतिः, तत्केटके मन्दं २ सशङ्कश्चलितः, साऽप्युद्यानमध्यवर्त्तिनं रसालतरुमारूढा, बद्ध उत्तरीयेण कन्धरायां पाशः, तदनु सहकारशाखायां निबध्यैवमुक्तवती–भो वनदेवतास्तथा कुरुत यथा "जन्मान्तरेऽप्येष एव पतिर्भवति, न पुनर्निरपत्यता" इत्युक्त्वा मुक्तस्तयाऽऽत्मा, अत्रान्तरे हा! किमेतदिति भणन् वेगेन समागतः पतिः, कथमपि तदभिप्रायं ज्ञात्वा प्रियेणोक्तं–हे प्रिये! मा कष्टं कार्षीः, तथा यत्नं करिष्यामि यथा तव मनोरथसम्पत्तिर्भविष्यति, तच्छ्रुत्वा जहर्ष । तेनापि मन्त्रतन्त्रप्रयोगा बहवश्चक्रिरे, न जातः कोऽपि गुणः, यतः–'न चलति विधिवशाद्भाविनी कर्म्मरेखा' । अन्यच्च–विद्यारूपकलत्राणि, पुत्रजन्म निधिस्तथा । पूर्वदत्तानि लभ्यन्ते, न हि पार्थ! पराक्रमैः ॥१॥ अन्यदा कृष्णचतुर्दश्यां गृहीतबलिपूजोपचारः खड्गव्यग्रकरो धगद्धगन्तचिताऽनलं कृतान्तकङ्कालं नामोद्यानं गतः, तत्राऽऽलिखितं रक्तचन्दनेन मण्डलं, मुक्तो रक्तकणवीरपुष्पप्रकरः, दत्ता दिग्बलयः, निर्वर्त्तिताशेषकार्यश्चित्रलिखिताया देवतायाः पूजां कृत्वा वन्दित्वा

विद्याचार्यं प्रविष्टो मण्डलं, स्मृतस्तारादेव्या मन्त्रः "ॐ तारे तारे सुतारे तुरे वीरे स्वाहा" अत्रान्तरे स्फुरितदक्षिणलोचनेन समाशंसितकार्यसिद्धिर्मन्त्रं जपितुमारब्धः, क्षणान्तरे देव्या सत्त्वपरीक्षानिमित्तं भूतप्रेतवेतालयोगिनीनर्त्तनविद्युदुल्कापातनगजेन्द्रसिंहनादाद्युपसर्गा बहवः कृताः, सत्त्वान्न चलितः, ततः प्रकटीभूता कुलदेवता—महाभाग! किमर्थं स्मृता?, तेनोक्तं—पुत्रार्थं, यद्येवमग्रे विलोकयसि ज्वालाशतसङ्कुलं ज्वलनं?, तेनोक्तं—पश्यामि, तर्हि प्रविश, तद्वचनात्तेन तत्रात्मा मुक्तः, क्षणमात्रेण कुसुमश्रस्तरसंस्थितमात्मानं पश्यति, अग्रे गृहीतोज्ज्वलहारां कुलदेवीं च, कुत्र स ज्वलनः? का एषा गृहीतहारा स्त्री? इति चिन्ताकुलो देव्या भणितः—महाभाग! तुष्टाऽहं ते अनेन साहसेन, गृहाणामुं हारं, क्षिप निजप्रियाकण्ठे, पश्चात्तव हार इव बहुगुणः सद्वृत्तश्च पुत्रो भविष्यति, कृतप्रणामेन गृहीतो हारः, पुष्पादिभिरभ्यर्च्य देवता विसृष्टा, सिद्धकार्यो गृहं गतः, रात्रिवृत्तान्तः सर्वोऽपि भार्यापुरस्तादुक्तः, हारस्तत्कन्धरायां स्वहस्तेन क्षिप्तः, दिवसोऽतिक्रान्तः, रात्रौ सुरतश्रान्ता सुप्ता सा, पश्चिमनिशायां हिमांशुं मुखे प्रविशन्तं विलोक्य जजागार, प्रियस्य पुरस्तादुक्तं, प्रातः कृत्यं कृत्वा स्वप्नपाठक आहूतः, तेन सत्कृतः स्वप्नफलं व्याचख्यौ यथा—अर्हतो मातरश्चतुर्दश १४ वासुदेवमातरः सप्त ७ बलदेवमातरश्चतुरः ४ स्वप्नान् दृष्ट्वा प्रतिबुध्यन्ते, अनयाऽपि महास्वप्नं दृष्टं तद्भाव्यमुत्तमपुत्रजन्मना, द्रव्यादिभिः सत्कृत्य विसृष्टः स्वप्नपाठकः, उचितसमये प्रसूता दारकम्। अथ तद्वर्णनम्—आनन्दं जनको बिभर्त्ति हृदये स्वास्थ्यं जनन्यद्भुतं, तृप्तिं पूर्वजपूरुषाः स्वसुहृदो हर्षं विषादं द्विषः। प्रत्याशां च पितृष्वसाऽपि गुरवो देवोऽपि पूजां परां, स्तुत्याधिक्यजनाहितः किमु जनिः कल्पद्रुमेभ्योऽधिकः? ॥१॥ चन्दनं शीतलं लोके, चन्दनादपि चन्द्रमाः। चन्द्रचन्दनयोर्मध्ये, शीतलः पुत्रसङ्गमः ॥२॥ अथ कृतं वर्द्धापनकं, महोत्सवेन समये प्रतिष्ठापितं "हारप्रभ" इति नाम। इतश्च पवनपोतेन

चत्वारः पोताः प्रेषिताः द्वौ सुवर्णद्वीपे द्वौ रत्नद्वीपे, कतिभिर्मासैः सुवर्णद्वीपात् प्रतीतः पुमान् समाययौ, पोतक्षेमवार्त्ता श्रुता तन्मुखात्, तच्छ्रवणेन भृतस्त्रिभागो जठरस्य, रत्नद्वीपादप्यागतपुरुषमुखात् क्षेमवार्त्ता श्रुता, तच्छ्रवणाद् भृतो द्वितीयभागो जठरस्य, अन्यदा पुनर्विकसितवदनया दास्या द्वितीयपुत्रजन्मना श्रेष्ठी वर्द्धापितः, तच्छ्रवणाद् भृतं सर्वं जठरं, उक्तं तावता केनापि चारणेन दोधकम्-पुणु भरि २ पुणवि भरि, भरिया पुणवि भरंति। लच्छिदलिद्दह माणुसह दरिसा बडुय न दिंति ॥१॥ पुनरेकेन महापण्डितेन काव्यमेकमभाणि-ते गच्छन्ति महापदं भुवि पराभूतिः समुत्पद्यते, तेषां तैः समलङ्कृतं निजकुलं तैरेव लब्धा क्षितिः। तेषां द्वारि नदन्ति वाजिनिवहास्ते भूषिताः सर्वदा, ये दृष्टाः परमेश्वरेण भवता तुष्टेन रुष्टेन वा ॥२॥ अत्रान्तरे तत्कर्मदोषेण श्रीसमुत्थाहङ्कारचौरेण तस्य मनोरत्नमपहृतं, असमञ्जसानि वाक्यानि प्रलपितुमारब्धः-भो धणय! भणसु सच्चं पयडाओ तुज्झ सव्वरिद्धीओ। जइ पवणपोयसरिसो दिट्ठो पुहवीइ धणवंतो ॥१॥ अन्नोवि करउ कोई जयपयडं अङ्गुली इमा उब्भा। जइ पवणपोयसरिसो धणवं महिमंडले अत्थि ॥२॥ एगत्तो हिमवंतो अन्नत्तो पवणपोयपुन्नभरो। समभारभरभरकंता तेण न पल्हत्थए पुहई ॥३॥ इत्याद्यखर्व्वगर्व्वपर्व्वताधिरूढमेवमेवं जल्पन्तं दृष्ट्वा धनश्रीप्रमुखपरिजनः समाकुलीभूतः, समाहूता वैद्याः, तेषामपि पुरस्तात्तथैव जल्पति, ततस्तै रहसि धनश्रीः पृष्टा, तया च यानपात्रागमपुत्रजन्मव्यतिकरः कथितः, तैः सुचिरं विचिन्त्योक्तं-अत्र दारिद्र्यौषधिरेव हेतुः, भणितं च-जे भग्गा विहवसमीरणेण वंकं कुणंति गइपसरं। ते नूणं दालिद्दोसहीहिं पडिपन्नविज्जंति ॥१॥ एवं विभाव्य धनश्रिया समं पर्यालोच्य कृतस्तैः कूटलेखवाहकः, शिक्षितश्च-यथा त्वयेदं पवनपोतस्य पुरस्ताद्वक्तव्यं, सोऽपि तथैव प्रतिपद्य गृहीतलेखः स्तोकान्तरं गत्वा समागतो, मिलितः पवनपोतस्य, दर्शितो लेखः, सोऽप्युन्मुद्र्य वाचितुमारब्धः-स्वस्ति

तक्षशिलायां पवनपोतपोताधिपतिं जलधिजलावगूढद्वीपद्वीपाद्देवसेनप्रमुखपरिजनः सादरं सबहुमानं सानन्दं सोत्कण्ठं साश्रसं सहर्षं प्रणिपत्य विज्ञपयति, तद्यथा—सुवर्णद्वीपात् कनकेष्टाभृतौ मुक्तौ अस्माभिः पोतौ, जलधिमध्यगतानां च तस्करैः सह समागमः समजनि, तत्र चत्वारि दिनानि महासमरसङ्घट्टः समभवत्, ततः कृतान्तातिथीभूतेषु कियत्स्वपि वण्ठवर्गेषु स्वल्पीभूतेषु शस्त्रसङ्घातेषु प्रतनुतां गतेषु पानीयेषु प्रचुरत्वाच्चौरबेटिकानां गृहीतौ पोतौ, परिजनोऽपि कियानेव जीवन्नास्ते इति, एवं श्रुत्वा विषण्णः, उदरस्यैकभागो मुक्तः, द्वितीयेऽह्नि द्वितीयो लेखवाहकः समायातः, समर्प्पितस्तेन लेखो, वाचितः पवनपोतेन—स्वस्ति तक्षशिलायां पवनपोताधिपं सावरद्वीपान्नागसेनप्रमुखपरिजनः साञ्जसं प्रणम्य कार्यमावेदयति, तद्यथा—रत्नद्वीपात् पञ्चवर्णरत्नभृतौ मुक्तौ अस्माभिः पोतौ, अनुकूलपवनप्रेरितौ च कतिपयैरेवाहोभिः समुद्रमध्यमागतौ, अत्रान्तरेऽतर्कितमेव जातं मेघदुर्दिनं, तमोऽन्धकारितं, नभस्तलं, गर्जितुमारब्धो धाराधरः, उद्वेजितलोकलोचना झम्पाभिरुत्थिता विद्युत्, वातुमारब्धः प्रतिकूलः प्रचण्डः प्रभञ्जनः, विषण्णौ निर्यामकौ, स्मरणशेषतां गताः सितपटाः, अकृतसुकृतजनमनोरथा इवापान्तराल एव त्रुटिता नङ्गराः, क्वचिन्महावर्त्ते पतितौ नृत्यत इव, क्वचित्प्रबलपवनोत्क्षेपोत्पत्तिष्णुध्वजपटैर्गगनतलमुद्भ्रमिष्यत इव, क्वचित्पीतमद्यपुमांसाविव घूर्णयतः, क्वचिन्महामारुतोत्तम्भिताम्भस्तरलतरतरङ्गमालाभिरुभयपार्श्वयोर्निपतन्तीभिश्चामरोत्क्षेपमनुभवत इव, क्वचित्पवनोन्नमितोत्तमाङ्गतया समाश्रितजनरक्षणार्थमुदन्वतो जोत्करान् कुरुत इव, क्वचिच्छरणागतजनरक्षणाक्षमतया नयनयुगलगलदम्बुधाराभिरश्रून् मुञ्चत इव, क्वचित्प्रभज्यमानकठिनकाष्ठकटत्कारारवैर्निमज्ज्यमानमात्मानमालोक्य समारूढजनदुःखदुःखितानाक्रन्दत इव, क्वचिद्दिशि २ विक्षिप्यमाणपञ्चवर्णरत्नराजीभिर्जनपरित्राणार्थं जलधिभूभुजे उपदाः प्रदत्त इव, क्वचिन्मन्दगती क्वचिदुद्धतगती अनिवारितप्रसरावितस्ततः पर्यटन्तौ

सार्वरद्वीपासन्नगिरिशिखरमासाद्य झटिति शतशिकरौ जातौ, वयमप्युद्धरिताशेषपरिजनसहिताः सार्वरद्वीपे तिष्ठामः, इति श्रुत्वा द्वितीयो भागो मुक्तो जठरस्य, ततः किमपि ऋद्धिगारवपरिहारात् समञ्जसानि वचनानि वक्तुमारब्धः, अन्यस्मिन् दिने रुदनमश्रौषीत्, पृष्टा गृहदासी, तया तूक्तं-तव द्वितीयः पुत्रो विपेदे, तच्छ्रुत्वा मूर्च्छितः पृथिव्यां पपात, कथमपि लब्धचेतन एवं प्रलपितुं प्रवृत्तः-भो धणय! कहसु सच्चं सयलं महिमण्डलं नियंतेण। किं पवणपोयसरिसो दिट्ठो निब्भग्गओ भुवणे?॥१॥ अन्नोवि कहउ कोई जणपयडं अङ्गुली कया उब्भा। जइ पवणपोयसरिसो अन्नो निब्भग्गओ अत्थि॥२॥ एगत्तो हिमवंतो अन्नत्तो पवणपोयवसणभरो। समभारभरक्कंता तेण न पल्हत्थए पुहई॥३॥ हा विधेः! निष्कृप! एतावताऽनर्थेन न सन्तुष्टः?, पुत्रोऽपि मेऽपहृतः, विधिमुपालब्धवान्-शशिदिवाकरयोर्ग्रहपीडनं, गजभुजङ्गविहङ्गमबन्धनम्। मतिमतां च समीक्ष्य दरिद्रतां, विधिरहो! बलवानिति मे मतिः॥१॥ इत्यादि विलपन्तं शान्तं ज्ञात्वा वैद्यैर्धनश्रीरुक्ता-दर्शय पुत्रं, कथय पोतक्षेमवार्त्तां, तया तथैव कृतं सर्वं, जातः स्वस्थः, क्षेमेण पोताश्चत्वारः ४ समायाताः, जातः कनकरत्नानां महान् सङ्ग्रहः, भूयोऽप्यहङ्कारेण बाधितः॥ इतश्च तस्यामेव नगर्यामपरिमितधनः प्रियंवदोऽव्यसनी गुणज्ञो गुणानुरागी कृतज्ञो देवगुरुचलनकमलचञ्चरीकः परनारीसहोदरः पवनकेतुनामा सार्थवाहः सर्वलक्षणसम्पूर्णः परिवसति, कमलश्रीस्तद्भार्या, कान्तिश्रीस्तत्पुत्रिका, अन्यदा सा सखीवृन्दसहिता उद्यानमतिगता हारप्रभेण दृष्टा, तां प्रति जातानुरागो गृहमागत्य विमनदुर्म्मना अस्थात्, मित्रमुखात्तत्कारणं ज्ञात्वा पित्रा गृहे गत्वा पवनकेतुः प्रार्थितः, तेनापि दत्ता कनी इति चित्ते विचार्य-कुलं च शीलं च सनाथता च, विद्या च वित्तं च वपुर्वयश्च। एतान् गुणान् सप्त परीक्ष्य देया, अतः परं भाग्यवशा हि कन्या॥१॥ प्रारब्धा विवाहसामग्री, क्रमेणागतः परिणयनवासरः, महर्द्ध्या जातं पाणिग्रहणं, पित्रा हिर-

ण्यादि सर्वं दत्तं कान्तिश्रिये, गृहमण्डपाभ्यन्तरे वैवाहिकौ उपविष्टौ, सन्मानितो वस्त्राभरणताम्बूलविलेपनादिभिः सर्वोऽपि परिजनः, प्रारब्धं प्रेक्षणीयकं, मागधेन पठितम्—गरुओ वरस्स बप्पो, बहूऍ जणओवि गरुयओ चेव। समपुरिसाणं विहिणा घडिओ दुण्हंपि संबंधो ॥१॥ इति श्रुत्वा कोपकम्पिताऽधरेण पवनपोतेन भणितं—रे मागध! हस्तिमशकयोः कोकिलकाकयोर्हंसबकयोर्विद्याधरवानरयोर्मेरुसर्षपयोर्दिवाकरखद्योतयोः रामरावणयोः कः सम्बन्धः?, यतः—सयलनिहाणनिहाणं धणयं मुत्तूण जो थुणइ रोरं। जो वा सुणइ न वारइ ते दोऽवि अजाणुया पुरिसा ॥१॥ समहियगुणेहिं अह समगुणेहिं जो होइ इत्थ संबंधो ।सो सलहिज्जइ लोए परिणामो सुदरो तस्स ॥२॥ हीणगुणेहिं समं पुण संबंधो आममट्टियघडुव्व। विहडइ स मंडवंमि य न सुंदरो तस्स परिणामो ॥३॥ इति श्रुत्वा रङ्गभङ्गं कृत्वा सपरिजनः पवनपोत उत्थितः,असङ्गतमेतत् पुनर्मण्डपे गीयते, प्रधानपुरुषैर्विज्ञप्तोऽपि न प्रतिपद्यते, धनश्रीः कथमपि प्रेषिता, दृष्टस्तयाऽभिन्नमुखरागः पवनकेतुः, प्रशंसितश्च, सोऽपि वक्ति—मम मनसि न कोऽपि खेदः, यतः—इक्को य दो य तिन्निवि अवयरिए जे मुयंति न हु मिच्चिं। अहव उदासीणावि हु हवंति जे तेऽवि दो तिन्नि ॥१॥ उवयारकए जे हुंति सज्जणा दुज्जणा न ते सुयणा। कह तेऽवि सुयणसद्दं समुव्वहंता न लज्जंति? ॥२॥ अवयरिएवि न कुप्पइ कडुएवि पयंपिए न रूसेइ। दाणंपि जो न जोयइ सो सुयणो दुज्जणो सेसो ॥३॥ उवयारहए उवयारडउ, सव्वू कोइ करेइ। विणु उवयार जु उवयरइ, विरुली जणणि जणेइ ॥४॥ नयणहं आगइ छादुला,सव्वू कोइ करेइ। सो सज्जणु जो दूरि ठिओ,पडिवन्नउं पालेइ ॥५॥ मम पवनपोतसदृक्षः सुजनो नास्ति, भवत्या कोऽपि विकल्पो मनसि न विधेयः, यथैषा मम पुत्री सुखिता भवति तथा यत्नः कार्यः, हे पुत्रि! एहि, श्वश्र्वा सहिता श्वशुरगृहं, व्रज, कोमलवचनैस्तमाश्वास्य तां वधूं गृहीत्वा निजगृहमाजगाम धनश्रीः,पवन-

केतुः स्वजनभावेन व्यवहरति, पवनपोतोऽपि लक्ष्मीमदगर्व्वितो देवगुरुवचनेष्वनादरपरायणः कटुकवचनानि मुखे जल्पन् कालं गमयति, अन्यस्मिन्नहनि पवनकेतुरर्द्धरात्रौ वासभुवनपल्यङ्कप्रसुप्तो मनोहररूपधारिणीं श्वेतवसनां मध्यमवयसि वर्त्तमानामेकां स्त्रियं पश्यति, ततः कृताञ्जलिः पल्यङ्कं मुक्त्वा ससंभ्रममुत्थितो भणति-का त्वं ? किं कारणं ? किमर्थमायाता ?, तया तूक्तं-महाभाग ! पवनपोतगृहलक्ष्मीस्तव गृहावतरणं करिष्यामि, किमर्थं तद्गृहं परित्यज्यते ?, लक्ष्म्या भणितं-देवगुरुभक्तिरहितं, कथितं च-यत्र न स्वजनसङ्गतिरुच्चैर्यत्र नो लघुलघूनि शिशूनि । यत्र नास्ति गुरुगौरवचिन्ता, हन्त ! तान्यपि गृहाण्यगृहाणि ? ॥१॥ तदेव धन्यं नियमेन धाम, स एव धामाधिपतिः प्रशस्यः । यस्याङ्गणे यस्य दृशोः पुरस्तात्, षड्दर्शनी खेलति कार्यहेतोः ॥२॥ इति कारणात् तन्मन्दिरं मया लक्ष्म्या त्यज्यते, अन्यच्च-दन्तकलहसहितं दर्प्पान्धस्वामिकं तद्गृहमगृहं, अतश्चेत्त्वं वक्ष्यसि तदा ते गृहमवतरामि, पवनकेतुना भणितम्-आवंती न निवारउं जंती नवि धरउं, इंतिय हरिस विसाउ न जंति य मणि करउं । सुत्थी अच्छसि खणुवि न आगय मज्झ घरि । एउ जाणी जं रुच्चइ तं तुहु लच्छि ! करि ॥१॥ लक्ष्म्या भणितं-तथाऽपि समेष्यामि, इत्युक्त्वाऽदृश्यीभूता, अतः पवनकेतुः प्राभातिकं कार्यं कृत्वा कुलदेवतादर्शनार्थं मन्दिरमुपविष्टः, पश्यति कांस्यदूष्यादिधनकनकमणिरत्नपरिपूर्णं सर्वं गृहं, मनसि चिन्तयति-पवनपोतसत्का लक्ष्मी मद्गृहमालीना, अहो ! अहो ! पुण्यप्रभावः-सुकुलजन्म विभूतिरनेकधा, प्रियसमागम इष्टपरम्परा । नृपकुले गुरुता विमलं यशो, भवति धर्म्मतरोः फलमीदृशम् ॥१॥ ततः सर्व्वत्रादरं कृत्वा गृहकार्याणि करोति, पवनपोतोऽपि प्रातः स्वगृहकोशकोष्ठागाराणि शून्यानि दृष्ट्वा मनसि खेदमुद्वहति, तां लक्ष्मीमुपालम्भते च-स्वर्णभूषणमणेः कमलायाः, यल्लपंति चपलेत्यपवादम् । दूषणं जलनिधेर्जनिकर्तुर्यः पुराणपुरुषाय ददौ माम् ॥१॥ सायरु बप्पु मुरारि पिउ, चंदा जे बड्डु भाउ ।

लच्छी हींडइ घरिहिं घरु, महिला एउ सभाउ ॥२॥ सीयह तीरह पाणीयह, एत्रिहु[जण] एक्कु सभाउ। ऊंचा ऊंचा परिहरइ,नीचा ऊपरि ठाउ ॥३॥ पुनराह पवनपोतः—हे लक्ष्मि! क्षणिके स्वभावचपले! धिग् मूढि! पापाधमे! न त्वं पुंस्त्वविशेषमिच्छसि खले! प्रायेण दुश्चारिणी। ये ये पण्डितसत्यशौचनिरता ये चापि धर्म्मे रतास्तेषां लज्जसि निर्घृणे! गतभये! नीचो जनो वल्लभः ॥४॥ कियता कालेन लक्ष्म्या त्यक्तोऽकृतपरलोककार्यो मृत्वा दुर्गतिं प्राप॥ अहह! विधेर्विलसितम्—कोऽर्थान् प्राप्य न गर्व्वितो? विषयिणः कस्याऽऽपदोऽस्तं गताः?, स्त्रीभिः कस्य न खण्डितं भुवि मनः? को नाम राज्ञां प्रियः?। कः कालस्य न गोचरान्तरगतः? कोऽर्थी गतो गौरवं?, को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान्? ॥१॥ अथ पवनकेतुरपि लक्ष्मीं प्राप्य विशिष्य देवगुरुचलनेषु नमति, भक्तिं करोति, स्वजनबन्धून् मानयति—जह जह वड्ढइ विहवो तह तह धीरा नमंति सविसेसं। जह जह नमंति तह तह विहवोऽवि समग्गलीहोइ ॥१॥ भुवणोवयारदुत्थियदेहा अवगणियगरुयनियकज्जा। नणु पवणकेउसरिसा पुरिसा महिमंडले विरला ॥२॥ विरला जाणंति गुणा विरला पालंति निद्धणा नेहा। विरला परकज्जकरा परदुक्खे दुक्खिया विरला ॥३॥ पवनकेतु-सदृक्षाः पुरुषाः स्तोकाः, पवनपोतसदृक्षाः सर्वत्र सुलभाः, यतः—मा बहउ कोइ गव्वं गुणेहिं विहवेहिं मह समो नत्थि। गरुयाणवि जं गरुया गुणिणो धणिणो य दीसंति ॥४॥ न गर्व्वः सर्व्वथा कार्यो, मां विना न भविष्यति। विनाऽर्क वर्त्तते दीपैररघट्टैर्विनाऽम्बुदैः ॥५॥ गरुएवि विहवसारे निरहंकारेण होइ होयव्वं। जह पवणकेउणा तह नरेण अप्पहियकामेण ॥६॥ तच्छ्रुत्वा बाहुबली तद्दर्शनोत्सुको जातः, ततो मन्त्रिणा द्वारपालक आहूतः—अरे! पवनकेतुं शीघ्रं समानय, गृहीतप्राभृतः सोऽप्यागत्य मिलितः, आलापितश्च, स्वाङ्गलग्नवस्त्राभरणैः सत्कृत्य धर्म्मचक्रपूजायां न्ययोक्षीदिति सम्बन्धः ॥८२॥

बोधिदुर्लभत्वं ८३—

**सुलहो विमाणवासो एगच्छत्ता य मेइणी सुलहा। दुलहा पुण जीवाणं जिणिंदवरसासणे बोही ॥८३॥**

भो ! कुरुकुमार ! सामग्री दुर्लभा, तद्विषये पञ्चजनानां दृष्टान्तं शृणु—अत्रैव संसारपुरं नाम नगरं, तत्रोपरतजननीजनकाः अभव्य १ दूरभव्य २ भव्या ३ ऽऽसन्नभव्य ४ तद्भवसिद्धि ५ अभिधानाः पञ्च कुलपुत्रकाः परिवसन्ति स्म, इतश्च नरकपुर १ तिर्यक्पुर २ मनुष्यपुर ३ देवतापुर ४ सिद्धिपुर ५ निवासिनो महामोहा १ ऽतिमोह २ सन्मोह ३ क्षीणमोहा ४ मोह ५ नामानः पञ्च सार्थवाहाः नरकगति १ तिर्यग्गति २ मनुष्यगति ३ देवगति ४ सिद्धिगति ५ नामिका निजनिजकन्यका गृहीत्वा समुचितवरान् गवेषयन्तः संसारपुरमाजग्मुः, इतस्ततो वरगवेषणं कुर्व्वद्भिर्दृष्टा धर्म्मविचारं कुर्वन्तः पञ्च कुलपुत्रका अभव्यादयस्तैः, किं प्रजल्पन्त्यमी ?, समीपतरीभूय श्रोतुमारब्धा महामोहादयः, आदावेवाभव्येन भणितं—न धर्म्मो न धार्म्मिका न परलोकः, एवमेव धूर्त्तवञ्चितो लोकः परमार्थमजानन् धर्म्मग्रहिलः परिक्लिश्यति, महामोहेन चिन्तितं—उचितो मम पुत्र्या एष वरः, दूरभव्येन भणितं—खादतां पिबतां यो धर्म्मः स धर्म्मः, स पुनरतिमोहस्य चित्ते चटितः, आसन्नभव्येन भणितं—धर्म्म एव सकलसुखकारणं तस्मिंश्चैवादरः कर्त्तव्यः, तेन पुनर्म्मोहस्य मानसं रञ्जितं, तद्भवसिद्धिकेन भणितं—सदा पुरुषेण सकलसावद्यविरतिरूप एकान्तहितस्तीर्थकरपरमपुरुषसेवितो धर्म्मश्च कर्त्तव्यः, स पुनः क्षीणमोहेन निजपुत्र्या वरः कल्पितः, मिलिताश्चैवं भणिता अभव्यादयो महामोहादिभिः—वयं निजनिजपुत्रिकां युष्मभ्यं ददामो(द्मो),न युष्माभिस्तासामाज्ञाखण्डनं विधेयं,प्रतिपन्नं तैः,परिणीताऽभव्येन महामोहपुत्री नरकगतिनाम्नी, तथा दूरभव्येनातिमोहतनया तिर्यग्गतिका, भव्येन संमोहसुता मनुष्यगतिका, आसन्नभव्येनापि मोहपुत्री

देवगतिका, तद्भवसिद्धिकेन पुनः क्षीणमोहपुत्री सिद्धिगतिका च, एवमनुक्रमेणानुरूपवधूवरसङ्गमेन प्रमुदितचित्ताः स्वस्वनगरेषु गताः, अभव्यादयोऽपि निजभार्यायुक्ता विषयसुखमनुभवन्तः कालं गमयन्ति, उक्तञ्च—यथा हि कश्चित् क्षुदुपद्रुतः श्वा, शुष्कास्थि संखाद्य विचूर्णितास्यः। स्वं शोणितं विन्दति तत्प्रसूतं, तथेन्द्रियान्धः पुरुषोऽङ्गनाभ्यः ॥१॥ अन्यदाऽर्थोपार्जननिमित्तं सर्वसंमतेन भाण्डसङ्ग्रहं कृत्वा निजनिजकलत्रयुजः पञ्चभिः पोतै रत्नद्वीपं चलिताः, कृतजलसामग्रीका अनुकूलपवनप्रेरिता गरुडपोता इव गन्तुं प्रवृत्ताः, अत्रान्तरे पाञ्जरिकपुरुषैर्दूरादेव कृष्णमेकं खण्डं दृष्टं,तद् दृष्ट्वा भणितं तैः—प्रवर्द्धमानं न सुन्दरमेतत्, तस्माल्लम्बयत लम्बनानि मुकुलयत सितपटान् स्थापयत भाण्डानि स्थिरीकुर्वीत पोतान्, अन्यथा विनष्टा यूयं, तैस्तथैव कृतं, तत्पुनर्मेघखण्डं जलनिपतित-तैलबिन्दुरिव विस्तृतं, विद्युदुद्योतगलगर्जितपूर्वकं मुशलप्रमाणधाराधोरिणीभिर्वर्षितुमारब्धो जलदः,किं कर्त्तव्यविमूढा देवगुरुस्मरण-परायणा यानपात्रजनाः संवृत्ताः, उपरि निपतज्जलप्रवाहपूरितमध्याः स्मरणशेषाः पञ्चापि पोता अभूवन्, यानपात्रजनः सर्वोऽपि सभाण्डो विनष्टः, अभव्यादयोऽपि भवितव्यतानियोगेन समासादितफलहखण्डाः सहचरीभिः सहिता मच्छकच्छपपुच्छच्छटाच्छोटितशरीरा जलसर्प्पैः पीड्यमाना मकरैः खण्ड्यमाना विमुक्तजीविताशा दैवयोगेन कन्थारिकुडङ्गं नाम द्वीपं प्राप्ताः, इतस्ततः पर्यटन्त एकत्र पञ्चापि मिलिताः, गृहाकारास्तत्र कुडङ्गा दृष्टाः, कपिकच्छूकुडङ्गायां नरकगतिसहचारिणीयुग् अभव्योऽस्थात्, कन्थारिकुडङ्गायां तिर्य्यग्गतिभार्यायुग् दूरभव्यः, बदरीकुडङ्गायां मनुजगतिप्रियायुक्तो भव्यः, कादम्बरिकुडङ्गायां देवगतिवल्लभायुग् आसन्नभव्यः करुणाकुडङ्गायां सिद्धिगतियुक् तद्भवसिद्धिकः, ततस्ते किञ्चिल्लब्धसौख्याः क्षुत्पिपासापीडिताः फलानि विलोकयितुमारब्धाः, दृष्टं क्वापि क्षारजलं तत्पीतं, अन्यत्र फलानि लब्धानि तान्यत्तानि, एवं च कतिचिद्दिनानि यान्ति तेषां तत्र वसतां, सुखेन वसत-

स्तत्राभव्यदूरभव्यौ, मध्यस्थो भव्यः, आसन्नभव्यो दुःखमिव मनुते, तद्भवसिद्धिको महादुःखेन वसति, अन्यदाऽनुकूलपवनप्रेरिताः पल्लवितुमारब्धास्तद्वीपपादपाः, हर्षितोऽभव्यो, भणितुमुद्यतः—प्रथमं पल्लवाः पश्चात्पुष्पाणि फलानि च भविष्यन्ति, अस्माकं कल्याणमुपस्थितं, अनुमनितं तद्वचो दूरभव्येन, मध्यस्थो भव्यः, आसन्नभव्यतद्भवसिद्धिकाभ्यां भणितं—यद्येवं सुखं नास्ति, दुःखं, ततो निजनिजकुडङ्गस्थानानि रक्षन्तस्तरोरुपरि भिन्नपोतचिन्धं बन्धयित्वा ते कालं निर्गमयन्ति, अन्यदा तत्रायातेन सुवृत्तनाइत्तकेन करुणापूर्णहृदयेन निजनिर्यामकपुरुषाः प्रेषितास्तान् प्रति, गतास्तच्चिन्धस्थाने, ते दृष्टा अभव्यादयः, कथितो नाइत्तकवृत्तान्तः, आगच्छत यूयं यथा प्रापयामः, तच्छ्रुत्वाऽभव्येन प्रियामुखं विरूपं दृष्ट्वा भणितं—अत्रैव सर्वं सुन्दरमस्ति मे, नागमिष्याम्यहं, दूरभव्येनोक्तं—चिरतरेण समेष्यामि, भव्येनोक्तं—कतिचिद्वर्षावसाने, आसन्नभव्येन भणितं—आगन्तुकवर्षे समेष्यामि,तद्भवसिद्धिकेन भणितं—युष्माभिः सहावश्यमेवैष्यामि, निर्यामकैः सह बेडायामधिरुह्य शीघ्रमेवागत्य नाइत्तकस्य मिलितः, तेन वृत्तान्तः पृष्टः, कथितस्तद्भवसिद्धिकेन, कुशलेन प्राप्तास्तटं, मिलितस्तद्भवसिद्धिको निजसुहृत्स्वजनानाम्। भगवता भणितं—कुरुकुमार! साम्प्रतमुपनयं भृणु, य एष जन्मजरामरणरोगशोकाकुलो महाजलनिधिः स संसारोदधिः, यः पुनरिष्टवियोगानिष्टसंप्रयोगदारिद्र्यदुःखसमाकुलः कन्थारिकुडङ्गद्वीपोऽसौ मानुष्यजन्म, ये पञ्च पुरुषास्ते पञ्चगतिगामिनः,तेषां कपिकच्छूकन्थारिबदरीकादम्बरीकरुणातुल्याः स्त्रियः, जे हुंति उत्तमनरा पडिबंधो ताण भावओ होइ। कल्लाणकारिणीए सिद्धिगईए सदा कालं ॥१॥ फलतुल्यानि तासां पुत्रभाण्डानि, नाइत्तकसदृक्षो धर्म्माचार्यः, निर्यामकसदृक्षाः साधवः, तरीसमाना सर्वसावद्यविरतिः, तीरसदृक्षं निर्वाणं मोक्ष इति। संसारदुक्खतविए जीवे तारंति ते महासत्ता। निज्जामयसारिच्छा सुसाहुणो तेण वुच्चंति ॥२॥ भोः! स्वल्पा भोगाः, इमान् मुक्त्वा धर्म्मः

कुरुत, प्रमादं दूरतो मुक्त्वा, वाञ्छितार्थविधायिनि। कल्याणकदलीकन्दे, धर्म्मे यत्नो विधीयताम् ॥३॥ भवकोटीदुष्प्रापामवाप्य नृभवादिसकलसामग्रीम्। भवजलधियानपात्रे धर्म्मे यत्नः सदा कार्यः ॥४॥ येन शिवं प्राप्नुत, इत्यादि श्रुत्वाऽभव्यो भणति-को मोक्षः? केन वा दृष्टः?, एवं स विषयकर्दमासक्तोऽवगणितसिद्धिसुखः संसारकान्तारं भ्रमिष्यति १। दूरभव्योऽपि श्रुत्वेति ब्रूते-अधुना गर्भभरालसा भार्या पुत्रः शिशुः कनी अपरिणीताऽस्ति गृहसौस्थ्यं कृत्वा भवद्वचः करिष्यामि, एवं सति पुनरपि मुनिना यदा भण्यते यदपि तदप्यालम्बनं करोति, एवं गृहवासं त्यक्तुमक्षमो दूरभव्यः २। तृतीयो भव्यः साधोः पुरस्ताद् ब्रूते-सप्ताष्टवर्षाणि गृहवासं प्रतिपाल्य भवतामाज्ञां निःसंशयं करिष्यामि ३। आसन्नभव्य उपदेशं श्रुत्वा भणति-ऐषमोवर्षे निश्चयेन दीक्षां कक्षीकरोमि ४। तद्भवसिद्धिको धर्म्मोपदेशं श्रुत्वा वदति-दयां कृत्वा शीघ्रं शीघ्रं मह्यं दीक्षां दद्ध्वं, चक्कहरहलहराणं देवासुरखेयराण रिद्धीओ। लब्भंति सुहेण पुणो सुहगुरुणो नेव लब्भंति ॥१॥ सुलहो विमाणवासो एगच्छत्ता य मेइणी सुलहा। दुलहा पुण जीवाणं जिणिंदवरसासणे बोही ॥२॥ स सद्गुरूणां पार्श्वे दीक्षां प्रतिपद्य द्वितीयभवे सुरत्वं प्राप्य तृतीयभवे सिद्धिगन्ता, भव्यः सप्ताष्ट भवान् परिभ्रम्य संसारं पश्चात्सिद्ध्यति, दूरभव्यश्चातुर्गतिकं भवं परिभ्रम्य सामग्रीं लब्ध्वाऽनन्तेन कालेन सिद्ध्यति, यः पुनरभव्यः स न कदाचित्सिद्ध्यति, सङ्गमककालसूरिकाऽङ्गारपालककपिलावत्, इति श्रुत्वा कुरुकुमारः प्रतिबुद्ध ॥८३॥

लक्ष्मीविकारः ८४-अथ केरलकुमारपुरस्ताद्भगवांल्लक्ष्मीविकारसंसूचकं दृष्टान्तं वक्ति, तदेवाह-श्रूयतां भोः! भोः! सामाजिकाः! शृण्वन्तो भवन्तः-भोगपुरे नगरे शुचिबुद्रश्रीदेवाभिधानौ वणिक्पुत्रौ वसतः, द्वयानां गृहे पितुरुपार्जिता लक्ष्मीर्वर्त्तते, शुचिबुद्रोऽत्यन्तशुचिवादी जलभृतताम्रभाजनकरः परिभ्रमति, अन्यदा तद्गृहे मातङ्गा दीनारान् गृहीत्वा समायाताः,

तैस्तद्गृहिणी लक्ष्मीः पृष्टा–क्व शुचिबुद्रः ?, तया तूक्तं–गृहमध्ये तिष्ठति, ते दीनारान् विमुच्य जग्मुस्तां साक्षिणीकृत्य, प्रियया तत्पुरस्तादुक्तं, स दीनाराणां समीपे समागतः, तेन पृष्टा भार्या–त्वया जलयोगः कृतो न वेति ?, तया तूक्तं–न कृतः, नास्ति शौचं त्वद्गृहे इति वदता तेन वामपदाद्दीनाराः प्रेरिताः, लक्ष्म्या चिन्तितं–अयोग्योऽसौ दुरात्मा यन्मां वामपदेन प्रेरयति, मया तथाऽसौ कर्त्तव्यो यथैष पाणपादुके वहति, इति विचिन्त्य लक्ष्म्या तद्गृहं मुक्तं, जातः सुहृत्स्वजनानामनादरस्थानं–तावद्गुणा गुरुत्वं च, यावन्नार्थयते परम्। अर्थी चेत्पुरुषो जातः, क्व गुणाः ? क्व च गौरवम् ? ॥१॥ अत्थह गारवु नहु नरह, नरह कि गारवु होइ ?। अत्थविहूणह माणुसह, वात न पुच्छइ कोइ ॥२॥ अथार्थार्थी महीमण्डलं भ्रमन् निष्फलव्यवसायो निजदेशाभिमुखं प्रति निवृत्तः, निरशनः सकलं दिनमतिवाह्य नगरासन्नाडम्बरयक्षदेवकुले क्षुधार्त्तो दीर्घमार्गपरिखेदितशरीरो निषण्णो यावत्तिष्ठति तावदागत एको मातङ्गः, पूजितस्तेनाडम्बरयक्षः, प्रणामं कृत्वा उपविष्टो मण्डपे, लिखिता मण्डले यक्षिणी, कृतः पूजोपचारः, स्मृतो मन्त्रः, क्षणान्तरे समागता यक्षिणी, भणिता मातङ्गेन–भगवति ! मम कृते सकलसमीहितार्थसाधकं विलासभवनं निर्वर्त्तय, तया तथैव कृतं, ततो भुक्त्वा वराहारं विहितवरविलेपनो वरवस्त्राभरणविभूषितः सन्निहितपुष्पताम्बूलः सुहृत्स्वजनसहितो विलसितुमारब्धो, न त्वेकाकी–पात्रे त्यागी गुणे रागी, भोगी परिजनैः सह। शास्त्रे बोद्धा रणे योद्धा, पञ्चाङ्गः पुरुषः स्मृतः ॥१॥ ततः कृतकार्येण सर्वं विसर्जितं, पश्चाच्चिन्तितं शुचिबुद्रेण–अहो ! महातिशय एष मातङ्गः, तस्मादेतस्य सेवां करोमि, तथैव कर्त्तुमारब्धः, मार्गानुलग्नः पादुके वहति, एवं कुर्व्वता तेनाऽऽवर्जितं मातङ्गमानसं, अन्यस्मिन् दिने मातङ्गेन भणितं–भोः ! किं कारणमनुचितोपचारं करोषि ?, तेनोक्तं–दारिद्र्योपद्रुतोऽर्थार्थी सकलं महीमण्डलं भ्रमित्वाऽसम्प्राप्तवित्तो निजदेशं प्रति प्रस्थितः, साम्प्रतं भवितव्यता-

नियोगेन तवानुभवं दृष्ट्वा एवं सेवितुमारब्धः, तस्मात्प्रसादं कृत्वा निस्तारय मां दारिद्र्यसमुद्रात्, मातङ्गेन भणितं–इमां विद्यां गृहाण, महाप्रसाद इति भणित्वा गृहीता शुचिबुद्रेण, कथितः साधनविधिः, कृतार्थमात्मानं मन्यमानो गतो निजगृहं शुचिबुद्रः, कृता साधनसामग्री, लिखितं मण्डलं, आलिखिता तत्र यक्षिणी, विहितपूजोपचारो यावन्मन्त्रं स्मरति तावन्मन्त्रपदं विस्मृतं, विलक्षवदनः पुनर्मातङ्गसमीपं गतः, पृष्टो मातङ्गेन–किमागमनकारणं?, कथितो यथावस्थितो वृत्तान्तः, करुणार्द्रहृदयेन तेनोक्तं–विद्यां गृहाण विद्याऽभिमन्त्रितपटं वा, प्रणामपूर्वं विद्यापटो गृहीतः श्रुति(शुचि)बुद्रेण, निजदेशाभिमुखं प्राचालीत्, अन्तरा तस्करैः पटो जगृहे, दीनवदनः पुनर्व्यावृत्तः श्रुति(शुचि)बुद्रः, समागतो मातङ्गपदमूले, कथितः पटव्यतिकरः, पुनस्तेन विद्याऽभिमन्त्रितो घटो दत्तः, कथितो विधिः, सोऽपि तं गृहीत्वा निजगृहं गतः, यथाविधि पूजयित्वा प्रार्थितो घटः, दत्तं घटेन यत्प्रार्थितं, ततः सुहृत्स्वजनादि भोजयित्वा तन्मध्यस्थो हर्षप्रमुदितचेता घटं स्कन्धे कृत्वा नर्त्तितुमारब्धः, स्कन्धात्पतितो भग्नश्च, पुनर्गतो मातङ्गसमीपं, तेनोक्तं–एतावती विद्या मत्समीपे, नातः परं मत्समीपे समागन्तव्यमिति भणित्वा विसर्जितो, गतो दिनमतिवाह्य निजगृहं सः, रजन्यां सुखप्रसुप्तः श्वेतवसनां मध्यमवयःप्रवर्त्तमानां नारीमेकां पश्यति, ससंभ्रममुत्थितः, कृत्वा प्रणामं पृष्टवान्–का त्वं?, तया तूक्तं–या त्वया पादेन प्रेरिता सैव त्वद्गृहलक्ष्मीः, तेनोक्तं–क्व गताऽसि?, तया तूक्तं–मातङ्गगृहे, तेनोक्तं–को मातङ्गः?, लक्ष्म्या भणितं–यस्य सेवां कुर्व्वता उपानहौ वहता त्वयाऽऽत्मा परिखेदितः, पुनस्तेनोक्तं–किमर्थमागता?, तया तूक्तं–तव शौचदर्शनार्थं, इत्युक्त्वाऽदृश्यीभूता, श्रुति(शुचि)बुद्रः क्लेशसम्पादितप्राणवृत्तिः सकललोकहसनीयः कृच्छ्रेण कालं गमयति स, तस्मात् कुमर! एतत्पर्यवसाना लक्ष्मीः ॥८४॥

श्रीदेवोऽपि द्वितीयवणिक् परिहृतान्यदैवतोऽन्वहं लक्ष्मीमाराधयति, यतः—सर्वासामपि देवीनां, लक्ष्मीः श्रीरेव देवता। यया विनां न जायन्ते, तासां पूजादिकाः क्रियाः॥१॥ इति कारणाल्लक्ष्मीप्रतिमाया गन्धधूपपुष्पादिभिः पूजां करोति, अन्यदा प्रसन्नाननां लक्ष्मीं विलोक्य पृच्छति, लक्ष्म्या ऊचे—यत्त्वमरिहन्तादीन् देवान् परित्यज्य ममार्चनमेव करोषि (तत् वरं परं) यन्मम स्थिरत्वं तत्पुण्यप्राग्भारवशेनैव, यतः—छिन्नमूलो यथा वृक्षो, गतशीर्षो यथा भटः। धर्महीनो धनी तद्वत्, कियत्कालं ललिष्यति ?॥१॥ न पुनः पूजोपचारेण, श्रीदेवेन भणितं—त्वत्पूजापरायणस्य मम यद्भवति तद्भवत्विति तथैव श्रियः शुश्रूषां कुर्व्वतस्तस्य व्रजन्ति वासराः पुण्यभासुराः, अन्यस्मिन्नहनि श्याममुखीं लक्ष्मीं दृष्ट्वा पृच्छति—भगवति! अद्य त्वं विलक्षवदनेव दृश्यसे, किं कारणं ?, तया तूक्तं—एष तव गृहे पुत्रो जातस्तस्मात्त्वद्गृहं मोक्तुकामा एवंविधा जाता, यतः—सो कोऽवि घरे जायइ सलक्खणो मणुयतिरियमज्झंमि। जेण घरमागएणं भीयव्व पलायए लच्छी॥१॥ श्रीदेवेन भणितं—क्व गच्छसि ?, तया तूक्तं—अस्मिन्नेव नगरे जन्मान्तरदत्तमुनिदानोपार्जितविशालभोगो भोगदेवो यथार्थनामा सार्थवाहोऽस्ति तत्रैव, गता, कतिचिद्दिनमध्ये हिरण्यादिना वृद्धिमाप स भोगदेवः, यतः—दानेन भोगान् दयया सुरूपं, ध्यानेन मोक्षं तपसेष्टसिद्धिम्। पुण्येन लक्ष्मीं प्रशमेन पूजां, वृत्तेन जन्माग्र्यमुपैति धीरः॥१॥ अन्यदा समागात्केवली, लोकास्तं वन्दनाय निसस्रुः, भोगदेवोऽपि भोगवत्या समं गतः, कृता भगवता धर्म्मदेशना—तृष्णां छिन्द्धि भज क्षमां त्यज मदं पापे रतिं मा कृथाः, सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनम्। मान्यान् मानय विद्विषोऽप्यनुनय प्रच्छादय स्वान् गुणान्, कीर्त्तिं पालय दुःखिते कुरु दयामेतत् सतां चेष्टितम्॥१॥ अवसरं प्राप्य पृष्टो भोगदेवेन केवली—भगवन्! दानस्य किं फलं ?, केवलिना भणितं—विशालशाले नगरे सव्ययशीलसार्थवाहकर्म्मकरो दुर्गत-

पातकः प्रष्टव्यः, कतिचिद्दिनानन्तरमन्यत्र विजहार मुनिः, एवंविधा एवोद्दण्डविहारिणो भवन्ति सुसाधवः, यतः—अह सुहगुरु परिवारस्यउं, विहरइ गामो गामि। असती मनु सुविहिय पवनु, न रहइं एकइं ठामि ॥१॥ भोगदेवोऽपि भार्यया सह गतो विशालशालनगरे, भवितव्यतानियोगेन प्रविशता दुर्गतपातकगृहिणी दुर्गिला दृष्टा, पृष्टा च—भद्रे! क सञ्चयशीलसार्थवाहगृहं?, तया भणितं—आगच्छ दर्शयामि, गतौ तौ, पृष्टा सञ्चयशीलगृहिणी धनश्रीः—युष्मद्गृहे दुर्गतपातकः कर्म्मकरोऽस्ति?, तया भणितं—आसीत् पूर्वं, साम्प्रतं नवमो मासो वर्त्तते तस्य मृतस्य, धनश्रिया भणितं—किं ते प्रयोजनं?, भोगदेवेनापि कथितः केवलिकथनवृत्तान्तः, अत्रान्तरे समागतः सञ्चयशीलः, दर्शितमेकं गृहं भोगदेवस्य, स्थितस्तत्र स सभार्यः, अन्यदा धनश्रीः पुत्रं प्रासूत, गृहदास्या श्रेष्ठी वर्द्धापितः, स पुनरर्थव्ययभीरुर्मौनमस्थात्, दासी विलक्षवदना प्रतिनिवृत्ता, सार्थवाहो गृहान्निर्गत्य बहिर्गतः, अन्यस्मिन् दिने सार्थवाहो भार्यया भणितः—अपुत्राया मम पूत्रोऽभूत् त्वं दानभोगभीरुः किं करिष्यसि लक्ष्म्याऽनया भारभूतया?, अहो धव! पूर्वं केनापि कृपणेन स्वमित्रस्य कृपणस्यैतद्वचसा शिक्षा दत्ताऽऽसीत् क्वापि मिलिते सति मित्रे, का?, तदेवाह—कविणु पुच्छइ अन्नकविणस्स, काइ भाई! दूमणउं?, मग्गियं तुमा दिन्नु कस्सवि?, नहु भाई य दिद्धु मइं, अवरु देइ मह हियउं फुट्टइ। तस्सु दियं तह पिक्खि करि, लंघण चारि करेउं। अहवा भाई! तिणि समइं, झंपहु आसणि लेउं ॥१॥ इत्यादि भार्यया वाचा ताडितः, तच्छ्रवणादार्त्तध्यानपरायणोऽसावपि सञ्चयशीलो रजन्यां विशूचिकादोषेण मृत्वा तस्मिन्नेव नगरे नागिलदरिद्रकस्य दारको जातः, आजन्म जनकजनन्योरनिष्टः, कृच्छ्रेण कालं निर्गमयति। उचितसमये प्रतिष्ठित धणदत्त इति नाम, सोऽपि शिशुस्तद्गृहं परिजनं च दृष्ट्वा कम्पितमस्तक ऊर्ध्वभुज एकाकी एवं प्रजल्पति—दाणु जु दिन्नउं मुणिवरह, चडिउ इत्तइ तोंडि। रंकस्सवि मह

संपडिय, जं तेरस धणकोडि ॥१॥ अहो २ प्रेक्षध्वं सत्पात्रदानमाहात्म्यं येनाहं दुर्गतो भूत्वा त्रयोदशकोटीश्वरो जातः, तच्छ्रुत्वा भोगदेवेन पृष्टः—वत्स! अमुष्य जल्पितस्य को भावार्थः?, तेनोक्तं शृणु-अत्रैव नगरे दारिद्र्योपद्रुतस्तातगृहेऽहं दुर्गतपातको नाम कर्म्मकरोऽभूवं,महर्षिदानफलेनैतस्यैव गृहस्य स्वामिको जातः, अत एवं प्रजल्पामि—थोडउं दाणु सुहावणउं, जं दिज्जइ रहसेण। पच्छइ काः विलंबणइं, किं किज्जइ सहसेण? ॥१॥ करचुलुयपाणिएणवि अवसरदिन्नेण मुच्छिओ जियइ। पच्छा मुआण सुंदरि! घडसयदिन्नण किं तेण? ॥२॥ तस्मादवसर एवोपलक्षणीयः, यतः—पश्य शलाकाऽवसरे भूपैरपि प्रसार्य्यते स्वकरः। अनवसरे गुणवानपि हृदयादुत्तार्य्यते हारः ॥३॥ एवं श्रुत्वा केवलिवचने भोगदेवस्य प्रत्ययो जातो दानबहुमानश्च। अन्यस्मिन् दिने भिक्षार्थं प्रविष्टेनातिशयज्ञानिना गुणन्धरसाधुना भणितः, भो बालक! नैकान्तेन हर्षः कर्त्तव्यो, यतो यस्ते पिता सञ्चयशीलोऽदत्ता-भुक्तधनः स मृत्वा नागिलरोरदारको जातोऽत्यन्तद्वेष्यो ननीजनकयोः असम्प्राप्तपानभोजनो नरकप्रतिमां वेदनामनुभवन् कालं गमयति, खद्धु न दिन्नु धणिय धणु,गड्डहि गोविउ मुक्कु। नवि परलोउ न एहु भवु, दुहुवि पयारिहि चुक्कु ॥१॥ कम्मयरो घरसामी घरसामी तस्स चेव कम्मयरो। को सद्दहिज्ज एयं? अव्वो विहिविलसियं एयं ॥२॥ विहि अणुकूलीय माणुसह, जिह पट्ठइ तिह जाइ। प्रेमगहिल्लि महेलडी, जिम किज्जइ तिम थाइ ॥३॥ ततो हर्षविषादौ प्रवर्त्ततः सममेव जन्तूनां, यतः—सुखस्यानन्तरं दुःखं, दुःखस्यानन्तरं सुखम्। सुखदुःखं मनुष्याणां, चक्रवत्परिवर्त्तते ॥१॥ सुखे सुखाधिकान् पश्येत्, दुःखे दुःखाधिकान् पुनः। आत्मानं हर्षशोकाभ्यां, शत्रुभ्यामिव नार्प्पयेत् ॥२॥ इति कथयित्वा गतो मुनिः, पश्चादेवं श्रुत्वा धनश्रीरत्यर्थमरोदीत्, विषण्ण-चित्तया धनश्रिया नागिल आकार्य भणितः—मम गृहे युष्माभिः कर्म्म कर्त्तव्यं,एष पुत्रको नापमाननीयः,गरिष्ठः सर्वेषोऽपि मम गृहे

कर्म्मकरो भविष्यति, प्रतिपन्नमुभाभ्यां, तथैव कुरुतः। अन्यस्मिन् दिने भोगदेवो रजन्यां सुखप्रसुप्तो महिलायुगस्य संलापं शृणोति, एका भणति–का त्वं?, द्वितीयया भणितं–भोगदेवगृहलक्ष्मीः, इतरया भणितं–ते कुशलं?, अपरापरदानभोगकार्यासक्तेन भोगदेवेन व्यापार्यमानायाः कुतो मे कुशलं?, द्वितीयया भणितं–का त्वं?, तया भणितं–अहं सञ्चयशीलसार्थवाहस्य गृहश्रीः, प्रथमया भणितं–सुखवासस्तव?, तया भणितं–नरकान्धकारतुल्यगर्त्तागोपिताया अदृष्टशशिसूरकरनिकरायाः कुतो मे सुखवासः?, निरन्तरनिरोधदुःखदुःखिता दुःखं वसामि, भोगदेवेन चिन्तितं–द्वे अपि दुःखिते श्रियौ, अहो! नास्ति लक्ष्मीस्थिरीकरणोपायः, एषा हि लक्ष्मीर्न शौचसाध्या,प्राक्कथितदृष्टान्तेन श्रुति(शुचि)बुद्रकेण,न च भक्तिग्राह्या,मया भक्तिर्बह्वी कृता तथाऽपि श्रीर्दुःखमेव मनुते,परं यावदद्यापि श्रीर्मां न मुञ्चति तावदस्यास्त्याग एव शोभन इति विमृष्टं, यतः–लक्ष्मीरात्मगृहोद्भवेति तनया पात्रेऽप्यदातुः परं, लोकाद्वारिनिधेरिवात्र रुदतः सा गृह्यते विष्णुना। चेत्पाणिग्रहणं विधाप्यत इयं त्यागेन सूत्वा यशः, पुण्ये क्वापि गताऽपि वत्सलतया व्यावर्त्यते यत्पुनः ॥१॥ अधः क्षिपन्ति कृपणाः, यतस्तत्र यियासवः। अन्ये तु गुरुतीर्थादौ, यदुच्चैः पदकाङ्क्षिणः ॥ २ ॥ पश्चाद्दत्तं परैर्दत्तं, लभ्यते वा न लभ्यते। परं स्वहस्ते यद्दत्तं, लभ्यते तन्न संशयः ॥३॥ यदनस्तमिते सूर्ये, प्रदत्तं धनमर्थिनाम्। तद्धनं नैव पश्यामि, प्रातः कस्य भविष्यति?॥४॥ दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य। यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥ ५ ॥ प्रदत्तस्य प्रभुक्तस्य, दृश्यते महदन्तरम्। दत्तं श्रेयांसि संसूते, विष्ठा भवति भक्षितम् ॥ ६ ॥ दातव्यं भोक्तव्यं सति विभवे सञ्चयो न कर्त्तव्यः। पश्येह मधुकरीणां सञ्चितमर्थं हरन्त्यन्ये ॥७॥ कीटिकासञ्चितं धान्यं, मक्षिकारक्षितं मधु। कदर्योपार्जितं वित्तं, परैरेवोपभुज्यते ॥८॥ इति विमृश्य निजपुरे गतः, कृत्वा जिनार्चां साधुपूजां च दत्त्वा दीनाऽनाथेभ्यो

दानं संभाष्य सुहृत्स्वजनवर्गं च कुटुम्बसारे भोगदत्तं पुत्रं संस्थाप्य प्रवर्द्धमानशुभाध्यवसायः कल्ये प्रव्रजिष्यामीति चिन्तयन् रजन्यां सुष्वाप, महिलारूपधारिण्या भणितो लक्ष्म्या–भोगदेव! यथेच्छं दत्ता भुक्ता चात्यजन्ती मुक्ता तस्माच्छलिताऽहं, भण त्वं–किं करोमि?, तेन भणितं–न मे कर्त्तव्यमस्ति, यतः–जा दत्त भुत्त संचलइ संपया चलउ नत्थि इह दोसो। सुयपीयपयोहरपय विमुक्क विलीयावि रेहंति ॥१॥ इति वचनान्न मे प्रयोजनं, परं मम सुतेन सम्यक् प्रवर्त्तनीयं, एवं प्रतिपद्य गता श्रीः,द्वितीयदिवसे भोगदेवो भोगवत्या सह निष्क्रान्तः, अयमेव पन्थाः सतां पूर्वाचार्यैः प्रणीतः, यथा–शिशुत्वं तारुण्यं तदनु च दधानाः परिणतिं, गताः पांशुक्रीडां विषयपरिपाटीमुपशमम्। लुठन्तोऽङ्के मातुः कुवलयदृशां पुण्यसरितां, पिबन्तः स्वच्छन्दं स्तनमधरमम्भः सुकृतिनः ॥१॥ दुच्चिय हुंति गईओ साहसवंताण धीरपुरिसाण। विल्हहलकमलहत्था, रायसिरी अहव पव्वज्जा ॥२॥ भोगदेवोऽपि निरतिचारं चारित्रं प्रतिपाल्य विहिताराधनो मृत्वा सर्वार्थसिद्धिं गतः, भोगवत्यपि तत्रैवोत्पन्ना, ततश्च्युत्वा सेत्स्यतः। इतश्च श्रीदेवः श्रिया परित्यक्तः परगृहकर्म्माणि कुर्वन् सकललोकोपहसनीयः कालमतिवाहयति, एतस्मिन्नवसरे सुलक्षणः सुतो जातः, तत्प्रभावात्पुनर्लक्ष्मीः समागता, जातः सकलजनसंमतः, यतः श्रीरेव महत्त्वकारणम्–वारां राशिरसौ प्रसूय भवतीं रत्नाकरत्वं गतो, विष्णुस्त्वत्पतितामवाप्य भगवान् जातस्त्रिलोकीपतिः। कन्दर्प्पो जनचित्तरञ्जन इति त्वन्नन्दनत्वादभूत्, सर्व्वत्र त्वदनुग्रहप्रणयिनी मन्ये महत्त्वस्थितिः ॥१॥ पुनरेकदा रजन्यां वरपल्यङ्कगतो रुदतीं स्त्रियं पश्यति, पृष्टा–भद्रे! का त्वं? किमर्थं रुद्यते?, तयाऽभाणि–तव गृहश्रीः, रुदितत्वे ममेदं कारणं–त्वया सह वियोगो भविष्यति, या त्वया द्वितीया गृहिणी परिणीता साऽलक्ष्मीः, तया सह नास्त्येकत्र वासः, पुनरदर्शनमिति भणित्वाऽदर्शनत्वं गता श्रीः, भूयस्तदेव दारिद्र्यमियाय, स एव जन-

पराभवः श्रीदेवस्य, अत्रान्तरे स्फुटितवस्त्रपरिधानं श्रीदेवं दृष्ट्वा मुखवक्रोष्ठिकापूर्वमुपहसति कश्चिन्नरः, तदा तं प्रत्याह काव्यमेनं श्रीदेवः—आपद्गतान् हससि किं द्रविणान्ध मुग्ध!, लक्ष्मीः स्थिरा न भवतीति बली विधाता। एता न पश्यसि घटीर्जलयन्त्रचक्रे, रिक्ता भवन्ति भरिता भरिताश्च रिक्ताः॥१॥ अतः शुचिदोषाल्लक्ष्म्या श्रुति(शुचि)बुद्रः परित्यक्तः, प्रतिदिनं पूजोपचाराच्छ्रीदेवस्त्यक्तः, रक्षतः सञ्चयशीलस्योपरि कथा, भोगदेवस्य ददतः उपभोगपरायणस्य पराङ्मुखा जाता, जो संतावि न भुञ्जइ न देइ उक्खणइ निहणइ ससंको। सो संचयसीलसमो हवेइ दालिद्दिओ पुरिसो ॥१॥ सञ्चयसीलसरिच्छा पुरिसा महिमण्डलंमि सव्वत्तो। जे छलिया लच्छिपिसाइयाए करिकन्नचवलाए ॥२॥ जो संतं परिभुंजइ देइ न दिंतस्स पडइ परिणामो। सो सिरियदेवसरिसो उभयभवसुहावहो पुरिसो ॥३॥ ते विरला सप्पुरिसा जयंमि जे भोगदेवसारिच्छा। लच्छीइ जे न छलिया छलिया लच्छी पुणो जेहिं ॥४॥ को मुणइ ताण संखं नराण लच्छीइ जे छलिज्जंति। संतावि जेहि लच्छी छलिया ते एक दो तिन्नि ॥५ जितश्चेत्पुरुषो लक्ष्म्या, हतं लोकद्वयं ततः। जिता चेत्पुरुषेणैषा, जितं लोकद्वयं ततः ॥६॥ ता छड्डिज्जइ एसा जाव न छड्डेइ अप्पणा चेव। लच्छीए छड्डिओ पुण लहुत्तणं पावए पुरिसो ॥७॥ एवं भगवान् कुमाराणामग्रे उक्तवान्—निरवद्यां प्रव्रज्यां गृहीत्वा नृजन्म सफलीकुरुत, वैतालिकाध्ययनं प्ररूपितवान्, यथा—संबुज्झह किं न बुज्झह, जाणंतावि हु कीस मुज्झहा?। पियपुत्तकलत्तपासहा, भो! दूरं दूरेण नासहा ॥१॥ भुत्तुं विसए अणुत्तरे, जइ तित्ता तुब्भे न तेहिंवि। ता कह तुब्भेहिं इमेहिं भो!, परितित्ती तुब्भाण होहिही ॥२॥ अहिणुव्व सया भयंकरे, जलनिहितरलतरंगभंगुरे। विसए परिणामदारुणे, जाणिय मा एएसु रज्जहा ॥३॥ विसयामिसलुद्धमाणसा, रागंधा विसयास विसंठुला। परिहरियहिया हियासया, बहुहा नासमुर्विति पाणिणो ॥४॥ वरवीणावेणुमाइएसु, सद्देसुं सुति-

सोक्खदायएसु। आसत्ता मूढमाणसा, नासं जंति मयव्वऽणेगसो ॥५॥ सिंगारवियारबंधुरे, सुललियलासविलासपेसले। रूवे विणिविट्ठदिट्ठिणो, विणिवायं सलहव्व जंति ते ॥६॥ सरसाहाराहिलासिणो, महुरमज्जमहुमंसभोइणो। बडिसामिसलुद्धमुद्धया, मीणा विव हम्मंति पाणिणो ॥७॥ वरकुसुमामोयमोहिया, मूढमणा न गणंति आवयं। गंधे लुद्धा जहाऽलिणो, विणिवायं लहु जंति जंतुणो ॥८॥ मिउमणहरफासलालसा, अमुणियदोसगुणा मयालसा। बज्झंति गयव्व बालिसा, रमणीसंगविमूढमाणसा ॥९॥ इत्यादिभिः काव्यैः प्रतिबोधितवानिति सम्बन्धः ॥ इति श्रुति(शुचि)बुद्रश्रीदेवसश्वयशीलभोगदेवादीनां यथाक्रमेण दृष्टान्तानि सम्पूर्णानि ॥

**मनोरथनैरर्थक्यं** ८८—पाण्डुमथुरायामत्यन्तदरिद्री श्रेष्ठितनयः पुरुषदत्तो नाम परिवसति, अपि च—सिद्धिघरंमिवि जाओ नियकम्मवसेण दुग्गओ धणियं। सग्गेवि कुक्कुसच्चिय हवंति किर पुन्नरहियस्स ॥१॥ अन्यदा स गृहाद्गृहं पाटकात्पाटकं ग्रामाद्ग्रामं नगरान्नगरं संनिवेशात्संनिवेशं देशाद्देशान्तरं भ्रमन् सम्प्राप्तश्चोत्तरापथं, तत्रास्थात् क्षितिप्रतिष्ठितस्य नगरस्य शून्यमठे, श्मशानाज्जीर्णो मञ्चक आनीतो, निषण्णः, क्षणान्तरे गतो भिक्षार्थं, लब्धा बहवः सक्तवः, ततो हर्षभरनिर्भरमनाश्चिन्तितुं प्रवृत्तः- किञ्चिद्वाणिज्यं करोमि, स्तोकैर्भिक्षासक्तुभिः किं ?, प्रतिदिनं स्तोकान् २ सक्तून् मीलयित्वा घटो भृतः, दृष्टिपथे सिक्कं कृत्वा तं घटममुञ्चत्, गृहीतलकुटश्चौरेभ्यो रक्षति, अन्यस्मिन् दिने रजन्यां तस्य मनसि विकल्प उत्पन्नः—अत्र परमलाभोऽभून्मम, ततो घटं गृहीत्वा ग्रामे गत्वा सक्तून् विक्रीय घृतं गृहीतं, एवं गुडप्रभृत्यपरं वस्तु गृहीत्वा पूर्वादिषु परिभ्रम्य प्राप्तः पुनरुत्तरापथं, अष्टगुणो लाभः सञ्जातः, ततो धवलगृहकारापणाऽऽपणकनीपाणिग्रहणपुत्रोत्पत्तिमनोरथान् विकल्पयामास, कदाचिन्ममाज्ञां खण्ड-

यिष्यति तदाऽऽज्ञाखण्डनपरेयं भार्या लगुडप्रहारं दत्तवानिति घटमभाङ्क्षीदिति सम्बन्धः ॥८५॥

## अभयदानमहिमा ८६—

जो पापभीरुचित्तो अभयं जीवाण देइ करुणाए। कत्तोवि तस्स न भयं होइ जहा अभयसीहस्स ॥८६॥

कुशस्थले ग्रामे प्रकृत्या भद्रको भद्रकः कुलपुत्रकः, स गाढे दुर्भिक्षेऽनिर्वहन् मृगादिजीवान् घ्नन् आत्मनो वृत्तिं करिष्यामीति चिन्तितवान्, ततो लगुडं गृहीत्वा बहिः प्राप्तः, शशकं विलोक्य लगुडं मुञ्चति, लगुडमागच्छन्तं दृष्ट्वा शशकः प्रतिमास्थितस्य मुनेश्चरणान्तरे निलीनः, तीव्रतपोरञ्जितया वनदेवतयाऽन्तराले स्फटिकशिला विनिर्म्मिता, तस्यां शिलायां प्रतिस्फलितो लगुडो भद्रस्य भालस्थले लग्नः, तत्प्रहारनिर्यद्रुधिरो गुरुवेदनाऽऽक्रान्तो मूर्च्छानिमीलिताक्षः सहसा धरणीतले पपात, क्षणात्प्राप्तचेतनो मुनिना प्रतिबोधितः, जीववधनियमं गृहीत्वा स्वगृहे समायातः, ततो मृत्वा श्वेतविकायां नगर्यां वीरसेनस्य राज्ञो वप्राकुक्षौ सिंहस्वप्नसूचितो भद्रकस्य जीव उत्पेदे, राज्ञा महाविभूत्या कृतं वर्द्धापनकं, अपरिपूर्णे तस्य मासे वीरसेनस्य राज्ञ उपरि गजरथतुरगपदातिसाधनेन मानभङ्गनरपतिः समागतः, तदभिमुखं निजसैन्यसङ्गतो वीरसेनो निर्गतः, प्रवृत्तमायोधनमन्योऽन्यं, भवितव्यतावशेन विनाशितो वीरसेनो मानभङ्गेन, गृहीतं करितुरगकोशादिकं, तस्मिन् राज्यभङ्गोपद्रवे पुत्रं गृहीत्वा वप्रा देवी प्रपलायमानाऽरण्ये प्राप्ता, एकेन पदातिना चिन्तितं—अहो! मे पुण्यप्रकर्षः यदेषा मृगाक्षी मया प्राप्ता, ततस्त्याजयामि बालकं येन मय्येव दृढानुरागा भवति, भद्रे! परित्यजैनं शिशुं, साऽऽह—निजगर्भसंभूतं त्रैलोक्यचूडामणिं कथं परित्यजाम्येनं ?, पदातिना प्रोक्तं—मयि साधीनेऽन्ये तव तनया भविष्यन्ति, तया भणितं—यदि परमन्यजन्मनि तनया मम भविष्यन्तीत्युक्त्वा रोदितुं प्रवृत्ता,

यतः कोऽलङ्कारः ? शीलमिति वदंती भणति–शील शरीरह आभरणु, सोनइ भारिम अंगु। मुखमंडणु सच्चउ वयणु, विणु तंबोलह रंगु ॥१॥ ततः पदातिना बलात्कारेण गृहीत्वा त्याजितः शिशुः, पुनश्चिन्तयति सा–को नरकः ?, परवशतेति, देवी भुजया गृहीत्वाऽग्रतो नीता, भणिता च–रोयसि कीस किसोयरि ! मुंच विसायं पवज्जसु पइं मं। मा कुणसु रन्नसरपंकयं व नियजुव्वणं विहलं ॥१॥ पुनराह–पिब खाद च याति शोभने !, यदतीतं वरगात्रि ! ऊर्जितम्। नहि भीरु ! गतं निवर्त्तते, समुदयमात्रमिदं कलेवरम् ॥२॥ यावज्जीवं सुखं जीव, मा जीव सुखवर्जिता। भस्मीभूतेषु देहेषु, कुतस्ते पुनरागमः ? ॥३॥ इति कर्णकटुकमाकर्ण्य देवी मनसि चिन्तयति–हा दैव ! पूर्वजन्मनि मया किं कृतं दुष्कृतं यदेवं मां पीडयसि ?, एकं तावद्भूपतेर्भर्तुर्मरणं, तत्कीदृशं ?–अर्थो नराणां पतिरङ्गनानां, मेघो नदीनां ऋतवस्तरूणाम्। सद्धर्म्मचारी नृपतिः प्रजानां, गतं गतं यौवनमानयन्ति ॥ १ ॥ मितं ददाति हि पिता, मितं भ्राता मितं सुतः। अमितस्य तु दातारं, भर्त्तारं का न पूजयेत् ? ॥२॥ धणु परीयणु वद्धामणउं, जं जं कज्जु पहाणु। विणु कंतह एकंगणइ, दीसइ माइ मसाणु ॥३॥ द्वितीयं सकलसमीहितसुखकारकसुतस्य विध्वंसः, लोकस्त्वेवं ब्रूते वराकः काकरूपो–यन्नरकान्तं राज्यं, परं राज्ञी मनसि चिन्तयति–नैवं संभाव्यते, कथं ?, तदेवाह–नरकान्तं तदा राज्यं, यदि राजा न धार्म्मिकः। धार्म्मिके तु परं तत्र, सौख्यमत्र परत्र च ॥ १॥ दुर्बलानामनाथानां, बालवृद्धतपस्विनाम्। अनार्यैः परिभूतानां, सर्वेषां पार्थिवो गतिः ॥२॥ प्रजानां धर्म्मषड्भागो, राज्ञो भवति रक्षितुः। अधर्म्मस्यापि षड्भागो, जायते यो न रक्षति ॥ ३ ॥ लोकेभ्यः करमादाता, चौरेभ्यस्तान्न रक्षति। तदीयैर्लिप्यते राजा, पातकैरिति हि स्मृतिः ॥४॥ अकरे करकर्त्ता चेद्, गोसहस्रवधः कृतः। प्रवृत्तकरविच्छेदे, गवां कोटिफलं भवेत् ॥५॥ तर्हि हंहो विधे ! एवंविधं नृपमन्यच्च प्राज्यं राज्यमपहृतं, अपरं विन-

यादिगुणसमृद्धस्य सपरिवारस्य हानिः कृता, अन्यत् श्वापदसङ्कुलेऽरण्ये परिभ्रमणं रात्रौ दिवा, अथवाऽतः परं किं व्यसनं भविष्यति यद्धठेनाङ्कादपहृत्य सुतरत्नस्य परित्यागः कृतः, आसातरवर मउरीयउ, छड्डु पुड्ड फलिवा लग्गु। विहिकुंजरि उम्मूलियउ, एउ कुसंधिहि भग्गु ॥१॥ एतावद्दुःखं विधाय हतविधे! त्वं न सन्तुष्टः?, अद्यापि मृगाङ्कविमलं गङ्गाजलसदृक्षं कर्पूरगौरमेवंविधं मम शीलं खण्डयितुं वाञ्छसि, हा हृदय! असमञ्जसानि वचनानि श्रुत्वा यन्न स्फुटसि तत्त्वं वज्रघटितोऽसि, यतो न विदर्ये, कठिनाः खलु स्त्रियः, एवं विचिन्तयन्ती देवी हृदयसंघट्टेन पञ्चत्वं प्राप्ता, ततः केनापि पठितम्—पाणी तणइ वियोगि, कादमही फूटइ हीयउं। इम जइ माणुसु होइ, नेह तु साचउं जाणियइ ॥१॥ मृत्वा व्यन्तर्यभूत, यतः—रज्जुग्गहविसभक्खणजलजलणपवेसतण्हछुहदुहओ। गिरिसिरपडणाउ मुआ, सुहभावा हुंति वंतरिया ॥१॥ इति, देवगतिरियमपि चतुर्णां देवनिकायानां मध्ये, अतः पूर्वभवस्तयाऽवधिना ज्ञातः, दिट्ठो य नियपुत्तो आसायंतो वणंमि जंबुतले। पवणाहयं निवडियं मुहंमि जंबूफलं इक्कं ॥१॥ चिन्तितं च तया—अरक्षितं तिष्ठति दैवरक्षितं, सुरक्षितं दैवहतं विनश्यति। जीवत्यनाथोऽपि वने विसर्जितः, कृतप्रयत्नोऽपि गृहे न जीवति ॥२॥ वने रणे शत्रुजलाग्निमध्ये, महार्णवे पर्वतसङ्कटे वा। सुप्तं प्रमत्तं विषमस्थितं वा, रक्षन्ति पुण्यानि पुराकृतानि ॥३॥ आयासे गिरिसिहरे जले थले दारुणे महाघोरे। जीवो संकडपडिओ रक्खिज्जइ पुव्वपुन्नेहिं ॥४॥ ततः पूर्वस्नेहेन गोरूपेण सा व्यन्तरी दुग्धं पाययति, उपद्रवेभ्यश्च रक्षति, कतिदिनपर्यवसानेऽर्थयात्रानिवृत्तः श्वेतविकापुरीवास्तव्यः प्रियमित्रनामा सार्थाधिप आवासितः, तेन दृष्टो जम्बूतरुतले बालकः, छायाया अपरावर्त्तनेन पुण्यवान् ज्ञातः, यतः—वरसयणासण खाणु पीणु, धणु परियणु घोडउ। पुन्नवंतु जणु जत्थ जाइ, तथ जोडा ओडउ। पुन्नहीणु जणु जत्थ जाइ, तत्थ सव्वुवि थोडउ, मुक्कइ तं जि डाल,

जहिं लवइ कमेडउ ॥१॥ पुण्यवन्तं ज्ञात्वा गृहीतस्तेन शिशुः, अपुत्राया निजभार्याया आनीयार्पितः, कृतो वर्द्धापनमहोत्सवः, अभयसिंह इति नाम पप्रथे, समये उपाध्यायस्य समर्पितः "शैशवेऽभ्यस्तविद्याना"मिति पूर्वा रूढिः, यतः–प्रथमे नार्जिता विद्या, द्वितीये नार्जितं धनम्। तृतीये नार्जितो धर्मश्चतुर्थे किं करिष्यति ? ॥१॥ कृतोऽनेनोपाध्यायेन सकलकलाकलापकुशलः, क्रमेण पञ्चशरप्रसरलीलावनं यौवनं प्राप्तः, कदाचित्कनकपल्यङ्कप्रसुप्तो निशायां जननीव्यन्तर्योक्तः–वत्स! पूर्वमस्या नगर्याः स्वामिनो वीरसेनस्य राज्ञः पत्नी वप्रानाम्न्यहं, त्वं मत्पुत्रः, त्वत्पिता वीरसेनोऽनेन मानभङ्गेन हतः, अहं मृत्वा व्यन्तरी जाता, अतस्तव विरुद्ध एष राजा, अतोऽदृश्यीकरणमन्त्रं पठितसिद्धं गृहाण, गृहीतस्तेन मन्त्रः, अदृश्यीभूता व्यन्तरी। अथ मानभङ्गनृपतिर्नित्यं मांसभक्षणं करोति, एकदा सूपकारस्य प्रमादतः पूर्वानीतं मांसं मार्जारेणापहृतं, कालक्षेपासहत्वेनान्यन्मांसमानेतुमसमर्थेन किमपि बालकरूपं हत्वा मांसं राद्धं, भोजनं कुर्व्वता राज्ञा पृष्टं–अद्य पेशलं मांसं, सूपकारेण यथोक्तमुक्तं, ततो मांसलुब्धेन राज्ञा दत्तः सूपकारस्यादेशः–प्रतिदिनमेकैकं प्रधानमनुष्यं मारयित्वा मांसं पचनीयं, एवं च क्रियमाणे नृपतेः पुरीजनो वैरीभूतः, अह माणभंगरन्नो चित्ते चिंता इमा समुप्पन्ना। किं मह वंसपइट्ठं रज्जं ? किं वा न एयंति ? ॥१॥ अत्रान्तरे युगक्षयकृतपवनः समुल्लास यथा सूर्योऽपि दृष्टिगोचरं नायाति, तस्मिंश्च समये नृपो गगनाङ्गणे भूतमिथुनमन्योऽन्यमुल्लपन्तं पश्यति, भूतेनोक्तं–अनागतं किमपि वक्ष्यामि, तया तस्य भार्यया तूक्तं–प्रियतम! जल्प सावधानाऽस्मि, भूतेनोक्तं–मानभङ्गनृपो जीववधबहुपापभरितः पतिष्यति स्तोकदिनमध्ये, भूतप्रिया पृच्छति–अत्र को भावी तर्हि राजा ?, भूतेनोक्तं–शृणु–नरवइआण जु लंघिस्सइ, वसि करिहइ जु करिंदु। हरिहइ कुमरि जु कणगवइ, होसइ इह सु नरिंदु ॥१॥ एवमुक्त्वा तिरोहित भूतमिथुनं, उपशान्तं पवनाडम्बरं, भूत-

मिथुनोल्लापं श्रुत्वा मरणभयोद्भ्रान्तचित्तेन राज्ञाऽऽज्ञप्तो नगरारक्षकः—यो ममाज्ञामुल्लङ्घयति स त्वया निग्रहीतव्यः। अत्रान्तरे वसन्तोत्सवः प्रावर्त्तत, तस्मिन् वसन्तोत्सवे निशीथेऽभयसिंहो देवतायतने प्रेक्षणीयं प्रेक्ष्य स्वभवनं व्रजन् तलारेण भणितः—भद्र! मा व्रज, क्षणं तिष्ठ, कस्त्वं?, नास्थादभयसिंहः, तेन राज्ञ आज्ञा प्रदत्ता, देहि निजपितुराज्ञेति भणन्नभयसिंहो व्रजति, ततो गृहीतखड्गो हन हनेति भणन् धावितस्तस्य पृष्ठे नगरारक्षकः, तमागच्छन्तं प्रेक्ष्यादृश्यो भूत्वा गतोऽभयसिंहः, जातो विलक्षो नगरारक्षकः, राज्ञोऽग्रे विज्ञप्तं प्रातरेतत्सर्वं, किं क्लीबस्त्वं यन्निग्रहीतुं न शक्तः?, "नरवइआण जु लंघवइ" एतत्सत्यं जात, चित्ते चमत्कृतः, अन्यदा मदपरवशः पट्टहस्ती आलानस्तम्भमुन्मूल्य गन्तुं प्रवृत्तः, नगरेऽसमञ्जसं समजनि, अस्ति च राज्ञः कन्या कनकवती, सा मदनदेवपूजां कृत्वा निवृत्ता सती करिणा दृष्टा, तत्संमुखं धावितः, गृहीता सा, पूत्कारितं परिजनेन—अस्ति कोऽपि कृष्णचतुर्दशीजातो य इमां मत्स्वामिनीममुष्मात्कृतान्तप्रायकरिणः सकाशाद्रक्षयति?, भवितव्यतानियोगेन श्रुतमभयसिंहेन, कुलिशकठोरमुष्टिप्रहारेण पाश्चात्यभागे आहतः करी, तां विमुच्य तत्संमुखं धावितो, भ्रामितस्तेन चक्रभ्रमेण, अङ्कुशं गृहीत्वा कुम्भस्थलमध्यारुरोह, तं वशीकृत्य चलितो राजकुलं प्रति, सर्व्वैरपि श्लाघितः, राजपुत्र्या च साभिलाषं, नगरनारीनेत्रोत्पलैरभ्यर्च्यमानः प्राप्तो राजकुलमभयसिंहः, राज्ञा दृष्टः,चिन्तितं च—अनयाऽऽकृत्याऽनेन पराक्रमेण करिष्यति नूनं राज्यमसावेव,तथाऽपि पुरुषकारो न मोक्तव्यः पुरुषेण, यतः—उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः, दैवं हि दैवमिति कापुरुषा वदन्ति। दैवं निहत्य कुरु पौरुषमात्मशक्त्या, यत्ने कृते यदि न सिद्ध्यति कोऽत्र हेतुः? ॥१॥ तथा सति प्रस्तावे उपायान्तरं चिन्तयिष्यामि, अनेन वणिङ्मात्रेण वशीकृतः करी तस्मान्निग्रहीतव्य एषः, अभयसिंहेनापि हस्ती आलानस्तम्भं नीतः, यावदुत्तरति तावद्वधाय धाविताः सुभटाः,

अदृश्यीभूय गतः, विलक्षचित्ता निवृत्ताः सुभटाः, कथितं च तैः राज्ञः पुरस्तात्तत्स्वरूपं, राज्ञा तूक्तं—यूयं क्लीबा इति, अथ प्रतीहार्य्या कनकवत्याः स्वरूपं विज्ञप्तं—रायसुयाण बहूणं चित्तगए पिच्छिउं पडिच्छंदे। चित्तहरेवि इमीए कहंपि चित्तं न वीसंतं ॥१॥ संपइ पयडं करिसंभमाउ मोयाविया इमा जेण। तंमि दढं अणुरत्ता पियमित्तसुए अभयसीहे ॥२॥ जइ एस रायपुत्तो न हुज्ज तो मह मणंपि न हरिज्ज। संसयपए पयत्थे मणुयाण मणं चिय पमाणं ॥३॥ किञ्च करिसंभमं रक्खिऊण मे जेण जीवियं दिन्नं। तं मुत्तुं जइ अन्नं महामि तो होमि अकयन्नू ॥४॥ एवं श्रुत्वा राज्ञा चिन्तितं—तथाऽपि मयैष व्यापादयितव्यः, प्रतीहार्याः समक्षमाज्ञप्तं राज्ञा—तलवर! आहूय अभयसिंहं, यतोऽनेन कुमारी करिसंभ्रमान्मोचिता तस्मादेनं सत्करोमीति, तलवरेण गत्वा तस्य पुरस्तात्कथितं राज्ञः शासनं, विरुद्धं मनो जानन्नपि राज्ञः पूर्वभवजननी देवी मम सर्वं सौस्थ्यं करिष्यतीति मत्वाऽऽगतोऽभयसिंहः सिंहवन्निर्भीकः, रजन्यां प्रच्छन्नं हनिष्यामीति स समर्पितः पदातीनां, तेऽपि तमभयसिंहं रक्षन्ति, प्रदोषेऽदृश्यीभूय स्थितः, तत्र स्थितमप्यपश्यन्तस्ते प्रजल्पितुं प्रवृत्ताः—क्वापि गतः स इति, श्रुतं राज्ञा, मा मे पुत्रीं हरिष्यति कदाचनाप्येष इति प्रासादस्योपरि भूमिं प्राप्तो नृपः यत्रास्ते कनकवती, तत्रैव प्रसुप्तेन राज्ञा स्वप्ने कनकवतीमपहरन् साक्षाद् दृष्टः सः, तं प्रति रोषाद्धावन् प्रासादान्नृपः पतन् भूमिं प्राप्तो मृत्युमाप, पापकारी नृपः स्वयमेव मृतः, परितुष्टः पूर्लोकः, को राज्ये स्थाप्यते? इति प्रजल्पमानानां प्रधानानां गगनगतया व्यन्तर्या प्रोक्तं—वीरसेनपुत्रमभयसिंहं राज्ये स्थापयत, तथेति प्रतिश्रुत्य स्थापितो राज्ये स एवाभयसिंहः, परिणीता कनकवती, वशीकृतः सामन्तादिवर्गः सः, त्रिवर्गसौख्यं राज्यमुपभुञ्जानस्य तस्य कालोऽत्येति, अन्यदा तस्य चिन्ता जाता—पूर्वभवे मया किं कर्म्म कृतं, अत्रान्तरेऽतिशयज्ञानी ज्ञानसूर्यनामा समायातः, तं वन्दित्वा निजसंशयं पृष्टवान्—कहइ गुरू

पुव्वभवे ससयवहे जं तुमं पयट्टोसि। न उण हओ सो पच्छा कया च ते जं च वहविरई ॥१॥ तं वसणगओऽवि अणत्थवज्जिओ पाविओसि रज्जसिरिं। तो जायजाइसरणो सम्मत्तं गिण्हए राया ॥२॥ कुणइ जिणसाहुभत्तिं जीवाण वहं निवारए रज्जे। कालेण समाहिपरो मरिउं तियसालयं पत्तो ॥३॥ ॥ इति जीवदयायामभयसिंहसम्बन्धः ॥

इति मलधारगच्छीयश्रीराजशेखरसूरिसूत्रितः कथाकोषः समाप्तः ॥

## विनोदकथासंग्रहगताधिककथादिसंग्रहः—



पीठिका—यन्नैकामपि कामिनीं परिणयस्यभ्यर्थ्यमानोऽप्यलं, तन्नूनं गृहभारकातरतया मुक्तोद्यमो देवर!।

मा शङ्कस्व हरिस्त्रिखण्डविजयी भ्राताऽस्ति ते सर्वदो, भामाद्याभिरितीरितः स्मितमुखो नेमिर्वशी पातु वः ॥१॥

जयन्ति गुरवोऽस्माकं, विद्यावल्लिमहीरुहाः। मलधारिगणाधीशाः, श्रीश्रीतिलकसूरयः ॥२॥

मनोविनोदहेतूनां, सभार्हाणां यथाश्रुतम्। मया कथानां ह्रस्वानां, क्रियते संग्रहो बुधाः! ॥३॥

तन्नास्ति किञ्चिज्जगति, यद्वाच्यं न यथासमम्। अतो विनोदकथिकासंग्रहोऽयं न निष्फलः ॥४॥

तत्त्वप्रियजनाकीर्णे, षड्दर्शनसमाकुले। आस्थाने निर्विरोधास्तु, कथनीयाः कथानिकाः ॥५॥

सत्काव्यनादपक्षाभ्यां, भुवनत्रयचारिणी। देवी सरस्वती हंसी, रमतां मम मानसे ॥६॥

---

(कथा १) योऽपि सोऽपि ध्रुवं ग्राह्यो, नियमः पुण्यकाङ्क्षिणा। सोऽल्पोऽप्यनल्पलाभाय, कमलश्रेष्ठिनो यथा ॥१॥

अस्ति श्रीभारभासुरं श्रीपुरं नाम नगरम्। तत्र द्वादशव्रतधरो न्यायार्जितधनो महाजनवल्लभः परमसम्यग्दृष्टिः षडावश्यक-क्रियाशाली श्रीपतिः श्रेष्ठी। तस्य सुन्दरी भार्या। सा शीलादिभिर्गुणैः पत्युरनुरूपैव चकासामास। तयोस्तु कमलो नाम

पुत्रः । स निर्लज्जो नास्तिको धृष्टः खादको वातूलः । पुण्यस्य नामापि न जानाति । गुरुदर्शनं दुरितमिव मन्यते । साधर्मिकान् दर्वीकरानिव द्वेष्टि । देवाधिदेवस्य स्तुतिपाठं शोकाक्रन्दमिव गणयति । स च कदाचिज्जनकेनोत्पन्नकरुणापरिणामेन रह एवं सप्रसादमशिक्ष्यत–'वत्स ! "बाहत्तरीकलापंडिआवि पुरिसा अपंडिया चेव । सव्वकलाणवि पवरं जे धम्मकलं न याणंति ॥१॥ तुल्लेऽवि माणुसत्ते केइ सुही दुक्खिया य जं अन्ने । तं निउणं परिचिंतसु धम्माधम्मप्फलं चेव ॥२॥" इत्यादि । स तु तेन हितेनाप्युपदेशेन कट्वौषधेनेव पीडितो मुखं पराङ्मुखं कृत्वा सतिरस्कारमभाषिष्ट–तात ! क्व जीवः ! क्व धर्मः ? क्वाधर्मः ! क्व नाकलोकः ! क्व नरकः ! क्वापवर्गः !, सर्वमेतद् गगनालिङ्गनप्रायम् अदृष्टत्वात् तुरङ्गशृङ्गवत् । "तपांसि यातनाः सर्वाः, स्वेच्छाघातकसंयमः । दैन्यमायुष्मतोऽतैन्यमभक्ष्यं कुक्षिवञ्चना ॥१॥" इत्यादि प्रलपन्नुदस्थात् । निरङ्कुशः करीवान्तर्नगरं चरन् रात्रिंदिवानि वाहयति । अन्येद्युस्तत्र द्रङ्गे शङ्करनामा सूरिर्भूरिगुणः समावासार्षीत् । श्रीपतिः श्रेष्ठी तं वन्दितुं महार्द्धिकपरिच्छदपरीतो जगाम । पञ्चविधाभिगमनपूर्वं वन्दित्वा करुणासारं धर्मं श्रुत्वा योजिताञ्जलिर्गुरुं व्यजिज्ञपत्–'श्रीपूज्याः क्षीराश्रवलब्धिसंपन्नाः, मधुमधुरया वाचा हृतहृदयमिदमखिलमास्थानम्, मम पुत्रस्तु दुर्विनीतो जिनधर्मबाह्यो प्रखरखलकुलतिलकः, तं बोधयितुं प्रसीदत, यदाहुः— "सम्यग् न्यायोपदेशेन, यः सत्त्वानामनुग्रहम् । करोति न्यायबाह्यानां, स प्राप्नोत्यचिराच्छिवम् ॥१॥" श्रीसूरिभिरभ्यधायि–'बोधयिष्यामो यथाशक्ति, आगमिष्यति यद्यसौ' । श्रेष्ठिराजः स्वागारमगात् । भुक्तो विलिप्तो गृहद्वारमण्डपिकायां विश्रान्तः । पुत्रो व्यसनोपहतो धनबदरकग्रहणाय तदा सदनमाजगन्वान् । गृहीत्वा निःसरन् जनकेन जजल्पेऽनल्पवत्सलिम्ना–'वत्स ! श्रीशङ्कराचार्यानन्तराम्रवणं स्थितानभिनवागतान् वन्दितुमर्हसि । गुणाढ्यसेवा हि महते फलाय कल्पते । गुणाढ्यं हि प्रवहणं दुस्तरादपि

सागरात् परं तारयति, स्वयं तरति च'। सोऽपि गाढतरीढावक्रितवदनो निष्क्रम्य यावद् दुरोदरिकनर्तक्यादिशालां परिसर्पति तावत् तत्रानवसरः, अतो दध्यौ, 'तातेन योऽसौ सूरिर्वन्दनीयतया जगदे तं प्रलापयामि तावत्'। इति वक्राशयः सूरीन् गत्वा कृत-कप्रश्रयेणाभिवन्द्य नट इव मायी पुरस्तस्थौ। श्रीसूरिभिरपि पूर्वपृष्टवर्णकर्णनयनाद्यनुसारेणोपलक्ष्याभाषयामाहे–'त्वं किं कमलः?' इति, सोऽप्यवक्–'अहं कमलः' इति। सूरिभिरादिष्टम्–'असन्मुखे दत्तदृष्टिः सिद्धान्तरहस्यानि सप्रणिधानं शृणु'। ओमित्युक्त्वा सोऽपि किल विनयमसृणोऽशृणोत्। याममेकं गुरुस्तस्मै धर्मतत्त्वान्युपदिश्य पप्रच्छ–'किं त्वया बुबुधानः?' इति। सोऽप्यूचे–'भगवन्! किञ्चिद् बुद्धम्, किञ्चिद् न'। 'किं कारणम्?'। 'मया भवतां कथादि कथयतां चलन्ती घण्टिकाऽष्टोत्तरशतवारं गणिता, ततश्च पूज्यैश्चमरामरभ्रमरतोमरादिशब्दाः केऽपि गलबलायमानाः शीघ्रं शीघ्रमभिदधिरे, तत्रान्तरे घण्टिकाचलनसंख्यानं नोपलब्ध-वान्' इति। सूरिभिः परामृष्टम्–'अहो! कुपुरुषत्वमस्य, यदेवमस्मानपि हितार्थिन एवमुपहसति। अस्थाने हि नाट्यपरिश्रमः श्रम-फल एव। "अणवट्ठियस्स धम्मं मा हु कहिज्जाहि सुट्ठुवि पियस्स। विच्छायं होइ मुहं विज्झायग्गिं धमंतस्स ॥१॥" इति सवैलक्ष्यं महासभाजनह्रीतास्तूष्णीकास्तस्थुर्गुरवः। कमलोऽपि यथागतमयासीत्। 'सुष्ठु हसितो जरद्गवः' इति लोके जगर्ज। पितापि तं सुतस्य वृत्तान्तं जनपरम्परया जज्ञौ, लज्जया जग्लौ च। 'अयोग्यः' इति निश्चित्य सुतं नोपालेभे। कालान्तरे पुनः शीलसागरा-ख्यान् सूरीन् नगरपरिसरमुपागतान् कर्णाकर्णिकयाऽऽकर्ण्य भूयोऽप्युपहासार्थी महता वृन्देनोपतस्थे। सूरिभिरपि ज्ञातपूर्वसूरि-विगोपनवृत्तान्तैः स समागच्छन् पूर्वोपदिष्टसभागतनरवदनाच्च निश्चिक्ये 'अयं कमलः' इति। सविनयं विहितवन्दनविधिश्चायं दाण्डाजनिकः, अत्यन्तऋजुत्वाद् बोधार्होऽयमिति मन्यमानैर्भारतीचरणमणीनूपुरसिञ्जितमञ्जुना स्वरेणाललपे–'अयि! कमल!

श्रमणोपासक ! धर्मवर्ष्मणि कुशलं ते ?' कमलोऽपि सान्तर्भक्तिरिव नम्रकन्धरो मधुरमवादीत्–'देवगुरुप्रसादेन' इति। आचार्यैरादिष्टम्–'त्वयाऽधः पश्यताऽस्मद्व्याख्यानं सम्यक् चिन्तनीयम्' इति। पूर्वसूरिवृत्तान्तं विदित्वा त्विदमूचे तैः। कमलोऽपि तथाऽधोदृष्टिस्तस्थिवान्। महतो गलतालुशोषादनु, गच्छनायकैः कमलः पर्यनुयोजि–किमबोधि ?' इति। कमलोऽपि प्रालापीत्–'इत एवासन्ने नगरके कीटिकाः परिपाट्या दशोत्तरं शतं निरसार्षुः, अजगणं चाहम्। तदनु समुदायेन निःसरन्तीनां तासां परिगणनाय भग्नमनोरथोऽहं दुःस्थोऽस्थाम्' इत्येतदबोधि। श्रुत्वेदं सूरयो मुषितसर्वस्वा इव वीक्षापन्नाः पराङ्मुखीभूयाचिन्तयन्–'अपात्रमसौ वराक इत्येतावद् बुद्धम्, परं वयमप्यबुद्धा एव, यदस्मिन्नेवंविधेऽधर्मरसिके प्रयस्यामः' इति। गतः कमलः। तदनु च केनापि सूरिणाऽनालप्यमानः पण्डितमानी नितरां प्रमत्तः परिबभ्राम। अपरेद्युश्च विपश्चिज्जनमनोवनवसन्तास्तत्र केऽप्याचार्याः समैयरुः। तैरपि सकर्णैराकर्णितः स कमलकथाताण्डवः। 'अस्माभिरवश्यं स बोधयितव्यः' इत्यन्तर्मनसं प्रतिश्रुतं च। वन्दनार्थमुपेयिवांश्च श्रीपतिः श्रेष्ठी समालापितः–पुत्रं ते बोधयिष्यामो वयम्' इति। इदं च श्रुत्वा सदैन्यं गद्गदमगादीत्–'अलं भगवन् !, अलं पन्नगकरण्डकान्तः करप्रक्षेपेण, दुरात्मा हि स मे सूनुर्नोपदेशमर्हति। ''अप्रशान्तमतौ शास्त्रसद्भावप्रतिपादनम्। दोषायाभिनवोदीर्णे शमनीयमिव ज्वरे ॥ १ ॥'' गुरवोऽप्यभिदधिरे–'पूर्वगुरुद्वयाशातनाचकितो भवानेवं जागदीति, मा भैषीत्, ध्रुवं धर्मे स्थापयिष्यामो यदि भवितव्यता साहाय्यदा भवित्री गुरूणामादरं दृष्ट्वा गृहं गतेन श्रेष्ठिना प्रहितः कमलः। उपसूरि समागत्य प्रणत्य निषण्णः। आचार्यैरपि गीतार्थैः 'कमलोऽयम्' इति प्रश्नाज्ञनाच्चावगत्य बभाषे–'भद्र ! कमल ! जानासि किमपि कामरहस्यम् ?' कमलः प्राह–'किमहं वेद्मि, श्रीआराध्याः प्रसद्यादिशन्तु सारं किञ्चित्'। आचार्यैः प्रोक्तम्–'प्रथम कामरसार्थिना स्त्रीणां गुणा

अवगन्तव्याः। गुणेष्वपि भावानुविद्धता प्रधानम्। यदाह–"आकारैः कतिचिद् गिरा कुटिलया काश्चित् कियन्त्यः स्मितैः, स्वैरिण्यः प्रथयन्ति मन्मथशरव्यापारवश्यं मनः। कासांचित्पुनरङ्गकेषु मसृणच्छायेषु गर्भे स्थितो, भावः काचपुटेषु पुष्करमिव प्रत्यक्षमुत्प्रेक्ष्यते ॥१॥"‘‘स्वाधीनपतिका प्रोषितभर्तृका खण्डिता कलहान्तरिता वासकशय्या(सज्जा)विरहोत्कण्ठिता विप्रलब्धा अभिसारिका चेति स्त्रीणामष्टावस्थाः। अन्त्यत्र्यवस्था परस्त्री’ इत्यादिकामकथाभिराक्षिप्तहृदयो जगाद कमलः–‘भगवन्! क एवमन्यो वेत्ति वक्तुम्? नीरसपूर्वसूरिवाग्विदग्धः पुनरुल्ललास मम मनस्तरुर्भवद्वचनामृतसारण्या’। ‘ध्रुवं नित्यं वन्दक एष्यामि’ इति प्रतिशुश्रुवे, यथाऽऽगतं जगाम च। एवं कदाचिदर्थकथया, कदाचिदिन्द्रजालविनोदेन, कदाचित् प्रहेलिकाभिर्मासोऽत्यगात्। मासान्ते विहारावसरे प्रत्यासन्ने नियमग्रहणार्थमुपढौकमानेषु श्राद्धेषु कमलोऽपि सविनयमुपेत्य गुरूनापप्रच्छे। गुरवोऽप्यभाषिषत–‘भद्र! विजिहीर्षवो वयम्, नियमं कमपि गृहाण। धर्मो हि पुरुषार्थेषु प्रकृष्टः। स च संयमसाध्यः। संयमश्च न नियमग्रहणमन्तरेण’ इति। कमलो विकटनापटुराख्यत्–‘भूयांसोऽपि नियमाः प्रागप्यासते, तद्यथा–उपविश्य शयितव्यं, नोर्ध्वैः १ निजवाञ्छया न मर्तव्यम् २ पक्वान्नेषु काचेल्लुकेष्टादि न भक्ष्यम् ३ क्षीरेषु मिहिरस्नुह्यादिक्षीराणि न पेयानि ४ अक्षतं नालिकेरं सर्वतो न मुखे क्षेप्यम ५ गृहीत्वा परधनं महाकलहमन्तरेण न प्रत्यर्पणीयम् ६।’ सूरिणोक्तम्–‘नायं हास्यावसरः, किमपि नियमरत्नं गृहाण।’ कमलोऽपि प्रत्यूचे–‘स्वामिन्! प्रातिवेश्मिकस्य जरतः सदोद्द्योतितबिल्वपत्रसदृशीं कुलालस्यान्तिकामिधस्य खलतिं दृष्ट्वा मया भोक्तव्यं, नान्यथा।’ सूरिभिः सर्वसाक्षिकं तस्य तं नियमं दृढयित्वा विजह्रे। कमलस्तन्नियमं किञ्चिल्लोकह्रिया किञ्चिद्वाग्भङ्गपातकभयात् किञ्चिदाचार्यसंपर्कजधर्मश्रद्धयाऽपीपलत्। एकदा राजकुलेऽपराह्णं यावद् रुद्धः। छुटितो निकेतनमेतो ग्रासग्रहणक्षणे तन्नियममस्मार्षीत्।

उदस्थात्। उदवसिताग्रमारुह्य यावन्नालोकते तावत् कुलालीमप्राक्षीत्–'क अन्तिकः?' इति। सापि तं मृदे खानिगतमजिज्ञपत्। अन्वगाच्च ज्ञातस्थानः कमलः। तावदेव निखनतस्तस्य हेमरत्ननिधिः प्रकटीबभूव। यावत् कटाहिकामाकृषति तावच्चन्द्रिकां दृष्ट्वा तुष्टः कमलोऽवदत्–'दृष्टा दृष्टा' इति। कुलालेन स्वभिया समेत्यायं गृहाभिमुखमियन् पादपातपूर्वं न्यगादि–'स्वामिन्! जीवय जीवय, मा गाढं वोचः, निधिकटाहिकाया अर्धं सर्वं वा तवास्तु।' सोऽपि धूर्तशीर्षमणिर्लब्धकार्यपरमार्थस्तं तथा तथा भीषयित्वा निधिं प्रायेण जग्राह। अनुकम्पामात्रेण तु तस्यापि ददौ। न खलु चौरिकाभागेन महार्थाः। निकेतनमागतो भुक्तः शयितः प्रातरुत्थितः सुस्थितसुधियाऽध्यासीत्–'हास्यमात्रेण गृहीतो नियमो ममैवं पफाल। अवश्यं ज्ञानिभिर्गुरुभिरहमत्रापि नियमे निश्चलीकृतः। इहलोकेऽपि सुकृतं फलदम्। तस्मात् त एव गुरवः। तद्वदनाब्जकिञ्जल्कधर्मो मम शरणम्। अलं मिथ्यादृक्त्वेन।' इत्यवबुध्य हृद्बुद्ध्या कमलेन ते गुरवो विज्ञप्तिपूर्वं निमन्त्रिताः। धर्मो द्वादशव्रतमूलो लले, सिषेवे। कमलो नाकमगात्। ततश्च्युतः सेत्स्यति।

॥ इति कमलश्रेष्ठिकथा ॥ १. ॥

(कथा २) सुष्ठूक्तमपि वैधेयमध्ये स्यादसमञ्जसम्। बधिरस्य कुटुम्बस्य, कथाऽत्रार्थे निशम्यताम् ॥ १. ॥

सुग्रामे ग्रामे बधिरकुटुम्बं वसति। श्वश्रूश्वशुरौ, युवानौ वधूवरौ। सर्वेऽपि बधिराः। श्वश्रूः सूत्रं कर्त्तयति, राञ्जोति च। श्वशुरः कणादिकं रक्षति। वधूः क्षेत्रे भक्तं नयति। वधूपतिस्तु हलं कर्षति। एकदा हलं कृषन् स युवा मार्गासन्नायातैः पान्थैः पृष्टः–'अयमध्वाऽमुकं ग्राममुपतिष्ठते नवा?।' स तु हालिकः प्रत्यवोचत्–'रे परधनग्रहणग्रहिलाः! मे स्वगृहजातपोषिताविमौ वृषभौ, किं ब्रूत २ 'मदीयाविमौ' इति। तदाकर्ण्य 'वातकी पिशाचकी वाऽयम्' इत्यवगणय्य स्वच्छन्दमगच्छन्नेते। मध्याह्नोद्देशे

तत्पत्नी भक्तमानिन्ये। भोक्तुं निषण्णः। स पत्न्याः पुरः श्मश्रुस्पर्शपूर्वं 'मयैवं ते दुष्टाः प्रगल्भतया निरस्ताः' इति स्वात्मानं स्फोरयन्नवोचत्। पत्न्योक्तम्–'भक्तं बहुलवणमलवणं वा, रूक्षं वा सस्नेहं वा, अल्पं वा बहुलं वा, कालप्राप्तं वाऽकालप्राप्तं वा, मम का चर्चा?, तवैव जननी जानाति, तामेव तर्जय।' गता साऽधिश्वश्रु। साक्षेपं स्वोत्प्रेक्षितं तच्चादृशमूचुषी। साऽपि प्रत्यवक् त्रुटितकपोला–सूक्ष्मं वा बादरं वा सूत्रं कर्तयामीत्यत्र का चर्चा?, स्थूलेनापि जरतः कुटुम्बपतेः शाटको भावी, ननु धिग् युष्मान्।' जरती च जरन्तं साश्रुमुखी चित्तकल्पितं जल्पितवती। जरन्नपि सभ्रूत्क्षेपं मंक्षु प्रलपति स–'यदि मम रक्षत एकोऽपि कणो विनश्यति तदा फालां गृह्णामि, तप्तकपर्दिकामाकृषामि। वृद्धास्तु यथा तथा विगोपनीया इति वः कुटुम्बाचारः।' एवं चकोऽन्यत्, एवमितर इतरद् यत्र बुद्ध्यसमञ्जसं वक्ति तत् प्राज्ञेन नो वाच्यम्॥ इति बधिरकुटुम्बकथा॥२॥

(कथा ३) आराधयेद् महाभक्त्या, बुद्धिमन्तं न कोपयेत्। बुद्धिमान् सर्वकार्येषु, सहः स्याद्रोहकादिवत्॥१॥

मालवदेशे उज्जयिनी नाम पुरी। तस्याः समीपवर्ती कश्चिद् नटानामेको ग्रामः। तत्र भरतो नाम नटः। तस्य भार्या मृताऽभूत्। तनयश्चास्य रोहकाभिधोऽद्यापि बाल्यवयाः। ततः सत्वरमेव स्वस्य स्वतनयस्य च शुश्रूषाकरणायान्यां स्त्रीमानिन्ये। सा च रोहकस्य सम्यगन्नपानादिभक्तिं न करोति। ततो रोहकेण सा प्रत्यपादि–'मातः! न मे त्वं सम्यग् वर्तसे, ततो ज्ञास्यति' इति। ततः सा सेर्ष्यमाह–'रे रोहक! किं करिष्यसि?' रोहकोऽप्याह–'तत् करिष्यामि येन त्वं मम पादयोरागत्य लगिष्यसि' इति। ततः सा तमवज्ञाय तूष्णीमासीत्। रोहकोऽपि तत्कालादारभ्य गाढसंजाताभिनिवेशोभूत्, अन्यदा निशि सहसा पितरमेवमभाणीत्–'भो भोः पितः! एष पलायमानः पुरुषो याति'। तत एवं बालकवचः श्रुत्वा पिताऽशङ्किष्ट–'नूनं विनष्टा मम भार्या' इति। तत एवमाश-

ङ्कावशात् तस्यामनुरागः शिथिलीबभूव। ततो न तां सम्यक् संभाषते, नापि विशेषतस्तस्यै पुष्पताम्बूलादि प्रयच्छति, दूरे विश्वासकथादि। ततस्तया चिन्तितम्–'नूनमिदं बालकचेष्टितम्, अन्यथा कथमकाण्ड एव दोषाभावे पराङ्मुखो जातः पतिः?'। ततो बालकमवादीत्–'वत्स! किमिदं त्वया चेष्टितम्?, तव पिता मे संप्रति पराङ्मुखीभूतः'। रोहक आह–'किमिति तर्हि सम्यग् न वर्तसे?'। तयोक्तम्–'इत ऊर्ध्वं सम्यग् वर्तिष्ये'। ततो बालक आह–'भव्यं तर्हि, खेदं मा कृथाः, तथा करिष्ये यथा मे पिता तथैव त्वयि वर्तते'। ततः सा तत्कालादारभ्य सम्यग् वर्तितुं प्रवृत्ता। रोहकोऽप्यन्यदा निशि निशाकरप्रकाशितायां निशायां प्राक्तनशङ्कापनोदाय बालभावं प्रकटयन् निजच्छायामङ्गुल्यग्रेण दर्शयन् पितरमेवमाह–'भोः पितः! एष पुरुषो याति २'। तत एवमुक्ते स पिता परपुरुषप्रवेशाभिमानतो निष्प्रत्याकारं कृपाणमुद्गीर्य प्राधावत्, 'रे कथय क्व याति?' इति। ततः स रोहको बालक्रीडां कुर्वन्नङ्गुल्यग्रेण निजच्छायां दर्शयति, 'पितः! एष नरो याति'। ततः स पिता व्रीडित्वा प्रत्यावृत्तश्चिन्तयति स्म स्वचेतसि, 'प्राच्योऽपि नर एवंविध एवासीत् इति धिग् बालवचनादप्रियं मया भार्यायां चिन्तितम्'। ततः पश्चात्तापाद् गाढतरमस्यामनुरक्तो बभूव। रोहकोऽपि 'मयाऽस्या विप्रियं कृतमास्त इति कदाचिदेषा विषादिना मारयिष्यति' इति विचिन्त्य पित्रैव सह सदा भुङ्क्ते, नैकाकी। अन्यदोज्जयिनीं पित्रा सह गतः। स्वःपुरमिवोज्जयिनीं दृष्ट्वा विस्मितमना यथावत् तां पर्यभावयत्। ततः पित्रैव सह पुरीतो निर्यातुमारेभे। पिता च 'मे किमपि विस्मृतम्' इति रोहकं सिप्रानदीतटेऽवस्थाप्य तदानयनार्थं शीघ्रं पुरीं प्रविष्टः। रोहकोऽपि तत्र सिप्राभिधसिन्धुसैकते बालचापलवशात् समाकारां परिपूर्णां पुरीं सिकताभिरालिखत्। इतश्च राजाऽश्ववाहनिकायामश्वं वाहयन्नेकाकी तत्रैवागतः। तं च स्वालिखितनगरीमध्येन समागच्छन्तं रोहकोऽवादीत्–'भो राजपुत्र! माऽनेन पथा गमः'। तेनोक्तम्–

'किमिति ?' । रोहक आह-'किं त्वं राजकुलमिदं न पश्यसि ?' । ततो राजा कौतुकवशात् सकलामपि नगरीं तदालिखितामैक्षिष्ट। प्रपच्छ च तं बालम्-'रे कदाऽपि त्वया पुरी पूर्वं दृष्टा नवा ?,' । रोहक आह-'नैव कदाचित् , केवलमहमद्यैव ग्रामादिहागतः'। ततश्चिन्तयामास राजा-'अहो बालकस्य प्रज्ञाऽतिशयः'। ततः पृष्टो रोहकः-'वत्स' किं ते नाम ? को वा ग्रामः ?' इति । तेनोक्तम्-'रोहको मे नाम इति, प्रत्यासन्ने पुरोग्रामे वसामि' इति । अत्रान्तरे समागतो रोहकस्य पिता । स्वग्रामं प्रति चलितौ द्वावपि। राजाऽपि स्वस्थानमगात् ,चिन्तितं च-'ममैकोनानि मन्त्रिणां पञ्च शतानि सन्ति, यदि सर्वमन्त्रिमण्डलमूर्धाभिषिक्तो महाप्रज्ञातिशायी परमो मन्त्री स्यात् ततो मे राज्यं सुखेनैवैधते । बुद्धिबलोपेतो हि राजा प्रायः शेषबलैरल्पबलोऽपि न पराजीयते, परांश्च सुखेन विजयते ।' इति विमृश्य कियद्दिनानन्तरं रोहकबुद्धिपरीक्षणार्थं सामान्यतो ग्रामप्रधानपुरुषानुद्दिश्यैवमादिष्टवान्-यथा-'युष्मद्ग्रामस्य बहिः शिला महती वर्तते तामनुत्पाट्य राजयोग्यमण्डपाच्छादनं कुरुत' । तत एवमादिष्टे सकलोऽपि ग्रामो राजादेशमशक्यं परिभावयन्नाकुलीभूतमानसो बहिः सभायामेकत्र मिलितवान् । पृच्छति स परस्परं-'किमिदानीं कर्तव्यम् ?। दुष्करो राजादेशोऽस्माकमापतितः। तदकरणे महाननर्थो भावी' । एवं च चिन्तया व्याकुलानां तेषां मध्यंदिनमागतम् । रोहकश्च पितरमन्तरेण न भुङ्क्ते । पिता च ग्राममेलापके मिलितोऽस्ति । ततः स क्षुधार्त्त उपपितृ गत्वा रोदितुं प्रावर्तत-'पीडितोऽहमतीव क्षुधया, ततः समागच्छ गृहं भोजनाय' इति । भरतः प्राह-'वत्स ! सुखितोऽसि त्वम् , न किमपि ग्रामकष्टं वेत्सि' । स प्राह-'किं तत् ?' इति । ततो भरतो राजादेशं सविस्तरमचकथत् । ततो निजबुद्धिप्रागल्भ्यवशाच्छीघ्रं कार्यसिद्धिं ज्ञात्वा तेनोक्तम्-'माऽऽकुलीभवत यूयम्, खनत शिलाया राजार्हमण्डपनिष्पादनायाधस्तात्, स्तम्भांश्च यथास्थानं निवेशयत, भित्तीश्चोपलेपनादिना प्रकारेण प्रगुणीकुरुध्व-

मतिरमणीयाः'। तत एवमुक्ते सर्वैरपि नरैः 'भव्यम्' इति प्रतिपन्नम्। गतः सर्वोऽपि लोकः स्वगृहं भोक्तुम्। भुक्त्वा च समागतः शिलादेशे। प्रारब्धं तत्र तथा। कियद्दिनैश्च निष्पादितः पूर्णो मण्डपः। कृता च शिला तस्याच्छादनम्। निवेदितं च राज्ञे नियुक्तैः पुरुषैः—'देव! निष्पादितो ग्रामेण देवादेशः'। राजाह—'कथम्' इति। ततस्तैः सर्वोऽपि मण्डपविधानप्रकारः प्रोक्तः। राजा पप्रच्छ—'कस्येयं बुद्धिः?'। तैरुक्तम्—'भरतसुतस्य रोहकस्य'। ततः पुनरपि राजा रोहकबुद्धिपरीक्षार्थं मेण्ढकमेकं प्रेषितवान्, 'एष यावत्पलप्रमाणः संप्रत्यस्ति पक्षातिक्रमेऽपि तावत्पलप्रमाण एव समर्प्यः, न न्यूनो नाप्यधिकः' इति। तत एवं राजादेशे समागते लोकः सर्वोऽपि तथैवार्तीभूयैकत्र मिलितवान्। सगौरवमाकारितो रोहकः। आभाषितश्च ग्रामप्रधानैः पुरुषैः—'वत्स! प्राच्यमपि दुष्टराजादेशसिन्धु त्वयैव निजबुद्धिसेतुबन्धेन समुत्तारितः सर्वोऽपि ग्रामः, संप्रत्यपि प्रगुणीकुरु स्वबुद्धिसेतुं येनास्यापि राजादेशसिन्धोः पारं गच्छामः'। तत उवाच रोहकः—'वृकमासन्नं कृत्वा मेण्ढकमेनं यवसदानेन पुष्टीकुरुत, यवसं हि भक्षयन्नेष दुर्बलो न भविष्यति, वृकं च दृष्ट्वा न वृद्धिमाप्स्यति' इति। ततस्ते तथैव चक्रुः। पक्षातिक्रमे च राज्ञस्तं समर्पयामासुः। तोलने तावत्पलप्रमाण एव जातः॥ ततः पुनरपि कियद्दिनानन्तरं राज्ञा कुर्कुटः प्रेषितः। 'एष द्वितीयकुर्कुटं विना योधयितव्यः' इत्येवमायाते राजादेशे तथैव मिलितः सर्वो लोकः। आकारितश्च रोहकः। कथितश्च तस्य राजादेशः। ततो रोहकेणादर्शो महाप्रमाण आनायितः, विमृष्टश्च भूत्या। ततो धृतः पुरो राजकुर्कुटस्य। ततः स राजकुर्कुटः प्रतिबिम्बमात्मीयमादर्शे दृष्ट्वा 'मत्प्रतिपक्षोऽयमपरः कुर्कुटोऽढौकत' इति मत्वा साहंकारं योद्धुं प्रवृत्तः। जडचेतसो हि प्रायस्तिर्यञ्चो भवन्ति। एवं चापरकुर्कुटमन्तरेण योधिते राजकुर्कुटे विस्मितः सर्वोऽपि लोकः। ततोऽभिनिवेदितं राज्ञः॥ ततः पुनरपि कियद्दिनानन्तरं राजाऽऽदेशं प्रेषितवान्—'भवद्ग्रामस्य सर्वतोऽतीव रमणीया

वालुका विद्यते, ततः स्थूलवालुकामयाः कतिपयदवरकाः कृत्वा प्रेष्याः' इति। एवं राजादेशे समागते सर्वोऽपि लोकस्तथैव मिलितः। पृष्टश्च रोहकः। तेन प्रत्युत्तरमदायि—'नटा वयं, नृत्यमेव विद्मो, न दवरकादि, राजादेशश्चावश्यं कर्तव्यः, ततो 'बृहद् राजकुलम्' इति चिरन्तना अपि कतिचिद् वालुकामया दवरका भविष्यन्ति इति, तन्मध्यादेकः कश्चित् प्रतिच्छन्दभूतः प्रेषणीयः, येन तदनुसारेण वयमपि वालुकामयान् दवरकान् कुर्मः'। ततो निवेदितमेवं राज्ञो नियुक्तैः। राजा च निरुत्तरीकृतस्तूष्णीमास्ते। ततः पुनरपि कतिचिद्दिनानन्तरं जीर्णहस्ती रोगग्रस्तो मुमूर्षुर्ग्रामे प्रेषितो(दत्तश्चादेशो) यथा—'अयं हस्ती 'मृतः' इति न निवेदनीयः, अथ च प्रतिदिनमस्य वार्ता कथनीया, अकथने ग्रामस्य महान् दण्डः'। इति। आदेशे समागते मिलितः सर्वलोकः। पृष्टश्च रोहकः। ततस्तेनोक्तम्—'दीयतामस्मै यवसः, पश्चाद् यद् भविष्यति तत् करिष्यामि'। ततो रोहकादेशाद् दत्तो यवसस्तस्मै। रात्रौ हस्ती च पञ्चत्वमुपागतः। ततो रोहकवचनेन ग्रामेण गत्वा राज्ञे निवेदितम्—'देव! अद्य हस्ती न निषीदति, नोत्तिष्ठति, न कवलं गृह्णाति, नापि नीहारं करोति, नाप्युच्छ्वासनिःश्वासौ करोति, किं बहुना?—कामपि सचेतनचेष्टां न तनोति'। ततो राज्ञोक्तम्—'किं मृतः करी?'। ततो ग्राम आह—'देव! देवपादा एवं ब्रुवते, न वयम्' इति। तत एवमुक्ते राजा मौनमाधाय स्थितः। अगाद् ग्रामलोकः स्वगृहम्॥ पुनरपि 'युष्मद्ग्रामे स्वच्छस्वादुजलपूर्णः कूप इह प्रेष्यः शीघ्रम्' इत्यादिष्टो ग्रामो रोहकं पृष्टवान्। स उवाच—'एष ग्राम्यः कूपः, ग्राम्यः स्वभावाद् भीरुः स्यात्, न च स्वजातीयमन्तरेण विश्वासमुपगच्छति, ततो नागरिकः कश्चिदेकः कूपोऽत्र प्रेष्यः, येन तत्रैष विश्वस्य तेन सहागच्छति'। इति निरुत्तरीकृत्य प्रेषिता राजनियुक्ताः। तैर्निवेदित च राज्ञः। ततः स्वचित्ते रोहकबुद्ध्यतिशयं मत्वा तूष्णीं स्थितः। पुनरपि कियद्दिनानन्तरं 'ग्रामस्य पूर्वदिग्वनखण्डः पश्चिमायां कर्तव्यः' इति राज्ञाऽऽदिष्टे ग्रामो रोहकबुद्धिं

प्राप्य वनखण्डस्य पूर्वस्यां दिशि स्थितः, ततोऽभूद् ग्रामस्य पश्चिमदिशि वनखण्डः। ततो विज्ञप्तं राज्ञे। पुनरपि कालान्तरे 'वह्निं विना पायसं पक्तव्यम्' इत्यादिष्टे ग्राम एकत्र मिलित्वा रोहकमपृच्छत्। तेनोक्तम्–'तन्दुलानतीव जलभिन्नान् कृत्वा रविकर-संतप्तकरीषपलालादीनामूष्मणि तन्दुलपयोभृता स्थाली स्थाप्या'। तैस्तथैव कृतम्। जातं परमान्नम्। विज्ञप्तं राज्ञे। विस्मितं च तच्चेतः॥ ततो राज्ञा रोहकस्य बुद्ध्यतिशयं मत्वा तदाकारणायादिष्टम्–'येन बालकेन मदादेशाः सर्वे प्रायः स्वबुद्धिवशात् संपादिताः, तेनावश्यमत्रागम्यम्, परं न शुक्लपक्षे नापि कृष्णपक्षे; न रात्रौ न दिवा; न छायया नाप्यातपेन; नाकाशेन न पादाभ्याम्, नापि पथा नाप्युत्पथेन, न स्नातेन नाप्यस्नातेन।' इत्यादिष्टे स रोहकः कण्ठस्नानं कृत्वा गन्त्रीचक्रस्य मध्यभूमिभागेन ऊरणामारूढो धृतचालनीरूपातपत्रः सन्ध्यासमयेऽमावास्याप्रतिपत्संगमे नरेन्द्रपार्श्वेऽगमत्। स च 'रिक्तहस्तो न पश्येद् नृपं देवं गुरुम्' इति विमृश्य पृथिवीपिण्डं लात्वा गतः। प्रणतो राजा। मुक्तश्च तत्पुरः पृथिवीपिण्डः। ततः पृष्टो राज्ञा रोहकः–'रे रोहक! किमेतत्?' तेनोक्तम्–'देव! देवपादाः पृथिवीपतयः, ततो मया पृथ्वी समानीता'। श्रुत्वा चेदं प्रथमदर्शने मङ्गलं वचस्तुतोष राजा। मुत्कलितः शेषग्रामलोकः॥ रोहकः पुनरात्मपार्श्वे शायितः। गते च यामिन्याः प्रथमे प्रहरे रोहकः शब्दितो राज्ञा–'रे जागर्षि किं वा स्वपिषि?'। 'देव! जागर्मि'। तर्हि किं चिन्तयसि?'। स प्राह–'अश्वत्थपत्राणां किं दण्डो महान्, किं वा शिखा!' इति। तत एवमुक्तो राजा संशयमापन्नो वदति–'साधु चिन्तितम्, परमत्र को निर्णयः?'। तेनोक्तम्–'यावदद्यापि शिखाग्रभागो न शोषमुपयाति तावद् द्वे अपि समे'। ततो नृपेण पुलकाञ्चितेन पार्श्ववर्ती लोकः पृष्टः। तेन सर्वेणाविगानतः प्रतिपन्नम्। ततो भूयोऽपि रोहकः सुप्तवान्। पुनरपि द्वितीये यामे राज्ञा पृष्टः–किं रे जागर्षि न वा?'। स प्राह–'जागर्मि'। 'रे किं चिन्तयसि?'।

'देव ! छागिकाया उदरे अभ्युत्तीर्णा इव कथं वर्तुलगुलिका जायन्ते ? ।' तत एवमुक्ते संशयापन्नो राजा तमेव पृष्टवान्–'कथमेतत् ?' । 'देव संवर्तकाभिधवातविशेषात्' ततः पुनरपि सुप्तः । तृतीये यामिनीयामे पुनरपि पृष्टोऽवादीत्–'जागर्मि' इति । 'रे किं चिन्तयसि ?' । 'देव ! खडेलिकाजीवस्य यावन्मात्रं शरीरं तावन्मात्रं पुच्छम्, उत हीनाधिकम् ?' इति । तत एवमुक्ते राजा निर्णयं कर्तुमशक्तस्तमेवापृच्छत्–कोऽत्र निर्णयः ?' सोऽवादीत्–'देव ! समम्' इति । ततः सुप्तः । प्रभाते च मङ्गलपटहनिस्वने सर्वत्र प्रसरमधिरोहति राजा प्रबोधमुपाजगाम । शब्दितवांश्च रोहकम् । स च निद्राभरमुपारूढो न प्रतिवाचं दत्तवान् । ततो लीलाकम्बिकया मनाक् स्पृष्टवान् । ततः सोऽनिद्रो जातः । पृष्टश्च–किं रे सुप्तः ?' । देव !–'जागर्मि' तर्हि किं चिन्तयसि ?' । 'देव ! एतच्चिन्तयामि, 'कतिभिर्जातो देवः ?' इति' । तत एवमुक्ते सव्रीडं मनाक् तूष्णीमतिष्ठत् । ततः क्षणानन्तरं पृष्टवान्–'कथय, रे कतिभिरहं जातोऽस्मि ?' । स प्राह–'पञ्चभिः' । पुनरपि पृष्टः, 'केन केन ?' इति । स प्राह–'एकेन तावद् वैश्रवणेन, तस्येव भवतो दानशक्तिदर्शनात्; द्वितीयेन चाण्डालेन, वैरिसमूहं प्रति चाण्डालस्येव कोपदर्शनात्, तृतीयेन रजकेन, यतो रजक इव वस्त्रं परिपील्य जनस्य सर्वस्वमपहरन् दृश्यसे; तुर्येण वृश्चिकेण, यद् मामपि बालकं निद्राभरसुप्तं लीलाकम्बिकाग्रेण वृश्चिक इव निर्दयं तुदसि; पञ्चमेन निजपित्रा, येन यथावस्थितं न्यायं सम्यक् परिपालयसि । एवमुक्ते राजा तूष्णीमास्थाय प्रातःकृत्यमकरोत् । जननीं च नमस्कृत्यैकान्ते पृष्टवान्–'कथय मातः ! कतिभिरहं जातः ?' । साऽऽह–'वत्स ! किमेतत् प्रष्टव्यम् ?, निजपित्रा त्वं जातः' । ततो राजा रोहकोक्तं कथितवान् । वदति च–'मातः स रोहकः प्रायोऽलीकबुद्धिर्न भवति, ततः कथय सम्यक् तत्त्वम्' इति । तत एवमतिनिर्बन्धे कृते सति मात्रोक्तम्–'यदा त्वद्गर्भाधानमासीत् तदाऽहं बहिरुद्याने वैश्रवणपूजायै गता, तं च यक्षमति-

शयरूपं दृष्ट्वा हस्तसंस्पर्शेनच संजात मन्मथोन्मादा भोगाय तं स्पृहितवती; अपान्तराले च समागच्छन्ती चाण्डालयुवानं सुरूपमेकमपश्यम्, ततस्तमपि भोगाय स्पृहयामि स्म; ततोऽर्वाक्तने भागे आयान्ती तथैव रजकं दृष्ट्वाऽभिलषितवती; ततो गृहमागता सती तथाविधोत्सववशाद् वृश्चिकं कणिकामयं भक्षणाय हस्ते न्यस्तवती; ततस्तत्संस्पर्शतो जातकामोद्रेका तमपि भोगाय शंसितवती। तत एवं यदि स्पृहामात्रेण पितरः संभवन्ति तन्न जाने, परमार्थतः पुनरेक एव ते पिता सकलजगत्प्रसिद्धः।' तत एवमुक्ते राजा जननीं प्रणम्य रोहकबुद्धिविस्मितमनाः स्वावासमगात्। रोहकं सर्वेषां मन्त्रिणां मूर्धाभिषिक्तमन्त्रिणमकार्षीत्॥ 'रोहकादिवत्' इत्यत्रादिशब्दादन्येऽपि बुद्धौ दृष्टान्ता वाच्याः॥ ॥ इति बुद्धिप्रागल्भ्ये रोहककथा॥३॥

**(कथा ४) वञ्चनाबहुला नार्यो, विश्वासस्तासु नोचितः। कैतवेन विना मृत्या, वेश्यया रञ्जितो वणिक्॥१॥**

कुङ्कुमपुरे हीरकः श्रेष्ठी। तस्य प्राज्ञो मकरन्दाह्वः पुत्रः। स सर्वविद्यः सन् वेश्यानां गृहे नियुक्तः। कपटविद्याः पठति। सर्वं कैतवजालं विवेद। अधीतवेश्याचरितश्च तया कुट्टिन्या श्रेष्ठिनेऽर्पितो मकरन्दः। पाठनमूल्यं द्रम्मलक्षं लेभे, ऊचे चेमां प्रतिज्ञाम्—'यद्यसौ मदध्यापितः कयापि मायाविन्या वञ्च्यते देशान्तरगतोऽपि तदाऽहं दण्डनीया हे श्रेष्ठिन्!' इति। अन्येद्युः श्रेष्ठ्यादेशादमरपुरं मकरन्दो गतः। तत्र रञ्जितनृपप्रदत्तप्रसादः पण्यक्रयविक्रयपरः सुखेन तिष्ठति। तत्र च तरुणहरिणवागुरा चतुःषष्टिकलाविदुरा मदिरा नाम गणिकाऽस्ति। तस्या वृद्धा निगदति—'यथा त्वमेनं श्रेष्ठिनं युवानं रञ्जय' इति। साऽपि सगर्वमाचष्टे, 'कोऽयं मृदुमना गृही?, अतिजठरवैराग्यकठिनमनसां योगिनामपि क्षणादेव समाधिभङ्गाय प्रगल्भेऽहम्'। इति गलगर्जिं वितत्य सोपायनां स्वां दूतीं प्रजिघाय। सा च तत्र प्रणम्य सविनयं श्रेष्ठ्यनुज्ञया नीचासने निषद्य जगाद—'अवधारय स्वामिन्! अत्र पुरे

मदिरा नाम गणिका मम स्वामिनी गुणज्ञा; त्वामेषा संचरमाणं दृष्ट्वा कामशरप्रहारजर्जराऽभूत्, ततश्च "बिभ्राणा हृदये त्वया विनिहितं प्रेमाभिधानं नवं, शल्यं यद् विदधाति सा विधुरिता साधो! तदाकर्ण्यताम्। शेते शुष्यति ताम्यति प्रलपति प्रम्लायति प्रेङ्खति, भ्राम्यत्युल्लुठति प्रणश्यति दलत्युन्मूर्च्छति क्रुध्यति ।।१।।" इत्यादि सविस्तरमभिधाय घनसारसारफालिशालि बीटकमदात्। प्रतिवचनं च ययाचे। मकरन्देन निर्दाक्षिण्यमभाणि—'एवंविधविदग्धभणितीनां नानभिज्ञा वयम्, अन्यत्र प्रयुज्यतामीदृशी वाचोयुक्तिः'। सा दूती श्यामानना गत्वा तां नत्वाऽचीकथत्। सा फालच्युता द्वीपिनीव नितम्बिनी विलक्षाऽऽसीत्। तथाऽप्यनिर्विण्णा भूयो भूयश्चाटूक्तिगर्भाननङ्गलेखान् प्रैषीत्। मकरन्दश्च मेरुवद् निश्चलो न चलितः। अन्यदा सा मदिरा मकरन्दाय निजाप्तचेट्याऽबीभणत्—'त्वं तावदुपलकठिनः, अहं प्रेम्णाऽत्यन्तमृदुस्वाभावा, त्वां विना जीवितुं नोत्सहे। ज्ञापितोऽसि। स्वस्त्यस्तु तुभ्यम्। पुनर्भवान्तरे दर्शनं भूयात्। अहं काष्ठानि भक्षयामि' इति। मकरन्दः श्रुत्वाऽपीदं समुत्थाय यातः। चेट्या तत् सर्वं स्वामिन्यै विज्ञप्तम्। ततः सा दक्षैराप्तपुरुषैर्नगरदूरस्थैः सुरङ्गां स्वगृहगामिनीं मृदङ्गपुटमात्रप्रवेशतलिनभूपीठामचीखनत्। काष्ठानि चोपरि निवेशयांचकृषी। विपुलापवरिकाकाराणि प्रवेशद्वाराणि च तानि विधापयामासुषी। निष्पन्नेऽस्मिंस्तत्र स्नात्वा कृतदाना समहाजनाऽश्वारूढा चित्यायै चचाल। आकर्ण्य चेदं कर्णाकर्णिकया मकरन्दः सत्यमसत्यं वा स्वदृग्भ्यां निर्णिनीषुर्वेषान्तरितस्तत्र मेलापके मिलितो बहिरगात्। चितासन्नस्तस्थौ। सापि चकोराक्षी तुरगादवतीर्योर्ध्वीभूय जगादैवम्—'परमेश्वरा लोकपालाः! अहं मकरन्दाख्यस्य निष्ठुरस्य श्रेष्ठिसूनोर्मदनविजयिरूपस्य गुणैराकृष्टा तं प्रार्थितवती; तेन तु सुभगशिरोमणिनाऽपहस्तिता, 'गणिकामात्रं मायाविनी' इति दृष्टा, ततो निराशाविषादनिषादस्पर्शमलिनान् प्राणांस्तृणवत् त्यजामि, पश्यन्तु महाजनाः इति निगद्य सद्यः

काष्ठेषु विवेश। क्षणान्तरे तदाप्तनैर्दत्तोऽग्निः। भित्त्वा च पादप्रहारेण भूमिपुटं सुखेन गृहमेत्य गुप्तवृत्त्या तस्थुषी कैतवविदुषी। मकरन्दस्तु तत् तथाविधं दृष्ट्वा सत्यमेव मन्यमानो 'हा हा निष्ठुरोऽहं, पापिष्ठोऽहं, जडग्रहोऽहम्' इति स्वं निन्दन् स्वगृहमियाय। महाजनस्तु विचित्रवार्तामुखरः स्वं स्वं स्थानं गतः। श्रेष्ठिसूनुर्न भुङ्क्ते, न शेते, न पठति, न विलिम्पति, न स्नाति; केवलं तद्दुःखदुःखितो मृत इवास्ते। गच्छति चान्तराऽन्तरा मदिरागृहम्। तत्र च मदिरायास्तानि तान्यौर्ध्वदेहिकानि क्रियमाणानि दानानि दीयमानानि प्रलपन्तं परिजनं हृदयमाघ्नानामक्कां च यथा यथा पश्यति तथा तथा बाढं पीड्यते शोकेन। गतेषु कियद्दिनेषु मकरन्दो विरहासहोऽक्कामाह—अहं मदिराविरहासहोऽग्निनाऽऽत्मानं मारयिष्यामि। वृद्धया ज्ञातं—प्रत्यायितोऽयम्। भाषितश्चायम्—'कथं म्रियते?'। स प्राह,—"ससिणेहदेहदहणे किं भणिमो तस्स विरहदहणस्स?। जस्स पडियारकरणे चियाणलो चंदणरसुव्व ॥१॥" ततोऽक्कया प्रोक्तम्—'अस्माकमिष्टो ज्योतिर्विदेकश्छेकोऽस्ति, तं पृष्ट्वा यद् रोचते तत् कुर्वीथाः'। आहूतोऽयमक्कया। ग्राहितमर्मा निषण्ण उपश्रेष्ठि। श्रेष्ठिना जगदे—'गणन! गणय यदि मदिराया योगं प्रेत्य मे पश्यसि तदादिश यथाऽग्नौ पतामि म्रिये च। अथ शठराजो गणकः, स प्राह—'मा दुःखं कृथा वृथा, इहापि सा ते पक्षान्तर्मिलिष्यति'। इति मधुरवाचं श्रुत्वा तुष्टः श्रेष्ठी गणकाय धनमदत्त। मकरन्दो दिनानि नवदशानि मदिराप्रीत्या तन्मन्दिर एव तिष्ठति। एकदोत्तन्द्रचन्द्रायां निशि वात्सु प्रोन्मीलन्नवमल्लिकासुरभिषु पवनेषु विजृम्भमानेषु कुसुमचापचापलेषु वनेषु श्रेष्ठिनन्दनो मदिरायाः प्रेमाणं स्मृत्वा 'हा! प्रिये! पद्मगौराङ्गि! सुकेशि! कृशोदरि! हा क्व गता?' इत्यादि यावत् प्रलपति तावदवसरज्ञा वृद्धमाता मदिरां ताम्बूलपरिपूर्णमुखीं मुक्ताताडङ्कभूषितकर्णां स्फारमुक्ताकलापकिरणद्विगुणितरोहिणीरमणकिरणां शेषनिर्मोकधवलवसनावृतां गजपतिगमनां पुष्पस्रजाऽलङ्कृतकरकमलां प्रेक्ष्य

मकरन्दस्य पुरोऽतिष्ठिपत्। यावत् पुरः पश्यति तावत् प्रलापवाचोऽपि सत्यतामवापुः। सैव पुरो वर्तते मदिराक्षी। अभाषत च 'किं सैव युवजनोन्मादमदिरा मदिरा?'। सापि माकन्दमकरन्दभरोपभोगमाद्यत्कोकिलाकुलकलकोमलया वाचोवाच–'हुं' इति। श्रेष्ठी आह–'कुतस्त्वं जीविता मज्जीवातुदर्शने!?'। सा प्राह–'शृङ्गाररसभृङ्गार! त्वद्ध्यानमग्नाऽहमग्निसाहसं साधयित्वा दिवमगाम्। तत्र शक्रो मां सगौरवमद्राक्षीत्; उवाच च–'याचस्व सात्त्विकि! किञ्चित्'। मया तु विज्ञप्तम्–'यदि तुष्टोऽसि तदा मर्त्यदेहेन मामनेन सह योजय, यदनादृतया मया सत्त्वमिदमाचेरे'। तेनापि भगवताऽहमिह नाकलोकादानीय मुक्ताऽस्मि'। एवं श्रुतेऽमृतमयमिव मदनमयमिव महोत्सवमयमिव तं क्षणं मेने। स्थितश्च तया सह। रक्तचित्तश्च सर्वस्वं शनैर्गृहीतः। गणयन्ति नापशब्दं न वृत्तभङ्गं क्षयं न चार्थस्य। रसिकत्वेनाकुलिता वेश्यापतयश्च कवयश्च ॥१॥" निर्द्रव्यो जातः। वेश्यया तादृग् बहु मन्यते न। बहुमानमलभमानेन मकरन्देनाप्तपुरुषपार्श्वाद् (ज्ञापितो)हीरकः श्रेष्ठी गत्वा कुट्टिन्यै कथयामास–'त्वं मम लक्षं देहि पुत्रपाठपदप्रदत्तम्, त्वया पाठितोऽपि देशान्तरगत एवमेवं जग्धः स साधारणस्त्रिया'। सापि तद्वचनमाकर्ण्य सकर्णाऽभ्यधात्–'श्रेष्ठिन्! जीवदवस्थाप्रपन्नान् गणिकासत्कांस्तमध्यजीगपम्, न तु मृत्यवस्थासत्कान्, तथापि विषादं मा कृथाः, सर्वं सकलान्तरं व्यावर्तयिष्यामि, चल मया सार्धं तत्र'। मन्त्रयित्वा गतौ। तौ तत्र नगरं प्राविशताम्। श्रेष्ठिनो डुम्बवेषं स्वस्य च डुम्बीवेषमचीक्लृपत्। एकदा तं मकरन्दं मदिरया सह गृहद्वारमण्डपिकायां दन्तिदन्तमये पट्टे निषण्णं दासीभिश्चन्दनरसेन संवाह्यमानचरणं दृष्ट्वा तौ डुम्बौ गतौ तत्र। ततः साऽऽह–'ही वत्स! क्वास्मान् विहाय गतोऽसि? पुनर्विज्ञप्तिकामात्रमपि न दत्तवानसि;अधुनाऽप्येह्येहि, सर्वाङ्गमालिङ्गनसुधासारेण सिञ्च सर्वाङ्गानि, क्व तावन्मात्रं धनं त्वया गमितम्, ?' इत्यरुदताम्। अथ मिलितो वेश्यापरिजनः। वृद्धा खेदमेदुराह–

'क्व गन्तव्यम्, किं दत्त्वा छुटितव्यम्, कः शरणं प्रतिपत्तव्यः ?' इत्यादि। गुप्तमुक्तौ 'युवाभ्यां स्वस्य ग्रहिलत्वं प्रकाश्य सर्वमपि लात्वा गन्तव्यम्, मालिन्ये गते पुनर्मदिरेन्दिरया मन्दिरं पूरयेत्' इति। ततः सर्वद्रव्यं गृहीत्वा वेश्याकुलक्रमायातं पुत्रदत्तं च निजपुत्रं गृहीत्वा श्रेष्ठी सकुट्टिनीकः सद्रव्यो निजनगरमागात्। पुत्रं स्वपदे निवेश्यानुशिष्य स्वयं दीक्षामादाय जन्मजराविरहितं पदमवाप ।। ।।इति स्त्रीमायाकथा ।।४।।

(कथा ५) तत्त्वातत्त्वविचाराय, स्वैव बुद्धिः क्षमा नृणाम्। परोपदेशो विफलो, दुर्बुद्धेः कुलपुत्रवत् ।।१।।

सुधान्यग्रामे स्थविरिका निवसति। तस्याः पतिर्यौवनावस्थायां परासुरासीत्। पुत्रस्त्वेको वर्तते। तं च स्वं च परगृहकर्म-करण–कर्तन–लोष्टनादिभिश्चिरमजीजिवत्। सुतस्तु पशुप्रायोऽन्ननिष्ठापनशूरो निरक्षरः स्थूलबहुलोऽरण्यजीववदव्यवहारज्ञः। तमेकदा वृद्धा स्निग्धाक्षरमवदत्–'वत्स! त्वं बालः श्मश्रुधरः कृतोऽसि, संप्रति कामपि निर्वाहचिन्तां विमृश'। सुतः प्राह–'मातः! कमु-पायं सूत्रयामि ?'। मातापि समाचचक्षे–'आसन्ननगरे त्वत्पितुः स्वामी प्रौढराजपुत्र एकश्छेकः सुसेव्योऽस्ति, तं सेवितुं प्रयाहि'। इत्युक्त्वा जीर्णकोशस्थं मलपङ्किलं खड्गं समर्प्याशीर्वादयित्वा विससर्ज। स गच्छन् पप्रच्छ तुच्छमतिः–'मात! लोकरञ्जने क उपायः ?, शाधि, कदापि न शिक्षितोऽहम्'। माताऽभाषत–'वत्स! दृष्टे मनुष्यमेलापके तारस्वरमभिधातव्यं 'नमस्कारः' इति। चचाल बालिशो ग्रामात्। अरण्यं गतः। तत्र मृगयुषु मृगग्रहणाय धृतपाशेषु मृगेषु गीताकृष्टेषु तदासन्नमागतेषु ग्रामेयकस्तारं तारं 'नमस्कारः, नमस्कारः' इति जल्पति स्म। ततो मृगास्त्रस्ताः। मृगव्यनरास्तं रुरुषुः। मुष्टियष्टिलोष्टादिभिर्जघ्नुः। स तु बभाषे, 'अहं मात्रैवं शिक्षितः, मा मां घातयत'। 'स्थानान्तरं गतः' कथं व्यवहरेयम् ?, इति पृष्टास्ते दुष्टाः प्रोचुः–'दृष्टेषु मानवेषु नीच-

कैर्भूयत इति परममावर्जनारहस्यम्’ । पुरः प्रतस्थे तैर्मुक्तः । स विशङ्कः पशुर्नगरपरिसरमाप । तत्र पूर्वं चौरहृतानि रजकानां वस्त्राणि गतानि सन्ति । तैर्गूढपुरुषाः प्रयुक्ताश्चौरप्रचारमालोकयन्ति । तत्रान्तरे स मूर्खः कुलपुत्रोऽपि तत्रोपसर्पन् नृन् द्वित्रान् वस्त्रासन्न आपतन् ननाम । नमन् नमन्नागच्छन् ‘अयमेव चौरः’ इति बद्धो हतश्च, रजकैर्मेलितः कुम्भकृन्मृत्तिकायाः । तत्रापि सद्भावे कथिते तैर्मुच्यमानस्तान् पृष्टवान्–‘मां तथा शिक्षय यथा नाहं पराभूये परैः’ । इत्युक्तौ ‘नूनं व्यवहारबाह्योऽयम्’ इति निश्चित्य शठा अशिक्षयन्–‘दृष्टे जने घने ‘भवतां शिरस्यूषः पततु’ इति वाच्यम्’ । पुरः संचरन्नुद्यानिकायात्रार्थं गच्छतो नृन् दृष्ट्वा ‘भवतां शिरस्यूषः पततु’ इति न्यगादीत् । तैरपि कपोलपूजा चक्रे । सत्ये प्रोक्ते मुक्तः पाठितश्च, जनेषु दृष्टेषु ‘सर्वदैवं वो भूयात्’ इति ब्रूयाः । पुरस्तान्मृतकमागच्छति । स उवाच–‘सर्वदैवं वो भूयात्’ इति । तैरपि वृन्दस्थैः क्षते क्षारनिक्षेपपरः स पिट्टयांचक्रे । सत्ये कथिते प्रैषि, शिक्षितस्त्वेवम्–‘कदापि मैवं भूयात्’ इति । अग्रे वैवाहिकवृन्दं दृष्ट्वा ‘कदापि मैवं भूयात्’ इति लपन् कणमूढकवत् पिट्टितः । एतावद्भिर्महोत्सवैः स्वगुणलब्धैः पुरं प्रविशन् राजपुत्रगृहं गतः । तं दृष्ट्वा ननाम । तेनापि स्वपार्श्वे स्थापितः । ‘द्रम्मं भञ्जयित्वा समेहि’ इत्यादिष्टे द्रम्ममेव भनक्ति लोष्टैः । ‘पशुं बधान’ इत्युक्ते पशुमेव रज्जुभिर्वेष्टयति । अन्यदा शीर्षस्थगोमयपिटकया दास्या सह शिरःस्थजलघटः स प्रैषि बहिः क्षेत्रखलकलेपनाय । गच्छता पृष्टम्–‘मया किं कार्यं ?’ । स्वामिनोक्तम्–‘यदियं करोति’ । क्षेत्रे गतया तयोर्ध्वया गोमयपिटकं क्षिप्तम्, तेनाप्यूर्ध्वेण घटः क्षिप्तो । भग्नश्चायम् । जलमगमत् । ततश्चपेटया हतोऽसौ दास्या कोपात् । सोऽपि ‘यदियं करोति तत् त्वया कार्यम्’ इति स्मरणात् तां जघान दृढचपेटया । नष्टा सा । गृहं गता । सोऽपि गृहं गतः । गृहस्वामिना पृष्टम्–‘किमिदम्, ?’ । ताभ्यामपि स तादृग् वृत्तान्तो निवेदितः । जहसे कुटुम्बेन । परमार्थानभिज्ञः स एवं

स्वामिनं दुनोति। अन्येद्युर्ग्रामपरिषदि स्थितं स्वामिनं गत्वा गाढस्वरं प्रोवाच–'राजपुत्र! रब्बा निष्पन्नाऽस्ति, उत्तिष्ठोत्तिष्ठ'। विगुप्तः प्रभुरुत्थाय लज्जमानो ययौ। शिक्षयामास च–यथाऽवसरं रहो वक्तव्यं कर्णे लगित्वा'। कालान्तरे तु राजपुत्रस्य गृहे प्रदीपनं लग्नम्, राजपुत्रो राजकीयकार्ये निषण्णोऽस्ति। गृहमानवैस्तत्र प्रहितो जाल्मः–'कथय रे गत्वा यथा वृन्देनागत्य शमयति वह्निं गृहपतिः' इति। गतोऽसौ तत्र, यावत् पश्यति तावज्जनाकुलम्–'नाद्याप्यवसरः' इति पुरःस्थश्चिरं तस्थौ। क्षणान्तरे कर्णे भूत्वा 'ते गृहे अग्निः लग्नोऽस्ति' इत्युक्तम्। सोऽपि सभ्रूभङ्गमुवाच–'रे किं तदैव न ज्ञापिता वयम्,?'। सोऽप्याह–'समयो नाभूत्, भवद्भिरेवोपदिष्टं–'समये विमृश्य रहो वक्तव्यम्' इति। स्वाम्यपि सविषादं सहासं सदैन्यं सचिन्तं च परामममर्श–'जड एवायम्। ''यस्य नास्ति स्वयं प्रज्ञा, शास्त्रं तस्य करोति किम्?। लोचनाभ्यां विहीनस्य, दर्पणः किं करिष्यति?॥ १॥" क्षणार्धेन यावत् समुत्थाय गृहमेति तावद् भस्मीभूतं गृहम्, बाहौ धृत्वा बालिशमुवाच स्वामी–'पश्य, तव चिरविलम्बेन कथनेन विनष्टमिदमीदृक्। तस्मादतः परं 'यत्राग्नेर्लेशं धूमाशिखामात्रमपि पश्यसि तत्र यत्तज्जलमारनालं मूत्रं वा क्षेप्यमेव' इति न्यदिक्षत्। स्थितश्चायं तन्निष्ठः। अन्यदा कृतस्नानो राजपुत्रः केशपाशधूपनाय जालिकाकुलं धूपदहनं पुरतः स्थापयित्वा न्यषीदत्। धूपमदहत्। कुलपुत्रकस्तु तमुपदेशं स्मृत्वा सहसाऽऽनीयोपरि मलिनं जलं पात्रे कुत्सिते स्थितं शिरसि चिक्षेप। क्रुद्धः प्रभुः शिरसि हत्वा तं निरवासयत्। स्वप्रज्ञाहीनतया सोऽपि पशुदेश्यो रुलित्वा ममार ॥ इति मूर्खकथा ॥५॥

(कथा ६) यदेकः स्थविरो वेत्ति, न तत् तरुणकोटयः। यो नृपं लत्तया हन्ति, वृद्धवाक्यात् स पूज्यते ॥१॥

क्वचिद् महानगरे कोऽपि महर्द्धिर्नृपः। तस्य शतसंख्यास्तरुणाः सेवकाः। ते ब्रुवन्ति–'देव! वृद्धपुरुषाः स्खलद्गतयश्चलन्मतयः

कफपङ्किलवदनाः प्रोद्दण्डडिण्डीरपिण्डपाण्डुरतुण्डमुण्डाः सभां विनाशयन्ति, ततस्तान् नात्मसंनिधौ स्थापयितुमर्हसि'। राजापि तत् तथा मेने। "प्रायेण भूमिपतयः प्रमदा लताश्च, यत्पार्श्वतो भवति तत्परिवेष्टयन्ति।" राज्ञा द्वाःस्थायादिदिशे-'भोः! वृद्धस्य कस्यापि मन्त्रिणः श्रेष्ठिनो विप्रस्य राजपुत्रस्य वा प्रवेशो न देयः'। ततःप्रभृति वृद्धः कोऽपि नारोहति राजद्वारम्। युवानस्तु लब्धप्रसराः सगर्वाः स्फुरत्कोटिचोटयस्ताम्बूलमत्ताः स्फारकपोलाः प्रतारयन्ति नृपं, ग्रसन्ते राजराज्यम्। एकदा ब्राह्म्ये मुहूर्ते क्षितिपतिना विमृष्टम्-'एभिर्युवभिरहं मन्त्रे मन्त्रे जरद्भ्यो दूरं धृतः, यदा कदाचिद् दैवादुत्कटे रिपुसंकटे पतिष्यामि तदाऽमीभिरुद्वेष्टयिष्ये नवा? प्रथममदसीयां बुद्धिं परीक्षे' इति। प्रातः सेवार्थमागतांस्तरुणानाललाप प्रजापः-'योऽस्मांल्लत्तया शिरसि प्रहरति तस्य किं क्रियते?' ततस्ते मत्तोन्मत्तप्रमत्ताभाः प्रत्येकं प्रोचुः-प्रभो! खण्डशः खण्डशस्तस्य चरणश्छिद्यते'। राजा न ध्वनति। ते तु तथैवाहुः। मध्याह्नसमये विसस्रुजिरे भोजनाय यूनः स्वं स्वं सदनम्। एकस्य यूनः पितामहो वृद्धः। स लङ्घते। यदा पौत्रोऽश्नाति तदैव स्वयमश्नाति, वात्सल्यात्। ततः मपच्छेऽसौ जरता-'वत्स! किमद्यातिकालः कृतः?'। तेनापि तद् नृपवाक्यं प्रोक्तं तरुणदत्तमुत्तरं च। जरी प्राह-'राजा चमत्कृतस्तरुणदत्तोत्तरेण नवा?'। पुत्रो निजगाद-'न चमत्कृतः, प्रत्युत मसिमलिनाननः संवृत्तः। प्रोवाच स्थविरः-'तर्हि मत्पार्श्वादुत्तरं कारयोपराजम्' एवमुक्त्वा तौ गतौ राज्ञः सिंहद्वारम्। राजा विज्ञप्तो वृद्धेन-'देव! वयं रीढापात्रं ते, यदि भाषयसि तदा भाषामहे'। राज्ञाऽऽदिष्टम्-'भाषस्व'। वृद्धो भाषते-'देव! यस्त्वां लत्तया जघान तस्य चरणयोर्वैडूर्यमाणिक्यकनकमयं भूषणमारोप्यते'। हसितं भूपालेन, कथितं च-'सुष्ठु भणितम्'। ततो यातयामेन जरालंकृतेन परः शतास्तरुणास्तत्र मेलिताः साक्षेपमालपिताः-'रे हृदयान्धा यूयं न वित्थ वक्तुं, न खलु राज्ञीं विनाऽन्यो नृपं शिरसि हन्तुं

पारयति, सा तु प्रेम्णा पारयति, तस्याश्चरणयोराभरणमेवार्हम्' । स्वात्मसंवादमुदितो राजा तरुणान् निरकासयत्, वृद्धानाराधयामास, राजकार्याणि च साधयामास ॥ इति वृद्धविज्ञत्वकथा ॥६॥

(कथा ७) यत्र तत्रापि जातानां, पूर्वकर्म सहानुगम्। देशान्तरं न याति स्म, श्रुत्वा बालवचः कृती ॥१॥

अङ्गदपुरे निरवद्यविद्यः प्रद्योतनो नाम विप्रः । कालिका नाम पत्नी। तस्य क्रमागतं दारिद्र्यम्। "दण्डीखण्डमितः प्रयच्छ यदिवोत्सङ्गे गृहाणार्भकं, शुद्धं भूतलमत्र नाथ! भवतः पृष्ठे पलालोच्चयः। दम्पत्योरिति जल्पतोर्निशि यदा चौरः प्रविष्टस्तदा, लब्धं कर्पटमन्यतस्तदुपरि क्षिप्त्वा रुदन्निर्गतः ॥१॥" एकदाऽत्यन्तं दारिद्र्योपद्रुतोऽचिन्तयदयम्, यथा—'देशोऽयमधारणीयो मे, ततस्त्यक्त्वाऽमुं देशान्तरमुपसर्पामि' इत्येवमनुसंध्याय कुटुम्बमादाय गृहे ज्वलन्तं दीपं मङ्गल्यद्वारयित्वा संचचार। नगरोपान्तं गतस्य—'यष्टिर्गृहे विस्मृता' इति मनस्यभूत्। तां ग्रहीतुं यावत् सदनं गच्छति तावत् पश्यति कामपि बालिकां श्यामां श्यामवेषां बर्बरकेशां मङ्गल्यार्थं बोधयित्वा मुक्तस्य दीपस्य तैलेनोपानहौ समभ्यञ्जन्तीम्। तां च दृष्ट्वा भीतो विस्मितश्चायं पप्रच्छ—भद्रे! का त्वम्, ? किंवा पादुके तैलेन म्रक्षयसि ?'। ततः सा साट्टहासमवादीत्—'भो विप्र! य एतस्य गृहस्य स्वामी तस्यार्धाष्टमिकाऽहम्, स तु देशान्तरं प्रति चचाल, तमनुगन्तुमहं चरणत्राणद्वयं सज्जयन्त्यस्मि'। एवं श्रुत्वा 'स्थानान्तरे दारिद्र्यं तादृगेव, कथं स्वस्थानमुज्झामि ?' इति मत्वा सकुटुम्बः पुनस्तत्रैव स्थितः। ननु सार्धसप्तवर्षस्थायिन्या अर्धाष्टमिकापरनामाया· द्वादशजन्मद्वितीयराशिस्थशनिकालस्थितेः कथं रूपवत्तापि विद्यते येन बालिकात्वं कल्प्यते ?, मैवम्, कुलदेव्या एव विप्रबोधार्थमेव चेष्टितदर्शनात् ॥

॥ इति कर्मप्राबल्ये विप्रकथा ॥ ७ ॥

(कथा ८) ध्रुवमेकाग्रया भक्त्या, परितुष्यन्ति देवताः। शत्रोरपि प्रसन्नोऽभूद्, गदापाणिस्तपस्विनः ॥१॥

भद्रपुरे जडमतिस्तापस एकः। तस्य मते शिव एव देवः। अत एव गोविन्दे द्वेषः। ततश्च कदाचिद् हरिशङ्कराख्ययात्रार्थं हरिद्वारमुपागमत्। तत्र ददर्श समुदितौ हरिहरौ। स तु हरमेव ननाम, न तु हरिम्, एकपादाश्रयणात् पार्वतीचरणपरिहारेण शिवचरणनन्तृरावणवत्। जलस्नात्रपुष्पचन्द्रनपत्रजलादिभिः शिवपक्षमेवानर्च। यदा तु धूपदहनार्थं धूपदहनं प्रगुणीचकारासौ तदा चिचिन्तवान् हरिः–गन्धस्य घ्राणकोणद्वयप्रवेशस्तावदवश्यंभावी, कथमत्र मां वर्जयिष्यति ?'। एवं विमृशत एवास्य तद्गन्धप्रवेशनिवारणार्थं सहसा करसंपुटेन हरेर्घ्राणं मुद्रितम्। तेन च तस्य कर्मणा प्रमुदितो विष्णुः साक्षाद्भूतः प्रोवाच–'भोस्तापस! तवाभक्तिरप्यसौ मम भक्तिरेव, एकाग्रतया देवाः प्रसीदन्ति, याचस्व यथेच्छम्,। एवं तेनोक्तेऽपि जटी प्राह–'तव प्रसादेन मे न कार्यम्'। ततः सविशेषं तुष्टो हरिः। हरस्य पार्श्वाद् भरटकमुकुटमणेरदृश्यीकरणवशीकरणविषनिग्रहादिसिद्धीरदीदपत् ॥

॥ इति भक्तौ जटाधरकथा ॥८॥

(कथा ९) विद्वद्भिः सह वक्तव्यं, धीवृद्धैर्न पुनर्जडैः। प्रज्ञानाशादिहार्थेषु, दृष्टान्तः पटुवाग् जटी ॥१॥

पाटलिपुरे विप्रयज्ञदत्तस्य सूनुर्महाप्रज्ञश्चैत्रो नाम। स पपाठ किञ्चिद् किञ्चिद् गुरुसंनिधौ। विशेषशास्त्राधिजिगांसया तु महोदयनामकं पत्तनं प्राप्तः। तत्रास्ते उपाध्यायो ज्ञानदर्पणः। तत्पार्श्वे विनयेन चैत्रेण पठनं प्रारब्धम्। संपन्नश्चातुर्विद्यमहोदधिःखण्डनपण्डितश्च। कृतकृत्यश्च पितरं स्मृत्वा स्वदेशं प्रति यियासुर्गुरुमापप्रच्छे। तेनापि सवात्सल्यं भूयिष्ठान् पुस्तकान् दत्त्वाऽनुव्रज्य प्रेषितः। व्यावर्तमानेन च शिक्षा दत्ता–'वत्स! जटाधारैः कूटपाठकैः सह संगतिर्न कार्या, धीभ्रंशात्'। 'तथा' इति गुरोः

शिक्षां मूर्ध्नि निधाय पृष्ठवाहं पुस्तकैर्भृत्वा चचाल। प्रयाणके पञ्चमे सायं नगरमेकं प्रविष्टः। अत्रान्तरे जलदो वर्षितुं प्रचक्रमे। पुस्तकभेदभयात् स्थानमिच्छता तेन दृष्टो भरटकमठः। आहूतश्च भरटकेन। गतश्च मठमध्यमसौ। गुरुवाक्यस्मरणेऽपि कार्यं बलीय एव। उत्तारिताः पुस्तकाः। बद्धोऽनड्वान्। स्थितश्च तत्र चैत्रः। निशायां वार्ताप्रसङ्गेन भाषितो भरटेन चैत्रः—यूयं किं किं वित्थ ?'। सोऽप्याह—'वयं पण्डिताः, यद् यः पृच्छति तस्य तद् व्याख्यामः स्वच्छन्दम्'। एवं श्रुते जटी प्राह—तर्हि व्याख्याहि,—'जातरि भुंजति भरडभसंगी मुहगो रि जड पांडरी। तडतड भुंजइ महण देह पडतड ता वस्सधसमस ॥१॥" इदं श्रुत्वा चैत्रो बहुधा विचिन्तयन्नपि न वेत्ति। जातो विलक्षः। पुनर्जटी प्रललाप—तर्हीदं शृणु,—"सिरिगिरि बोलइ राणा, सिरिगिरि दीजइ काणा। सिरिगिरि बोलइ पंडिया, तीनरिनेता सिरिगिरि सिरिगिरि ॥२॥" चैत्रो न वेत्ति। जटी प्राह—'न वेत्सीदं चेत् कुतस्त्यः पण्डितस्त्वम् ?'। चैत्रो मनसि ललज्जे। प्रभाते प्रश्नेच्छया व्याघुट्य पण्डितस्यैव समीपमुपतस्थौ। वन्दित्वा मठगमनकथां पूर्वोक्तां कथयित्वा तयोः पद्ययोरर्थं पप्रच्छ। गुरुणा भाषिते पद्ये द्वे अपि अभ्यूहनशक्तियुक्ततया आचख्ये, यथा—'वत्स ! कूटपाठेनान्तरितोऽर्थः, न पुनरज्ञातं ते किमपि प्रायः, शृणु,—"यत्र भुञ्जति भस्माङ्गी, मूर्खो वा यदि पण्डितः। तत्र भुञ्जाम्यहं देवि !, प्रत्यक्षो वृषभध्वजः ॥१॥" इत्युमामहेशसंवादे श्लोक एकः। द्वितीयस्तु लोके ख्यातः,—"सकृज्जल्पन्ति राजानः, सकृज्जल्पन्ति पण्डिताः। सकृत्कन्याः प्रदीयन्ते, त्रीण्येतानि सकृत्सकृत् ॥२॥" इति पारम्पर्यं ज्ञात्वा चैत्र आह—'भगवन् ! किं करोमि ?, जलदवृष्टिपारतन्त्र्यवृत्त्या तत्र प्रविष्टोऽहम्, अतः परं तु मूर्खैः सह न संयोक्ष्ये'। गुरुरूचे—'वत्स ! न नवीनमेषामिदं जाड्यम्, किन्तु चिरात्, श्रूयते हि पूर्वम्—'नव तपस्विनो ग्रामाच्चेलुः, अन्तरा समेता नदी, तीर्णाः प्राप्ताः पारं सर्वे, तत एकेनोक्तं—'संख्या गृह्यताम्,

मा कोऽपि मग्नोऽभूत्' इति, ततो गणयति, पश्यत्यष्टौ, नात्मानं नवमं गणयति, ततो रोदिति 'एको मृतः' इति, शेषा अपि तथैव कृत्वा रुदन्ति, इतश्चागताः पथिकाः, केनापि पृष्टं रोदनकारणम्, ज्ञातं तत्त्वम्, बोधिताश्च तैः कृच्छ्रात्, यथा 'अयमेव नवमः' गताः पान्थाः। ततो गुरुं नत्वा प्राप्तश्चैत्रः पितुर्मन्दिरम्। विद्यया महाजनपूज्यपादश्चाभवत्॥ इति जडसङ्गत्यागे चैत्रकथा ॥९॥

(कथा १०) प्रस्फोरयन्ति शौण्डीर्यं, केचिद् वाचैव केवलम्। कार्यकाले तृणायन्ते, यथा स क्षत्रियाधमः ॥१॥

मालवेष्वुज्जयिन्यां कश्चिद् राजपुत्रो राजकुलं याति। सेवां करोति। तत्रायातः कदाचिद् गौर्जरः सेवार्थी शठो भटः। तयोः सिंहद्वारासन्ननिषण्णयोर्जातो मिथः संलापः। प्रथमं मालविको गौर्जरं पप्रच्छ—'भवतः किं नाम?'। गौर्जरेणोचे—'गजसिंहः' इति पितरो वदन्ति। ततो 'गजः सिंहश्च' इति भयकृन्नामोक्तं विचार्य सकोप इव तस्थौ। पश्चाद् गौर्जरेण पृष्टो मालविकः—'भवतां किं नाम देव! कथ्यताम्?'। मालवीयोऽप्याचचक्षे श्मश्रुणि करं क्षिपन्—'भोः! मम बहूनि नामानि, तद्यथा—विंशतिर्वृश्चिकाः, सप्त सर्पाः, चत्वारश्चित्रका इत्यादि कियदुच्यते?'। एतदाकर्ण्य तूष्णीं तस्थौ गौर्जरः। गताः केऽपि दिनाः। एकदा मेघान्धकाराकुलायां निशि राजद्वारे चपेटयाऽऽहत्य मालविकस्य खड्गमाच्छिन्नं गौर्जरेण। मालविकेनापि ज्ञातं यथा—'अनेनैवाहं परिभूतः'। भीतस्तु प्रातर्मीलितस्यापि तस्याग्रे न किञ्चिद् वक्तुमीष्टे। ततो गूर्जरदेशभटेन भाषितः प्रातः—'भोः पुरुष! तव कानि नामानि?'। मालविकोऽप्यलापीत्—'यानि नामानि स्वकीयानि मया तुभ्यं प्रतिपादितानि तानि मातुरुल्लापनकानि, मूलनाम तु 'न किञ्चित्' इति। श्रुत्वेदं तुष्टो गौर्जरो बभाण—'इदमेव सत्यम्, इदं नाम चेत् तर्हि गृहाण तमिमं स्वं खड्गम्। मालविको ललौ कृपाणं न तु ललज्जे निर्जीवः ॥ ॥इत्यसारपुरुषकथा ॥१०॥

**(कथा ११) एकं तत्किमपि ब्रूते, येन ग्राह्यो न जायते। आलं लपन्नपि खलो, यथा खालित्यहृद् भिषक् ॥१॥**

पद्मिनीखण्डपत्तने मायावीरो नाम वैद्यः। स एकदा विदेशाय चचाल। प्रयाणके क्वापि प्रातर्नगरस्यैकस्य तटे पर्यटन् पुष्पितं फलितं चिर्भटीकच्छमद्राक्षीत्। तत्र रक्षकः कोऽपि नास्ति इति निर्भयं प्रविश्य भिषक् चिर्भटानि त्रोटं त्रोटं स्वच्छन्दं भक्षयितुं प्रवृत्तः। अत्रान्तरे समायातः कच्छाधिपतिर्यष्टिपाणिः पितृपतिरिव क्रूरः। ताडितस्तेन वैद्यो दुर्मत्त इव चक्रीवान्। पादयोः पतित्वा चुच्छोट। चलितः पुराय। प्रविष्टो मध्यम्। नगरान्तर्नगराधिपतिं देवकुलाग्रोपविष्टं बहुपरिकरं दृष्ट्वा तमगमत्। धन्वन्तरेराशीर्वादमुवाद। पृष्टः स्वामिना–'के यूयम्?'। तेनोक्तम्–'अगदंकाराः'। ऊचे स्वामिना–'किं किं वित्थ?'। वैद्यो जगाद–'यज्जगति चिकित्सनीयं तरूणां तिरश्चां नृणां वा तदवैमि'। नृपेण गृहेऽग्राहि, भोजितः, पूजितो, भाषितश्चैकान्ते–'मम शिरसि यौवनेऽपि टल्लिः पतिता, स्त्रीभ्यो जिह्रेमि, एतां स्फोटय'। वैद्योऽभाषिष्ट–'इयति किं वाच्यम्?, इदानीमेव साध्नोमि यमुनाजलश्यामलं वेणीदण्डम्'। हृष्टः प्रभुरवदत्–'तर्हि औषधानि मेलय'। वैद्यः प्रभुं तुरङ्गाधिरूढं सहादाय कच्छमगमत्। ताश्चिर्भटीः पश्यतस्तत्पतेः सकन्दा उदपीपटत्। आनिनाय गृहम्। भस्मीचकार। किञ्चित् किलात्मीयमौषधं तैलं च चिक्षेप। आलपच्चेत्थं, लगयेदं शिरसि, खालित्यं यास्यत्येव–'परं मर्कटो न चिन्तनीयः' इति शिक्षा दत्ता। औषधं लगितम्। खालित्यं सप्तदिनकेऽपि न गतम्। प्रभुः पृच्छति–'भो वैद्य! कोऽपि फलोदयो भैषज्ये नैव दृश्यते, किमेतत्?'। वैद्यो भाषते–'त्वया मर्कटश्चिन्तितो भविष्यति, संपूर्णे विधौ कार्यसिद्धिर्नासंपूर्णे'। स्वामी मौनेन स्थितः। अचिन्तयतापि हि चिन्तित एव मर्कटस्तेन। वैद्यस्तु चिर्भटीपालस्य पार्श्वं गत्वा जगाद–'रे त्वयाऽहं कुट्टितः, मया ते सर्वस्वं गमितम्'। कच्छपतिः पादयोर्लग्नः। वैद्यो देशान्तरमगात्। विविधयुक्तिभि-

र्जग्रसे लोकः ॥ ॥इति धूर्तवाग्वैचित्र्ये कथा ॥११॥

(कथा १२) कार्यतात्पर्यमज्ञात्वा, ये वदन्ति विदां पुरः। ते हास्यपात्रं तेषां स्युर्यथा स भगिनीपतिः ॥१॥

केलिवर्धनपुरे मलयकेतुर्नाम गृही निरक्षरशेखरः फल्गुभाषी। स चासन्ने वेलापुरे परिणीतः। कदाचित् पत्नीं ग्रहीतुं श्वशुरकुलमयासीत्। तत्र च स्नानविलेपनभोजनादिभिर्गौरवितः। तस्य च पञ्च शालकाः सन्ति गीतज्ञाः। भगिनी तु तेषां सविशेषं नादस्वरज्ञा। अतिक्रान्ते दिनद्वये तैः श्यालैर्मन्त्रितम्–'अयं भगिनीपतिर्वर्णान् वेत्ति नवा' इति परीक्षामहे। श्वः पञ्चमरागमालपिष्यामः'। तच्च श्रुतं स्वस्रा। ततो ज्ञापितो भर्ता–'श्वोऽमी पञ्चमरागेण गास्यन्ति, त्वं तमेव ब्रूयाः, सावधानो भवेः, अन्यथा हसिष्यसे'। ज्ञातं तत्तेन। द्वितीयदिने गातुं प्रक्रान्तं तैः पञ्चमरागेण। पृष्टश्च भगिनीपतिः–'कोऽयं रागः?'। तेनोक्तं–'पञ्चमः' इति। उत्थिता सभे। दूरे गत्वा तैः पुनः मन्त्रितम्–'मन्यामहे ह्यस्तनीमस्मद्वार्तां श्रुत्वाऽस्मदीयया भगिन्या संज्ञापित एवमुपहासभीरुत्वात्; तस्माद् भाविनि दिने धान्यश्रिया रागेण गास्यते, न चेदमस्मद्भगिन्या श्रुतम्, अनुक्तं च तया प्रायो नासौ ज्ञास्यति, इति हासः सुलभ एव'। इति मन्त्रे जाते द्वितीये घस्रे मिलितायां पर्षदि समागतायां भगिन्यां धान्यश्रिया तैर्गातुमारेभे। भाषितो भगिनीपतिः–'कथय, कोऽयं रागः?'। तेनोक्तं–'छट्ठो'। जहसुस्ते। जगदुश्च–'छट्ठनामा रागः क्वापि केनापि न श्रुतः?'। ततः श्मश्रुमोटनपूर्वं भाषितं मूर्खराजेन–'धिग् मूढाः! भोः! गतदिने पञ्चमश्चेत् अद्य कथं न षष्ठः?'। ततस्तत्पत्न्या लज्जमानया पुरो भूत्वा धान्यश्रीरागाद्यक्षरोपलक्षणार्थं स्थाली समुत्पाटिता। ततो जाल्मशक्रेण बभाषे–'भोः! पूर्वमविमृश्योक्तं नायं षष्ठो रागः, किन्तु 'तोलडो'। सर्वे हसन्ति–कुतस्त्वया तोलडरागो विविदे?'। तेन प्रोचे–'भवतामेव भगिनी वक्ति, पश्यत पश्यत' संकेतयन्ती

दृश्यते'। दृष्टा तैः पाकस्थाली चालयन्ती भगिनी। ज्ञाततद्भावैः सविशेषमुत्प्रासितः-'अहो! नादविद्यातुम्बुरुर्भगिनीपतिः ॥
॥ इति कुवकुर्हस्यत्वे कथा ॥१२॥

(कथा १३) **बिभेति स कथं कृच्छ्राद्,यः स्यादास्वादलम्पटः। खादिष्यति करम्बं यो, विडम्बं स सहिष्यति ॥१॥**

चमरपुरे भुवनपालः श्रेष्ठी। तस्य बहुमनोरथैर्जातः सुतः बङ्गालदेवः। अङ्कादङ्कं संचरन् ववृधेऽसौ। क्षिप्तो लेखशालायां। भूयिष्ठं वाङ्मयमध्यगीष्ट। पण्डितेन प्रत्यर्पितः पितुः 'व्युत्पत्तेः परमामवस्थां मयाऽधिरोपितः' इति भणित्वा। परीक्षितः समस्या-बिन्दुच्युतकादिप्रश्नेषु। तुष्टः श्रेष्ठी भूरिणा भूरिणा सत्कृत्य पण्डितं व्यसर्जीत्। अथैकान्ते निवेश्य श्रेष्ठी सुतमवादीत्-'वत्स! स खलु सर्वज्ञो यो व्यवहारज्ञः, ततः कत्यपि व्यवहारपदानि मन्मुखेन श्रोतुमर्हसि'। स्थितः सावधानो योजिताञ्जलिः शुश्रूषुस्तनूजः। अथाह श्रेष्ठिश्रेष्ठः-'वत्स! बहुभिरपि मूर्खैस्तत्त्वनिर्णयो नास्ति'। अत्रार्थे तपस्विनः कथा। सा चेयम्-'क्वापि पुरे मठोऽस्ति। तत्र त्रयस्तापसा ऐयरुः। स्थिताश्चिरकालम्। एकदा यामिन्यामेक उत्थितो गगनं गरलगवलश्यामजलदान्तर्द्योतमानविद्युत्पुञ्जं दृष्ट्वा शेषौ द्वावपि सतीर्थ्यावाहूयादीदृशत्, यथा-'पश्यत भोः! स्वर्गे प्रदीपन लग्नम्, तत एव ज्वालाधूमयोगः, द्वितीयेनोक्तम्-'सूर्योऽत्रास्ते,स च शीतभीतः श्यामवस्त्रकन्थाभिरन्तरितः कारं कारं पश्यति-'अद्यापि विभातं किंवा न विभातम्'। तृतीयस्त्वाह-'अहमेवं मन्ये-'दैत्योत्पातविधुरे देवलोके महेन्द्रोऽग्निकर्मप्रधानं शान्तिकं कारयन् वर्तते'। एवंविधं विचारयन्तस्तत्त्वमजानन्तस्ते कञ्चित् पण्डितमप्राक्षुस्तदेव, यथा-'किमेतत्?'। सोऽप्याह-'विद्युन्मालाशाली जलदोऽयम्'। इत्येका कथा॥ 'किञ्च-अतिपाण्डित्येनापि वत्स! परिभूयन्तेऽव्यवहारज्ञाः। तत्र पठितमूर्खकथा। तथाहि-लेखशालिकामात्रपरिचयी क्वापि पुरे कोऽप्यस्ति पण्डितपाशः।

स च देवपूजार्थं वाटीं पुष्पपत्त्रयर्थी गच्छंस्तलारक्षेण बभाषे–'क्व भोः! यासि?'। सोऽप्याह–'परस्त्रीग्रहणाय यामि'। तेन हि 'पत्री-शब्दोऽत्र रूढः,किमनेन?, ततो विशेषशब्दं प्रयुङ्क्ते' इत्याशयादूचे। रुष्टस्तलारक्षः। छिन्ना नाशा। ततो लोके रूढम्–'अतिसंस्कृतेन विनष्टम्' इति ॥ तथा–परपृच्छां विना स्वबुद्ध्यैव जडः कार्याणि कुर्वंस्तापसशिष्यवत् पापाकीर्त्योर्भाजनं भवेत्'। वङ्कालदेवः साह–'तात! कोऽसौ तापसशिष्यः?'। भुवनपालः प्राह–'वत्स! पूर्वं श्रृङ्गारपुरे तापस एकः कुब्जकः पृष्ठे निःसृतकुढको नताङ्गस्तिष्ठति। तस्य विनेय एको वैधेयः। स एकदा नगराद् बहिर्गतः सन् गङ्केटिकायष्टिं गोपालैर्वह्निना ताप्यमानां ददर्श। पप्रच्छ च–'किमेतद् भवद्भिः क्रियते?,। तैरुक्तम्–वक्रां यष्टिं वह्नितापेन सरलीकुर्वन्तः स्मः'। इदं श्रुत्वा मठमायातः। दध्यौ च यथा–'गुरोरिदं पृष्ठं वह्नितापेन सरलयिष्यामि, यष्टिवत्'। इति ध्यात्वाऽग्निमानीय संदीप्य गुरोर्गले पादिकया सग्रहीकृतस्य तावत् पृष्ठमतीतपद् यावद् गुरुः पूत्कारं पूत्कारं मृतः। जातः शिष्योऽपि पापायशसोः पात्रमिति ॥ 'वत्स! विषमाणि कार्याणि भीरुणा मा समारभत। ते हि भयेन विह्वलत्वाद् बुद्धेर्भ्रंश्यन्ति, चिर्भटपुरुषवत्। तथाहि–क्वापि पुरे गृहस्थ एको निशि शयितोऽस्ति गेहे खट्वायाम्। निशीथे चागत एकस्तस्करस्तद्गृहे। तेन 'जागर्ति शेते वाऽयम्' इति ज्ञातुं हस्तस्थेन दृढेन चिर्भटेनाजघ्नेऽसौ। भग्नं चिर्भटम्। प्रसृतं जलं तदङ्गे बीजानि च। जागरितोऽसौ। सहसा महाभयभ्रान्तः पत्नीमाह–'रे पत्नि! जागृहि जागृहि, चौरेणाहं कृपाणेनाहतः, न केवलं रुधिरं निःसृतम्, कीटका अपि पेतुः' स हि रसस्य रुधिरत्वं बीजानां च कीटकत्वं परिकल्प्येदं जजल्प। गतश्चौरः 'किमस्य रङ्कस्य हृतेन धनेन?' इति।'॥ पुनः श्रेष्ठ्याह–'कुलदीपक! यस्य सद्यस्कमुत्तरमुत्पद्यते स देवानपि वशंवदीकुरुते, किं पुनर्नरान्?, वैष्णवीनारीवत्'। पुत्रः पृच्छति–'का सा?'। ततो ब्रूते–'वत्स! आकर्णय–कर्णिकारपुरे क्वचिद् महाप्रसादे साविष्ठा-

नोऽस्ति मुकुन्ददेवः। तत्र विचित्रपूजापरो लोकः। वर्षारात्रे च बह्वयो रमण्यो मासोपवासं कुर्वन्ति। तासु पुनः शुद्धव्रता भूयस्यः। एका तु जीविकामात्रप्रिया पाखण्डिका रात्रौ चूरमकं चर्वति। एकदा तथा दृष्ट्वा जातकुतूहलेन हलधरबान्धवेनोक्तम्–'भद्रे! मायाविनी त्वम्, यज्जिह्वया मासोपवासं प्रकाशयसि, रात्रौ तु यथेष्टं मिष्टान्नानि भक्षयसि'। ततोऽसौ प्रत्युवाच–'देव! यादृशः स्वामी, सेवकैरपि तादृशैर्भवितव्यतम्'। गोविन्दो जगाद–'कथमहं मायावी?'। वैष्णवी स्त्री जजल्प–'त्वं वर्षारात्रे अहं शये' इति प्रकाशयसि, निशि तु लोकस्य चरितानि द्रष्टुं जागर्षि–'अन्यत् क्रियतेऽन्यदुच्यते' एतदेव मायावित्वम्। ततो मृषावादिनः सेविन्यहमपि मृषावादिनी युक्तमेवाऽऽसे'। इदं श्रुत्वा हरिस्तुष्टः। तस्यै च मनोवाञ्छितां विभूतिमदत्त' इति॥ 'देवतानां प्रभूणां गुरूणां च पुरः पुत्रक! मितं सारं च ब्रूयात्, कलेश्वरीसेवकवत्। तथाहि–कश्चिदन्धो नेत्रार्थी कलेश्वरीं तपोजपध्यानपुष्पपूजादिभिराराध। तुष्टा साऽसै प्रत्यक्षीभूय जगाद–'वत्स! प्रसन्नाऽसि, याचस्व यथेच्छमेकवाक्येन'। ततः स प्राज्ञोऽवदत्–देवि! यदि प्रसन्नाऽसि तदाऽतो मां तथा कुरु यथाऽहं सुवर्णरत्नस्थालैर्निजपुत्रपौत्रान् भुञ्जानान् पश्यामि'। एतावता धनाढ्यता चिरजीविता सलोचनता संतानादि सर्वं याचितम्। तुष्टा देवी तत्तथैव रचयाञ्चकुर्षी।' 'वत्सक! मा स्मैतानि वाक्यानि मे विस्मार्षीः, व्यवहारपथे सम्यक् प्रवर्त्तथाः' इति पितुर्वचनं श्रुत्वा तत्त्वं ज्ञात्वा बङ्गालदेवः कुटुम्बभारं धरन्नास्ते। पिता मृतः। जातो बङ्गालदेवः कुटुम्बदेवः। पालयति त्रिवर्गम्। न वक्ति परुषं वचः। तस्य च द्वे पत्न्यौ चण्डा–प्रचण्डानाम्न्यौ। ते पुनरन्योऽन्यं कलहायमाने स्तः। भज्यतेऽसौ तयोः कलिकोलाहलेन। तत्र च नगरे एका नदी नित्योदका वर्तते। तस्याश्चार्वाग्भागे एकः पाटकः, द्वितीयस्तु पराग्भागे। तेन च चण्डाऽर्वाग्भागे स्थापिता, प्रचण्डा तु पराग्भागपाटके आसिता। एकैकं दिनं द्वयोरपि सदनयोर्भोजनविलेपना-

दिभिः सुखं वसति। कस्मिन्नप्यवसरे प्रचण्डाया गृहे द्वे दिने अवात्सीत्। तृतीयदिने चण्डायाः सद्म मनसिकृत्य प्रचण्डाया गृहादचालीत्। यावत् तद्गृहद्वारमागात् तावत् सा किमपि ढुण्ढणकादि खण्डयन्त्यासीत्। तं च दृष्ट्वा वारकोल्लङ्घनक्रुद्धा मुशलमभिमन्त्र्य मन्त्रज्ञा संमुखस्तमक्षिपत्। स च मुशलः सर्परूपीभूय बङ्गालदेवस्याभिमुखं प्रससर्प। तस्माद् भीतो नष्टश्चलितो गेहाय प्रचण्डायाः। पृष्ठे सर्पः, पुरस्तादयम्। यावदायातां नदीमुल्लङ्घ्य गतः श्रेष्ठी। सर्पस्तु पश्चादुत्प्लुत्यापगामायात्येव। तं महोरगं पिधातुं स स्वां पटीं विपुलामुपरि न्यधात्। तयाऽऽच्छादितोऽसौ सर्पो यावन्मूढः क्षणं तिष्ठति तावद् वणिग् नंष्ट्वा प्रचण्डायाः समीपमुपागमत्। तदा च सोद्वर्तनिकामुत्तारयन्त्यासीत्। तया पृष्टम्–'कथं नाथ! त्वं श्वासपूरितास्यनासापुटो विश्लथवस्त्रः खिन्नस्त्वरितपादमायातोऽसि?' इति। अथायमाचचक्षे, यथा–'त्वद्भवनाच्चण्डायाः सविधं गतोऽहम्। ततः सा समयभेदरुष्टा मत्संमुखं मुशलमुद्गीर्णवती। मुशलश्च सर्परूपेण मामनुधावन्नागच्छन्नास्ते। देहि खटकीकपाटौ। क्षिप मामपवरकमध्ये'। एवं वदत एवास्याहिः प्राप्तः। प्रचण्डया करस्थोद्वर्तनीवर्तयः क्षिप्ताः। नकुलशतानि भूत्वा तं सर्पं खण्डशः कारं कारं जघ्नुः। गतः सर्पोपद्रवः। तां रात्रिं प्रचण्डासदनेऽनैषीत्। ब्राह्म्ये मुहूर्ते त्वचिन्तयत्–'इमे पत्न्यौ द्वे अपि दुष्टे मन्त्रज्ञे दृष्टप्रभावे। यदि क्वापि कार्ये क्रुद्धा मामेव हन्यातां तदा को निषेद्धा? "दुष्टा भार्या शठं मित्रं, भृत्याश्चोत्तरदायकाः।ससर्पे च गृहे वासो, मृत्युरेव न संशयः ॥१॥" तस्मादूर्ध्वं मुखं गृहीत्वा क्वापि गच्छामि'। इति परामृश्य सारद्रव्यं लात्वा प्रातश्चलितो देशान्तराय कार्पटिकवेषः। क्रमेण ग्राममेकं प्राप्तः। तत्र भ्रमन् व्यावहारिकगृहं गतः। तेनाभ्युत्थाय महदासने निवेश्य वासोभ्यामभ्यर्च्याभाष्यत, यथा–भद्र! ममेयं भगिनी विद्युल्लतानाम्नी, त्वमेतां परिणयस्व'। सोऽप्याचख्यौ यथा–'यूयं महान्तो व्यवहारिणः, अहं त्वज्ञातकुलशीलः कार्पटिकः, कथं

बंगालदेव-
कथा
करम्बकर
वादकः

मह्यं दीयते कन्यारत्नम् ?'। ततो व्यवहार्याचष्टे स-'नैमित्तिकेनैकेन समादिष्टमभूद्, यथा-'ईदृग्रूपोपो यः कार्पटिकवेष एत्यमुक-दिनेऽमुकवेलायां च स त्वया भगिन्याः पाणिग्रहणं कारणीयः'। इति तद्वचनं श्रुत्वा तुष्टो बङ्गालदेवस्तां विशाललोचनामुपायत। तया सह प्रेमपाशनियन्त्रितश्चिरं तस्थौ। पूर्वपत्नीद्वयं चित्तादपि विस्मृतम्। एकदा वर्षासु निशायां गर्जति स्मरनरपतिगजानीककल्पे जलदवृन्दे पतन्तीषु विरहिणीहृदयशरधोरणीषु जलधाराश्रेणीषु वासभवने विद्युल्लतया सह पर्यङ्कोपविष्टः प्रबोधितदीपोद्द्योतना-शिततिमिरः प्रत्यासन्ने निकेतने चन्द्रशालायां दत्तदीपां स्त्रीमेकां तारं तारं रुदतीं दृष्ट्वा बङ्गालदेवः पत्नीं पप्रच्छ, यथा-'भद्रे! किमेषा भद्रमुखी विलपति ?'। ततो विद्युल्लता दशनांशुद्योतितदीप्रदीप्तिः समाचष्टे-'स्वामिन्! प्रोषितभर्तृकेयम्, अस्या हि पतिः शिशिरे विदेशं प्राप्तो वर्षासमारम्भे समागमं प्रत्यज्ञासीत्, अन्तराले गतो ग्रीष्मः, प्राप्ता वर्षाः, तथापि नायासीत्, इत्येषा हृल्लेखोल्लिख्यमानहृदया रोरुद्यते'। एतां तत्कथां श्रुत्वा श्रेष्ठी दध्यौ, यथा-'हा धिक्, ते मे प्रियतमे मां विना कथं वर्षास-मयमतिवाहयिष्यतः ?, चलप्रकृतिरहम्, निःस्नेहोऽहम्, अधमोऽहम्, यः सहसा ते परित्यज्यैकाकी देशान्तरमागतः, तत्रापि संपन्नस्वार्थस्तत्प्रेमाणं व्यस्मार्षम्, यदपि तयोर्हिंस्रत्वं मया विमृष्टं मन्त्रशक्तिदर्शनात् तदप्यनुचितम्, न हि वल्लभमेव काचित् कदाचिद् हन्यात्, न हि तीक्ष्णदंष्ट्रोऽप्यहिः स्वयं स्वमङ्गं दशेत्, तस्माद् यदि तत्र यामि तदा मे श्लाघ्यं जीवितम्, धन्या सृष्टिः, अन्यथा तु किं मया दुरात्मना वृथापुरुषेण ?'। इति चिन्तयत एवास्य मुखं मम्लौ, सिष्वेद गात्रम्, प्रसस्रुः श्वासाः, जग्लौ रतिः। एवंविधं च दृष्ट्वा तं प्रपच्छे बालया-'आर्यपुत्र! किं सचिन्त इव दृश्यसे ?'। ततोऽसौ तथ्यमेवाकथयत्-'मृद्वङ्गि! एवमेवं मे पत्न्यौ स्तः, ते स्मृत्वा स्वदेशं जिगमिषामि, उत्कण्ठा कालविलम्बं न सहते'। इति तद्वचने श्रुते विद्युल्लता सान्तस्तापमचिन्तयत्,

यथा—'अस्य प्रागपि पत्नीद्वयमास्ते अहं तृतीया, इयन्ति दिनान्येवं मान्याऽऽसिषं यदितरागोचरं रागमनुभवन्त्यसि, संप्रति तु यावत् पश्यामि तावत् सपत्नीसत्तापङ्कमलिनोऽयं रसः। तत्रापि मां त्यक्त्वा तत्र जिगमिषुरयम्, तस्माद् बोध्यते, यदि पुनर्न गच्छति, बलाद् गमिष्यति चेत् तदा ज्ञास्यति मे पराक्रमम्'। इति गाढं मनसिकृत्योवाच—'प्रियतम! त्वां विना क्षणमपि जीवितुं नोत्सहे, किमिति निष्ठुरतामवलम्ब्य त्वया देशान्तरं गम्यते? "गंगासंगेण विणावि जलनिही होइ जलनिहिच्चेव। गंगा पुण तेण विणा भण कत्थ खणंपि वीसमउ?॥१॥" किं क्रियते? "ते केवि कमलिणीए हवंति संतावदीहरा दिअहा। मित्तोवि जेसु सह जीविएण अमयंपि संहरइ॥१॥" अथाह बङ्गालदेवः—'प्रणयिनि! तत्र गत्वा कतिपयदिनानि स्थित्वा पुनस्त्वामेवाभ्युपैष्यामि'। "पुष्पोत्तरेषु तरुषु भ्रमरो भ्रमेण, भ्रान्तिं करोति कुरुतामपरापरेषु। जानातु मालति! कलां कथमन्यथाऽसौ, लोकोत्तरस्य तव सौरभवैभवस्य॥१॥" इत्यादि। ततोऽस्यात्याग्रहं ज्ञात्वा तूष्णीं स्थिता सा। प्रातश्चलिते भर्तरि दधिमिश्रकरम्बकं हिमहिमं पाथेयपदे सादरं ददौ। तं करम्बकं गृहीत्वाऽयमचालीत् पादाभ्यां चरन्। गते सार्धयाममात्रेऽह्नि स्फारसरोजले लब्धे भोक्ष्यते यावता तावता तादृशेऽप्यजने सहसा क्षुतं श्रुतम्। अतोऽभुक्त्वैव पुरोऽव्राजीत्। पुनर्भोजनावसरे क्षुतम्। पुनरपि भोजनारम्भे क्षुतम्। एवं तृतीये क्षुते नासौ करम्बं बुभुजे। गृहीतकरम्बस्य पथि व्रजतोऽस्य मिलित एको जटाधारी। तेन सह गोष्ठीप्रसक्तेः कश्चिद्ध्वानं गत्वा प्राप्ते जलाशये तं करम्बकं जटाधारिणे सकलं ददौ, न तु स्वयमंशतोऽपि बुभुजे। जटाधार्यपि स्वैरं भुञ्जानस्तद्रसे परिणते बोत्कटो जातः। विद्युल्लताभवनं प्रति प्रस्थितः। बङ्गालदेवोऽपि कुतूहलभयशोकाकुलस्तमनु प्रस्थितः। यावद् गतः पशुर्विद्युल्लतागृहम्। श्रेष्ठी तु गृहाद् बहिरस्थात्। पशुं मध्ये प्रविष्टं विद्युल्लता वस्त्रलकुटेन कुट्टयति। पशुरपि बूबूत्करोति। 'यास्यसि रे!'

इति मुहुर्मुहुः साऽभिधत्ते। मिलितो लोकः। पृष्टं च तेन—किमेतत्?'। साऽप्याह, यथा—'प्राक्पत्नीसरणात् तत्र गच्छन्नसौ भर्ता मया तत्तदौषधमिश्रेण करम्बेन पशूकृत्य पराहन्यते'। ततो लोकेन कृपालुना प्रोक्तम्—'कुर्वेनं वराकं स्वरूपस्थम्'। तयाऽप्यौषधान्तराणि समाघ्रापितः। पशुर्जातो भरडकः। पृष्टो लोकेन—'जटिन्! किमेतत्?'। भरडकोऽपि पूर्वावस्थां स्मृत्वाऽऽख्यत्—"जो खाइ करंबउ कर विसासु, सो सहइ विडंबउ नत्थि दोसु"। तेनापि स्वा कथा सप्रपञ्चमकथि। लोकः स्माह—'तर्हि स क्व योऽस्याः पतिः?'। एवं पृच्छायां बङ्गालदेवोऽप्यागतः। सोऽपि सर्वेषां शृण्वतां बभाण—'यदस्य जातं जटिनः तद् ममाभविष्यत् यदि क्षुतशकुनं प्रमाणीकृत्य करम्बभोजनं न न्यषैत्सम्' इति प्रस्तावनां कृत्वा सविस्तरां स्वां कथामुवाद। उदित्वा च तैरेव पादैर्मुनिपार्श्वे गतः। "दुःखार्तः सेवते कामान्, सेवितास्ते च दुःखदाः। यदि ते न प्रियं दुःखं, प्रसङ्गस्तेषु न क्षमः ॥१॥" इति तदुक्तमुपदेशं श्रुत्वा साम्यमादृत्य तपस्तप्त्वा घोरं कर्म क्षिप्त्वा स्वः प्राप ॥ इति स्वादिनां दुःखावाप्तौ कथा ॥१३॥

(कथा १४) वाक्पारुष्यं महादोषः, सत्सु शेषगुणेष्वपि। एकेन कुवाग्दोषेण, त्यक्तो म्लेच्छेन कर्मकृत् ॥१॥

क्वापि पुरे एकेन म्लेच्छेन म्लेच्छात् कर्मकरो गृहीतः। तेन च विक्रेत्रा प्रथमं कथितम्, यथा—'मद्रोऽसौ कर्मकरोऽतस्करो लेख्यकवेदी शक्तः पक्षपाती, किं बहुना?, सर्वगुणः, केवलममङ्गलभाषित्वमस्य दोषः'। क्रेत्रा भणितम्—'अस्त्वसौ दोषः शेषा गुणाः सन्ति चेत्'। इत्युक्त्वा नीतो भृत्यस्तेन स्वगृहम्। कृतः सर्वेश्वरः। अन्येद्युः स्वाम्यादेशात् स्कन्धावारं यियासुस्तं भृत्यं प्रोवाच,—यथा—'अस्य हम्मीराख्यपुत्रस्य, एषां मानुषाणाम्, अस्य खरस्य, एतस्य कर्बराख्यस्य शुनः सारा कार्या'। इति वदन् गतः स्वामी। पालयति तत्कुटुम्बं सम्यक् शुचिः कर्मकरः। गताः केऽपि मासाः। स्वामिकार्ये सिद्धे स्वगृहं प्रत्यचलदसौ। प्राप्तश्च

तन्नगरपद्रम्। ज्ञापितं मध्ये स्वागमनम्। प्रथममश्वारूढः कर्मकरः प्राप्तः। ननाम च स्वामिनम्। ततः 'अशिवभाष्ययम्' इति तत्प्रथमस्वामिवचः स्मृत्वाऽसौ प्रथमं कर्बरकस्य शुनः कुशलमपृच्छत्। अथ बभाण कर्मकृत्-'स्वामिन्! मृतः कर्बरकः'। कथं मृतः??'। 'गर्दभमांसाहारजीर्णत्वात्'। 'गर्दभः कथं मृतः?' इति पृष्टे भृत्य आह-'घोरानिष्पत्त्यै इष्टिकाभारोद्वहनाद् रुधिरविकारेण मृतः खरः'। 'घोरानिष्पत्तिः कथम्?'। 'हम्मीरकाख्यत्वत्सुतमरणात्'। 'अस्यापि मरणं कुतोऽभूत्?'। 'उज्जागरकोद्भवज्वररुजा'। उज्जागरकः कुतः?'। अस्मत्स्वामिन्याश्चिरकालीनो राजयक्ष्मव्याधिरुद्भूव, स च वैद्यैश्चिरं प्रतिकृतोऽपि नोपशशाम, ततो निःक्षीयमाणायां तस्यां सकलकुटुम्बमजागरीत्' तेन प्रसङ्गेन मातृभक्तत्वाद् हम्मीरकोऽस्मदादीनां वचनममानयन् बहून्यहोरात्राण्यजागरत्, ततो मन्दाग्नौ ज्वरोद्भवे मृतः'। 'किं मत्पत्न्यपि मृता?-'रे! किमात्थ किमात्थ?'। सोऽप्याह-'मृतैव'। एतत्कर्बरककुशलमद्यापि लोके ख्यातम्। ततः सर्वकुटुम्बक्षयं श्रुत्वा वस्त्रस्फाटनत्रोटनादीनि करोति प्रभुः। भृत्योऽपि तथैव चेष्टते। अत्रान्तरे समेतं सशृङ्गारं संमुखं पुत्राद्यं सर्वं कुटुम्बम्। कृतोचिता प्रतिपत्तिः। समुज्जीवितो म्लेच्छः। भाषितश्चैषः-'रे किमेतत् त्वयाऽस्मज्जीविनो बहुदुःखकारकं बभाषे?'। अथाह दासः-'स्वामिन्! किं न स्मरसि यथा मम स्वामिना मां विक्रीणानेन तव पुरः प्रोक्तम्-'अस्य वाग्दोष एव दोषः, शेषाः सर्वे गुणाः सन्ति'? तदा तु तदादृत्याहं त्वयाऽऽनीतः, तदिदं साक्षात् पश्य इति। स्वाम्यपि गृहं गत्वा तं वाग्दुष्टं गृहाद् निरकासयत्॥ ॥ इति जिह्वासंवराभावदोषे म्लेच्छकथा॥१४॥

(कथा १५) क्रियाः सर्वाः कामदुघाः, प्राक्पुण्यं बवल्द् यदि। तथाहि पथ्या वैद्यस्य,पथ्यासीत्सर्वसिद्धिदा॥१॥

कर्पूरपुरे कोऽपि विप्रो वैद्यकं करोति, त्रिफलाहिङ्गुलाष्टकहिङ्गुत्रयोर्विंशतीसढादिराख्यादिकतिपयटिप्पितयोगवित्, न तु रस-

वीर्यादिविदुरः। तस्यायमाचारः—यानि यान्यौषधानि यस्मिन् रोग उपयुज्यन्ते तेषां तेषां पृथक्स्थालीस्थापितानां मध्यात् पलमर्धपलं वा दत्ते। घुणाक्षरन्यायेन यो जीवति स भक्तिमाचरति। यस्तु मृतः स कर्मवशतो गत इति। मृतो विप्रः कालान्तरे। तस्य तु पुत्रो द्वादशवर्षदेश्यः पशुप्रायो बहुभोजी। तस्य माता तु जीवति। लोकः पूर्वरूढ्या प्रष्टुमायाति, औषधं याचते, स तु न किमपि वेत्ति। ततः पृच्छति मातरं। माता तु स्थालीश्रेणीः प्रत्येकमालोकयामास, पथ्याचूर्णं च ददर्श, जगाद च वत्सम्—'पुत्रक! चूर्णमिदं पिता ते प्रायः सर्वलोकेभ्योऽर्पयामास, त्वमप्येतदेव प्रच्छकदर्शं दद्याः'। तद्वचनमात्रनिष्ठोऽसौ। यो यो यद्व्याधिपीडितः समेति तस्मै तस्मै तदेव दत्ते। तस्य च भाग्यात् प्रस्तुतरोगोपशान्तिः। ततश्च लोको ददाति। स्फायते चायं दिने दिने धनधान्यगवादिभिः पितुरधिकम्। एकदा ग्रामाध्यक्षस्य घोटिका मन्दुरायाश्छुटित्वा गता। ग्रामण्यः पुत्रस्तं हरीतकीवद्यं प्रष्टुमागतः। 'क्व सा घोटिका मया लभ्या?' इति तं पप्रच्छ। सोऽपि हरीतकीचूर्णमयच्छत्। उवाच—'भक्षयेदम्, लप्स्यसेऽर्वतीम्'। चलितोऽसौ वैद्यगृहात्। प्रचचाल रामतुबरपथ्याचूर्णाद् विरेकः। गतो ग्रामाद् बहिः सरः। तत्र जलपानाय स्वयमुपेयुषीमश्वामद्राक्षीत्। जहर्ष। तामारुरोह। सद्म समेयाय। ग्रामे त्वाबालगोपालं यशस्ततान, यथा—'अहो विप्रोऽयं ज्ञानी वैद्यश्च'। ततो दत्ते ग्रामः पूर्ववदस्मै। इतश्च तद्ग्रामासन्नमानन्दपुरमास्ते। तत्र वीरचन्द्रो राजा। तस्य बहवः शुद्धान्तनार्यः। तत्रैका राज्ञी राज्ञो न वल्लभा। ततः सा सर्वान् कलाविदो वश्यादिकं पृच्छति। न तु केनापि किञ्चित् सिध्यति, तथापि पृच्छत्येव कार्यातुरत्वेन। तस्यास्तु दासी कर्पूरीनाम्नी। कार्यवशात् तं विप्रस्य यशः श्रुतम्, यथा—'अयमेव सर्वज्ञः'। अथ सा तद्गृहं गत्वा तं विप्रं भृशं निमन्त्र्य तत्रानैषीत् स्वामिवश्यार्थे औषधं च ययाचे। तेनाप्युक्तम्—'इदं चूर्णं स्वामिन्यै देयम्' इत्युक्त्वा पथ्याचूर्णमार्पिपत्। तच्च स्वामिनी

जघास । चलितश्च विरेकः । जातातीसारवशात् तूलतलनिलीनोदरी, कण्ठगतप्राणप्राया च। ततो दास्या विज्ञप्तो राजा–'देव! अमुकनृपपुत्री अमुका महारोगात् प्राणसंदेहे वर्तते, एकदा तत्रायातु देवः'। इत्याहूतो गतः। तत्र राज्यपि निवृत्तविरेका सद्वस्त्रा पुरस्थाऽऽसीत् । तां च दिव्यरूपां दृष्ट्वा 'धिगस्मान् असारग्राहिणः सारद्वेषिणः, येनेदृग्रूपाप्यसावियत्कालं नालेपे, यत्र तत्र चिक्रीडे, अतः परमियमेव पट्टराज्ञी' इति दध्यौ। तत्कालं प्रभूतग्रामदेशनगरतुरगकनकाभरणस्वामिनीं नमदनेकभोगिनीशिरःस्रवत्कुसुमराजिमकरन्दकर्दमितचलननलिनां मनोमदकलीलाशालां चकार। गतः स्वसौधं वसुधाधिनाथः। राज्ञी च चमत्कृता तं विप्रमाकार्य हेमासनमुपवेश्य कनकपुष्पैः पूजयित्वा कृताञ्जलिर्जगौ–'त्वद्दत्तेय लक्ष्मीः, तवैता वयम्, विषमप्यमृतं भवदिच्छया भवत्येव' । इत्यभिधाय महतीं विभूतिमदात्। ततो हरीतकीवैद्यो जातो लीलाविलासः त्यागकर्णः भोगपुरन्दरः ॥ इति गुणगौणत्वे प्राक्पुण्यप्रौढौ च पथ्यावैद्यकथा ॥१४॥

व्या (ख्यासु ?) मुनीन्द्राणां चातुर्विद्यावतारसारासु। पूजासु वर्णपुष्पस्रज इव (नवरं ?) भवन्त्येताः ॥२॥

सुगमं–'नवरं' केवलम्–'एताः' इति अन्तरकथा (? थाः) प्रक्रमायातत्वात् ॥ अन्तरकथासंग्रहो नाम ग्रन्थः समाप्तः ॥

इति श्रीमलधारगच्छीयश्रीराजशेखरसूरिसू[illegible]तः सान्तर-
कथासंग्रहः कथाकोशः समाप्तः ॥

# श्रीकथाकोषे विनोदकथासंग्रहगताधिककथाश्लोकाकाराद्यनुक्रमः


| | कथाङ्कः | पत्राङ्कः |
|---|---|---|
| आराधयेद् महाभक्त्या | ३ | १२० |
| एकं तत् किमपि ब्रूते | ११ | |
| कार्यतात्पर्यमज्ञात्वा | १२ | |
| क्रियाः सर्वाः कामदुघाः | १५ | १४८ |
| तत्त्वातत्त्वविचाराय | ५ | १३१ |
| ध्रुवमेकाग्रया भ । | ८ | |
| प्रस्फोरन्ति शौण्डीर्य | १० | |
| बिभेति स कथं कृच्छ्रात् | ११ | १४८ |
| वञ्चनाबहुला नार्यः | ४ | १२७ |
| वाक्पारुष्यं महादोषः | १४ | १४७ |
| विद्वद्भिः सह वक्तव्यं | ९ | |
| यत्र तत्रापि जातानां | ७ | |
| यदेकः स्थविरो वेत्ति | ६ | |
| योऽपि सोऽपि ध्रुवं ग्राह्यो | १ | ११४ |
| सुष्ठूक्तमपि वैधेयम् | २ | ११९ |

*

| ग्रामनामानि | पत्राङ्कः |
|---|---|
| उज्जयिनी | १२० |
| कर्पूरपुरं | १४८ |
| लिम्बधन | |
| चमरपुरं | |
| पद्मिनीखण्डं | |
| पाटलिपुरं | |
| भद्रपुरं | |
| वेलापुरं | |
| श्रीपुरं | ११४ |
| भृङ्गारपुरं | १४२ |
| सुग्रामः | ११९ |
| सुधान्यं | १३१ |
| हरिहरद्वारं | |

| विशेषनामानि | पत्रांकः |
|---|---|
| कज्जलः | ११४ |
| चैत्रः | ... |
| जडमतिः | ... |
| बङ्गालदेवः | १४१ |
| भरतः | १२० |
| भुवनपालः | १४१ |
| मकरन्दः | १२७ |
| मलयकेतु | |
| मायावीरः | १४३ |
| मुकुन्ददेवः | १४३ |
| रोहकः | १२० |
| विप्रयज्ञदत्तः | ... |
| श्रीपतिः | ११४ |
| श्रीशङ्करसूरिः | ११५ |
| श्रीशीलसागरसूरिः | ११६ |
| सुन्दरी | ११४ |
| हीरकः | १२७ |

*

| कथानकानुक्रमः | कथांकः | पत्रांकः |
|---|---|---|
| कमलकथा | १ | ११४ |
| बधिरकुटुम्बकथा | २ | ११९ |
| रोहककथा | ३ | १२० |
| मकरन्दकथा | ४ | १२७ |
| दुर्बुद्धिः कुलपुत्रः | ५ | १३१ |
| वृद्धकृतत्वकथा | ६ | |
| कर्मप्राबल्ये विप्रकथा | ७ | |
| जटाधरकथा | ८ | |
| जडसङ्गत्यागे चैत्रकथा | ९ | |
| असारपुरुषकथा | १० | |
| धूर्त्तवाग्वैचित्र्यकथा | ११ | |
| कुवक्तुर्हस्यत्वे कथा | १२ | |
| बङ्गालदेवकथा | १३ | १४१ |
| कुवाग्दोषः | १४ | १४७ |
| पथ्याचूर्णवैद्यः | १५ | १४८ |


॥१५२॥

# * श्रीकथाकोशगतप्रास्ताविकश्लोकादिसूची *


| श्लो० | पत्रे |
|---|---|
| मनोरथरतोल्लासाः | ३ |
| वैभवादिमदोन्मादो | ३ |
| तद्गेहे मुशलीव मूषकवधूः | १३ |
| प्रवर्द्धमानः पुरुषः | १३ |
| सुखिनि सुखनिधानं | १४ |
| हरति हरिणचित्तं का कथा | १४ |
| वाङ्मात्रमैत्रीमधुरो जनोऽयं | १७ |
| ज्ञानामृतोर्मितृप्तस्य | १७ |
| उप्तं न सप्तक्षेत्र्यां यैः | १९ |
| दिट्ठं बब्बरकूलं | २४ |
| सर्वथा स्वहितमाचरणीयं | २५ |
| निक्षिप्य कर्षकः क्षेत्रे | २८ |
| असत्यमपि सत्याभं | २९ |
| दत्तेऽसौ न सुतान् स्थातुं | ३२ |
| अहर्निशं कदर्योऽपि | ३२ |
| कपोले हस्तकं दत्ते | ३२ |
| षोडशाब्दः सुतोऽश्नाति | ३३ |
| जायाकटाक्षभल्लीभिः | ३३ |
| तदन्यदेशगमनम् | ३३ |
| अभाणीद्भूपतिः पृष्टो | ३४ |
| अनाथास्तत्पुरे पूर्वं | ३४ |
| यस्मै कस्मै वनगजो | ३४ |
| वासरे सप्तमे कुम्भीः | ३४ |
| अरे ! भवच्चतुर्थेन | ३४ |
| मनोवाक्कायवन्नाथ ! | ३४ |
| रे व्यंसकाः ! व्यलीकोक्तीः | ३५ |
| एवं भाग्यकथां श्रुत्वा | ३५ |
| कोऽर्थान् प्राप्य न गर्वितो ! | ३६ |
| विद्या गरीयसी लोके | ३७ |
| करोति व्यवहारज्ञो | ३७ |
| काव्यं करोतु परिजल्पतु | ३७ |
| सप्ताप्येतानि वेश्यासु | ४२ |

| | |
|---|---|
| उपभुक्तखदिरवीटक० | ४२ |
| वेलामहल्लकल्लोलपिल्लियं | ४३ |
| मुञ्चन्ति विषयग्रामं | ४४ |
| कृते प्रतिकृतिं कुर्यात् | ४६ |
| अभ्युत्थानमुपागते गृहपतौ | ४८ |
| आस्तन्यपानाज्जननी | ५२ |
| जातापत्या पतिं द्वेष्टि | ५३ |
| वृद्धस्य मृतभार्यस्य | ५४ |
| सट्ठिं कागसहस्सा वसंति | ५७ |
| तुज्झ पिया मह पिउणो | ५७ |
| गुणा गुणज्ञेषु गुणीभवन्ति | ५९ |
| दत्तं न वित्तं करुणानिमित्तं | ५९ |
| न ददाति न भक्षति दैवहतः | ५९ |
| दातव्यं भोक्तव्यं सति विभवे | ६० |
| विमुच्य क्वापि हृन्नेत्रं | ६२ |
| स्त्रीसंयोगेन मर्त्यानां | ६३ |
| राजमानं रमाप्राप्तिः | ६४ |
| जा जा पडइ अवत्थडी | ६४ |
| आत्मवित्तं गृहच्छिद्रं | ६५ |
| शिशूनि कशिशूनि स्युः | ६५ |
| अद्य वर्द्धापनं तेऽस्तु | ६५ |
| राजमानं धनं चैव | ६५ |
| स्वप्नवद् यौवनानि स्युः | ६५ |
| ईश्वरे सुप्रसन्नेऽपि | ६५ |
| इति निर्भर्त्स्य बहुधा | ६५ |
| स्नेहादुत्सङ्गमारोप्य | ६५ |
| कम्बाघातैर्वपुषि निहतैः | ६६ |
| अधिकार ऋणं गर्भं | ६६ |
| प्राप्य चलानधिकारान् | ६६ |
| श्रीदत्तचरितमाकर्ण्य | ६६ |
| यत्र द्वौ कलहायेते | ६६ |
| तन्मुखं यः प्रगे पश्येत् | ६७ |
| प्रातर्लोकं वृथा कुर्वे | ६७ |
| मत्तो गुणाधिको राजा | ६७ |
| मन्मुखादपि त्वद्वक्त्रं | ६७ |
| इत्यौचित्यगिरा बाढं | ६७ |
| सर्वदा स्वमनो रोद्धुं | ६९ |
| न्याय्यार्थोपार्जने मासान् | ६९ |
| अपुण्यात् तात ! मे सम्पत् | ६९ |
| यथाऽत्र गुरवः सन्ति | ६९ |
| व्यवसायो गृहस्थानां | ६९ |
| किञ्च वत्स ! यथाशक्त्या | ६९ |

| | | | | | |
|---|---|---|---|---|---|
| पापकार्यं मया कार्यं | ६९ | देवगुरुप्रसादेन | ७४ | देवो व दाणवो वा खयरो व | ८३ |
| महात्मन्! सिद्ध! यच्चक्रे | ७० | सहसा विदधीत न क्रियां० | ७५ | पत्थरेणाहओ कीवो | ८३ |
| इति ज्ञानिगिरा तस्य | ७० | यदि भवति धनेन धनी | ७७ | तह पुव्विं किं न कयं | ८३ |
| सिद्धोऽयं नियमान् सम्यक् | ७० | दानं भोगो नाशस्तिस्रो | ७७-१०३ | जे इह हुंति सुपुरिसा | ८३ |
| असद्वाचि श्रुतायां च | ७० | अधः क्षिपन्ति कृपणाः | ७७-१०३ | अहह! गृही क्व नु कुशली? | ८३ |
| इत्थं विचिन्त्य पश्चाक्ष० | ७० | मातुः स्तन्यं रजःक्रीडा | ७७ | अथिरेण थिरो समलेण निम्मलो | ८३ |
| सर्वसोपकृतिर्देव! | ७२ | बालत्तणंमि रेहइ | ७७ | अन्नत्थ सुया अन्नत्थ गेहिणी | ८४ |
| न स्थातव्यं न गन्तव्यं | ७२ | रम्ये चैत्यै तीर्थनाथस्य बिम्बे | ८० | अम्भोधिः स्थलतां स्थलं | ८५ |
| न विद्या धनलाभाय | ७३ | ता सयणा ता मित्ता | ८१ | न चलति विधिवशाद् | ८६ |
| नमस्यामो देवाननु | ७३ | जातिर्यातु रसातलं | ८१ | विद्यारूपकलत्राणि | ८६ |
| सेतुं गत्वा समुद्रस्य | ७४ | क्व तरुरेष महावनमध्यगः! | ८१ | आनन्दं जनको बिभर्त्ति हृदये | ८७ |
| मित्रद्रोही कृतघ्नश्च | ७४ | यन्मनोरथशतैरगोचरं | ८२ | चन्दनं शीतलं लोके | ८७ |
| राजंस्त्वं राजपुत्रस्य | ७४ | लच्छी णिदाणदच्छी | ८३ | पुणु भरि२ पुणवि भरि | ८८ |
| ग्रामे वससि कौमारि! | ७४ | जह कोइ पामरो वाविऊण | ८३ | ते गच्छन्ति महापदं भुवि | ८८ |

| | |
|---|---|
| भो धणय ! भणसु सच्चं | ८८ |
| अन्नोवि कहउ कोई | ८८ |
| जे भग्गा विहवसमीरणेण | ८८ |
| एगत्तो हिमवंतो अन्नत्तो | ८८-९० |
| भो धणय ! कहसु सच्चं सयलं | ९० |
| अन्नोवि कहउ कोई | ९० |
| शशिदिवाकरयोर्ग्रहपीडनं | ९० |
| कुलं च शीलं च सनाथता च | ९० |
| गरुओ वरस्स बप्पो | ९१ |
| सयलनिहाणनिहाणं० | ९१ |
| समहियगुणेहिं अह सम० | ९१ |
| हीणगुणेहिं समं पुण | ९१ |
| इक्को य दो य तिन्निवि | ९१ |
| उवयारकए जे हुंति सज्जणा | ९१ |
| अवयरिएवि न कुप्पइ | ९१ |
| उवयारहए उवयारडउ | ९१ |
| नयणहं आगइ छादुला | ९१ |
| यत्र न स्वजनसङ्गतिरुच्चैः | ९२ |
| तदेव धन्यं नियमेन धाम | ९२ |
| आवंती न निवारइ जंती | ९२ |
| सुकुलजन्म विभूतिरनेकधा | ९२ |
| स्त्रैणभूषणमणेः कमलायाः | ९२ |
| सायरु बप्पु मुरारि पिउ | ९२ |
| सीयह तीरह पाणीयह | ९३ |
| हे लक्ष्मि ! क्षणिके स्वभाव० | ९३ |
| कोऽर्थान् प्राप्य न गर्व्वितो | ९३ |
| जह जह वड्डइ विहवो | ९२ |
| भुवणोवयारदुत्थियदेहा | ९३ |
| विरला जाणंति गुणा | ९३ |
| पवनकेतुसदृक्षाः पुरुषाः स्तोकाः | ९३ |
| मा बहउ कोइ गव्वं | ९३ |
| न गर्व्वः सर्व्वथा कार्यो | ९३ |
| गुरुएवि विहवसारे | ९३ |
| जे हुंति उत्तमनरा | ९६ |
| संसारदुक्खतविए जीवे | ९६ |
| भोः ! स्वल्पा भोगाः | ९६ |
| भवकोटीदुष्प्रापामवाप्य | ९७ |
| चक्कहरहलहराणं देवा | ९७ |
| सुलहो विमाणवासो | ९७ |
| तावद्गुणा गुरुत्वं च | ९८ |
| अत्थह गारवु नहु नरह | ९८ |
| पात्रे त्यागी गुणे रागी | ९८ |

| | | | | | |
|---|---|---|---|---|---|
| सर्वासामपि देवीनां | १०० | सुखस्यानन्तरं दुःखं | १०२ | जो संतं परिभुंजइ | १०५ |
| छिन्नमूलो यथा वृक्षो | १०० | सुखे सुखाधिकान् पश्येत् | १०२ | ते विरला सप्पुरिसा | १०५ |
| सो कोऽवि घरे जायइ | १०० | लक्ष्मीरात्मगृहोद्भवेति | १०३ | को मुणइ ताण संखं | १०५ |
| दानेन भोगान् दयया सुरूपं | १०० | पश्चाद्दत्तं परैर्दत्तं | १०३ | जितश्चेत्पुरुषो लक्ष्म्या | १०५ |
| तृष्णां छिन्द्धि भज क्षमां | १०० | यदनस्तमिते सूर्ये | १०३ | ता छंडिज्जइ एसा जात्र | १०५ |
| अह सुहगुरु परित्तारस्यउं | १०१ | प्रदत्तस्य प्रभुक्तस्य | १०३ | संबुज्झह किं न बुज्झह | १०५ |
| नहु भाईय दिट्ठु मए | १०१ | कीटिकासञ्चितं धान्यं | १०३ | भुत्तुं विसए अणुत्तरे | १०५ |
| दाणु जु दिन्नउं मुणिवरह | १०१ | जा दत्तभुत्त संचलइ संपया | १०४ | अहिणुव्व सया भयंकरे, | १०५ |
| थोडउं दाणु सुहावणउं | १०२ | शिशुत्वं तारुण्यं तदनु च | १०४ | विसयामिसलुद्धमाणसा | १०५ |
| करचुलुयपाणिएणवि | १०२ | दुच्चिय हुंति गईओ | १०४ | वरवीणावेणुमाइएसु | १०५ |
| पश्य शलाकाऽवसरे | १०२ | वारां राशिरसौ प्रसूय | १०४ | सिंगारवियारबंधुरे | १०६ |
| खद्धु न दिन्नु धणियधणु | १०२ | आपद्गतान् हससि किं | १०५ | सरसाहाराहिलासिणो | १०६ |
| कम्मयरो घरसामी | १०२ | जो संतावि न भुञ्जइ न देइ | १०५ | वरकुसुमामोयमोहिया | १०६ |
| विहि अणुकूलीय माणुसह | १०२ | सश्रयशीलसरिच्छा | १०५ | मिउमणहरफाससलालसा | १०६ |

| | |
|---|---|
| सिद्धिघरंमिविं जाओ | १०६ |
| शील शरीरह आभरणु | १०८ |
| रोयसि कीस किसोयरि ! | १०८ |
| पिब खाद च याति शोभने ! | १०८ |
| यावज्जीवं सुखं जीव | १०८ |
| अर्थो नराणां पतिरङ्गनानां | १०८ |
| मितं ददाति हि पिता | १०८ |
| धणु परीयणु वड्ढामणउं | १०८ |
| नरकान्तं तदा राज्यं | १०८ |
| दुर्बलानामनाथानां | १०८ |
| प्रजानां धर्म्मषड्भागो | १०८ |
| लोकेभ्यः करमादाता | १०८ |
| अकरे करकर्त्ता चेत् | १०८ |
| आसातरवर मउरीयउ | १०९ |
| पाणी तणइ वियोगी | १०९ |
| रज्जुग्गहविसभक्खण | १०९ |
| दिट्ठो य निययपुत्तो | १०९ |
| अरक्षितं तिष्ठति दैवरक्षितं | १०९ |
| वने रणे शत्रुजलाग्निमध्ये | १०९ |
| आयासे गिरिसिहरे | १०९ |
| वरसयणासण खाणु पीणु | १०९ |
| प्रथमे नार्जिता विद्या | ११० |
| अह माणभंगरन्नो चित्ते | ११० |
| नरवइ आण जु लंघिस्सइ | ११० |
| उद्योगिनं पुरुषसिंहमुपैति | १११ |
| रायसुयाण बहूणं चित्तगए | ११२ |
| संपइ पयडं करिसंभमाउ | ११२ |
| जइ एस रायपुत्तो न हुज्ज तो | ११२ |
| किञ्च करिसंभमं रक्खिऊण | ११२ |
| कहइ गुरू पुव्वभवे ससयवहे | ११२ |
| तं वसणगओऽवि अणत्थवज्जिओ | ११३ |
| कुणइ जिणसाहुभत्तिं | ११३ |
| यन्नैकामपि कामिनीं परिणय० | ११४ |
| जयन्ति गुरवोऽस्माकं | ११४ |
| मनोविनोदहेतूनां | ११४ |
| तन्नास्ति किञ्चिज्जगति | ११४ |
| तत्त्वप्रियजनाकीर्णे | ११४ |
| सत्काव्यनादपक्षाभ्यां | ११४ |
| तपांसि यातनाः सर्वाः | ११५ |
| सम्यग्न्यायोपदेशेन | ११६ |
| अणवट्ठियस्स धम्मं मा हु | ११६ |
| अप्रशान्तमतौ शास्त्र० | ११७ |


॥१५८॥

आकारैः कतिचिद् गिरा १११८
बिभ्राणा हृदये त्वया विनिंहितं ११८
ससिणेहदेहदहणे १२९
यस्य नास्ति स्वयं प्रज्ञा १३३
प्रायेण भूमिपतयः १३४
दण्डीखण्डमितः प्रयच्छ १३५
जातरि भुंजति भरड १३७
सिरिगिरो बोलइं राणा १३७
यत्र भुञ्जति भस्माङ्गी १३७
सकृज्जल्पन्ति राजानः १३७
दुष्टा भार्या शठं मित्रं १४४
गंगासंगेण विणावि जलनिही १४६
ते केवि कमलिणीए १४६
पुष्पोत्तरेषु तरुषु भ्रमरो भ्रमेण १४६
दुखार्त्तः सेवते कामान् १४७
त्वद्दत्तेयं लक्ष्मीः १५०

समाप्तम्

णमो जिणाणं।

मुद्रयितुमारब्धा ग्रन्थाः

१ सङ्घाचारभाष्यम् (विवरणसमेतं)
मूलकर्तारः श्रीमद्देवेन्द्रसूरयः
टीकाकर्तारः आचार्यधर्मघोषसूरयः

२ श्राद्धदिनकृत्यम् (बृहद्विवरणोपेतं)
सूत्रयितारः कर्मग्रन्थाद्यनेकग्रन्थनिर्मातृ-
श्रीमद्देवेन्द्रसूरीशाः

३ भगवतीसूत्रम् (सटीकं)
(श्रीअभयदेवसूरिपादसंदब्धव्याख्योपेतं)
(द्वितीय-तृतीयौ विभागौ)

४ प्रव्रज्याविधानकुलकम् (सटीकं)
वृत्तिकृतः श्रीप्रद्युम्नसूरिपादाः

५ भवभावना
(द्वितीयभागः) स्वोपज्ञा

६ कल्पसमर्थनम्
पूर्वतनाचार्यरचितं ०-८-०

७ कथाकोषः (मलधारीयश्रीमद्राज-
शेखरसूरिवरविहितः) (अयं) १-४-०

८ भवभावना पुष्पमालायुता सच्छाया

९ कल्पसुबोधिका (प्रसिद्धा)